The next Sara discusses the time-honored issue of Saguna vs. Nirguna Brahman. The popular misconception that "Saguna is personal, in the sense of having material or anthropomorphic associations, has no place in serious Vedantic discussions. The Saguna in Vedanta is the Brahman with metaphysical attributes".

In this section as in the treatment of the Tattvam asi Sruti, the author has risen to great heights of originality and expository brilliance. He opens the chapter with a fine Sragdhara verse indicating the scope of the subject:

विष्णोः कल्याणधर्माः श्रुतिशतविहिताः सर्वथा नैव बाध्या
नात्रापच्छेदनीतिः सुनियतविषये नो विकल्पावकाशः ।
नित्यान् सत्यांश्च धर्मान्प्रथयति निगमः सादरं मुक्तयेऽतो
वैधा धर्मा निषेध्या न कथमपि हरेः किंतु हेया निषेध्याः ।

He subjects the concept of "Nirgunatva" of Brahman to close analysis in the light of the principles of Mimamsa and other Sastras and shows how the Nirguna Srutis are incapable of yielding an utterly attributeless Being. Texts like "Satyam jnanam anantam brahma" and a host of others positing so many transcendental attributes of Brahman cannot be explained without the help of "Visesha", which is aso dealt with in this chapter.

The author's greatest contribution in this chapter lies in the remarkable originality with which he has shown how

and in what manner the so-called "Nirguna texts are to be interpreted restrictively without prejudice to the attributes" which have been posited in all seriousness by the Srutis themselves, such as:

"पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।"

"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।"

He develops this argument with reference to the implications of the Upakrama and other *nyayas* of the Purva-Mimamsa.

He rejects the contention of the Advaita that the "Saguna-vakyas" are to be invalidated by the "Nirguna-texts", on the strength of the "Apaccheda-nyaya" of Purvamimamsa where a later prescription is taken to set aside an earlier, in the Pratassavana of the Jyotishtoma sacrifice, in connection with the disconnection of the hem of the dress as between the Pratihartr and Udgatr priests. Vishnudasacharya discusses the real scope of the Apacchedanyaya and points out its inapplicability to the present case. He enumerates as many as eight criteria upon which he claims the superiority of the Saguna texts to the Nirgunavakyas. These criteria are: (1) Asanjatavirodhitva; (2) Niravakasatva; (3) Asadharanarthatva; (4) Upajivyatva etc., of the Saguna texts as compared with the Nirguna texts. These critieria are explained by him in the light of various adhikarana-nyayas from the Purva-Mimamsa. and with the help of various maxims from the Vyakarana Sastra also. Many of these arguments are incorporated in the *Nyayamrta*.

The discussion of Saguna-Nirguna is naturally incomplete without an exposition of the concept of Viseshas. *We have here a very lucid and exhaustive exposition of the whole doctrine of Viseshas according to Madhva philosophy*. In this connection the author notices once again the Neha nanasti text.

The doctrines of Visesha and Saguna naturally lead on to a refutation of the "Akhandarthavada" of Advaita or the theory of non-relational judgments which cuts at the very root of a "Sa-visehsa" Brahman, and seeks to replace it with a theory of a "Nir-visesha" or "Nir-dharmaka" Brahman (Nirvisesha-Cinmantram). Much of this section is based on Jayatirtha's *Tattvodyota-tika* where the topic is discussed threadbare, following Madhva's powerful critique of Akhandarthavada in his *Tattvodyota*.

Rejecting the plea of the Advaitic dialecticians that the expressions *Satyam Jnanam* and *anantam* used in the definition of Brahman there are only to be taken negatively as indirectly denying their opposites in Brahman and not as directly positing any of them as a positive content therein. Against this roundabout plea Vishnudasacharya makes a homethrust:

लक्षणया प्रवृत्त्यंगीकारेऽपि पूर्वपदेनैव यावल्लक्षितं तावदेवान्यपदेन लक्ष्यते? अथाधिकम्? द्वितीयेऽखण्डार्थहानिः । प्रथमे पुनर्वैयर्थ्यम् । अथ लक्ष्यार्थविशेषाभावेऽपि आरोपितानानन्दत्वादिव्यावृत्त्यर्थत्वेन पदान्तराणां प्रयोजनवत्त्वादिति चेन्न । लक्ष्येऽतिशयानाधाने तदारोपस्यानिवृत्तेः । किंच, ब्रह्मविशेषणतया व्यावृत्तिबोधः प्रयोजनमुत स्वतन्त्रतया? आद्ये, सविशेषत्वापत्तिः । अघटं भूतलमितिवाक्यार्थवत् । ततश्च लक्षणांगीकारेऽपि विशिष्टार्थता दुस्त्यजा । अभावविशेषांगीकारे भावविशेषैः किमपराद्धम्? ततो वृथा मुख्यार्थत्यागेन लक्षणाश्रयणम् ।

He then examines the plea that the "Tattvam asi" text should also be interpreted in this "Akhandartha" sense. He dismisses the plea for resorting to "Jahad-ajahal-lakshana" in the identity proposition "So ayam Devadattah" which is sought to be analogically extended to "Tattvamasi" by the Advaitin. Vishnudasacharya points out that in "Soyam Devadattah" there is no impediment to the acceptance of the

expressed sense: "He is the same Devadatta". What the Advaitin forgets or suppresses there, is that the term "Sah" (He) does not merely convey the sense of Devadatta's con nection with the past time and place but that such a connection is *past*. Similarly, the term "Ayam" (the same) signifies not only connection with 'time and place' but connection with the "present time and place". There is thus no imcompatibility in stating that Devadatta who was previously connected with a past time and place is *now connected* with the present time and place:

नह्यन्तरितदेशकालादिसंबन्धस्य इदानीं सत्त्वे विरोधः ।

V

The last chapter deals with the question of the authoritativeness and validity of the Vedas and their "Apaurusheyatva" as admitted in the Vedanta. The treatment here is based on the *Vishnutattvanirnaya* and its commentary. The position of the Vedas in the Advaita school is shown to be rather unsatisfactory, at the outset, being regarded as "*mithya*" and "*a-tattvavedaka*", in reality. In this comnection, Vishnudasacharya quotes a verse from Yadavaprakasa:

'वेदोऽनृतो बुद्धकृतागमोऽनृतः
प्रामाण्यमेतस्य च तस्य चानृतम् ।
बोद्धाऽनृतो बुद्धिफले तथाऽनृते
यूयं च बौद्धाश्च समानसंपदः' ।

*The usual objections to the validity of the Vedas raised by Buddhists, Carvakas and other sceptics are replied to at great length. Vishnudasacharya argues that without accepting some "Apaurusheya" authority, no ultimate sanction for Dharma, adharma and other moral and spiritual

* Refer to the footnote pp. 128—139.

concepts and values could be guaranteed. After establishing "Veda-apaurusheyatva" the author deals with the self-validity of knowledge and extends it to Vedas. The doctrine of Sakshi and Sakshipramanya are also explained here.

वादरत्नावली

ॐ। प्रपद्ये रघुनाथस्य चरणौ शरणं परम् ।
वनायनं ययोरासीद्देहभाजां रसायनम्[1] ।। १ ।।
विश्वं सत्यं हरिः कर्त्ता जीवान्यः[2] परमार्थतः ।
वेदः सत्यः प्रमाणं चेत्येवं व्यासमतस्थितिः ।। २ ।।

ननु विश्वस्य सत्यत्वं[3] कुतः सिद्धम्? श्रुतिस्मृतीतिहासपुराणैरिति[4] ब्रूमः । तथाहि – "कविर्मनीषी"[5] (या. सं. ८) इत्यादीशावास्ये । "विश्वं

---

१ रघुनाथचरणयोर्न यदि वनगमनं समभविष्यत्, नाहनिष्यत तदा रावणः, नापूरयिष्यत च सतां मनोरथः । तद्वनगमनमेव देहभाजां रसायनमिव जीवातुरभवदिति भावः । अनेनाऽरण्यकप्रतिपाद्यं परं ब्रह्मात्राधिकृतमित्यसूचि । अविद्यानिरसनद्वारा विद्यास्थापनं फलमिति च । "रसो वै सः" । तदयनं च मोक्ष एवेति ।

२ क्वचित् "जीवोऽन्यः" इति पाठो दृश्यते । "जीवेभ्योऽन्यः परमात्मेति कुतः" इत्युत्तरग्रन्थस्वारस्यात् "जीवान्यः" इत्येव पाठः साधीयान् । बहुपुस्तकसंवादाच्च ।

३ "पारमार्थिकं सत्यत्वं" इति ख. ग. पाठः ।

४ "भारतपुराणैः" इति कश्चित् पाठः । भारतस्येतिहास एवान्तर्भावान्न पृथग्वक्तव्यं तत् ।

५ "कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः" इति समग्रा याज्ञीयमन्त्रानुपूर्वी । परिभूः परिभवति सर्वानतिशेते परितो भवति वा । स्वयम्भूः स्वयमेव भवति स्वतन्त्रः । शाश्वतीभ्यः समाभ्यः सर्वकालेषु यथार्थतयैव सर्वपदार्थानसृजदिति ।

सत्यम्"[१] (ऋ. २.७.३.), "यच्चिकेत सत्यम्"[२] (ऋ. ८.१.१७.), "सत्यः सो अस्य महिमा"[३] (ऋ. ५.७.२५.), "अथैनमाहुः[४] सत्यकर्मेति सत्यं ह्येवेदं विश्वमसौ सृजते" ( ), "कथमसतः सज्जायेत" (छा. ६.२.२.) इत्यादि[५] श्रूयते ।

"तस्मादेवाविकारस्य विष्णोरिच्छावशादिदम् ।
यथार्थमेव सम्भूतमिति वेदवचोऽखिलम्" इति हरिवंशे ।

"एवम्भूतो महाविष्णुर्यथार्थं जगदीदृशम् ।
अनाद्यनन्तकालीनं ससर्जाऽत्मेच्छया विभुः" इति वाराहे[६] ।

"असत्यमप्रतिष्ठं ये जगदाहुरनीश्वरम् ।
त आसुराः स्वयं नष्टा जगतः क्षयकारिणः" इति च व्यासस्मृतौ ।

---

१ इयमानुपूर्वी – "विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनन्ति व्रतं वाम्" । हे मघवानौ इन्द्राबृहस्पती, युवयोरिदं विश्वं सत्यमेव । युवयोः सत्यं जगत्सर्जनव्रतं आपश्चन देवा अपि प्रमिनन्ति जानन्तीत्यन्तर्यामी स्तूयते ।

२ "यच्चिकेत" इतीयानेव क. पाठः ।
"यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता ।"
स्पृहणीयं हविरादि जेता स्वीकर्ता । यज्ञफलं च दाता यद्यच्चकार तत्सत्यमेव ।

३ "सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ।"
विप्रराज्येषु यज्ञेषु शवः सुखमुद्दिश्य अस्य जगत्सर्जनमहिमा सत्य इति गृणे स्तौमि ।

४ ब्रह्मसूत्रभाष्यमूलकोश तु "अथ हैनमाहुः" इति पाठः पठितः । (अ. २. पा. १. सू. १८.)

५ "इत्यादिषु श्रूयते" इति प्रचुरः पाठः । तत्पक्षे विश्वस्य सत्यत्वमित्यनुषङ्गः ।

६ "इति च वाराहे" इति ग. पाठः ।

"असत्यमप्रतिष्ठं ते"[१] (भ. गी. १६. ८.) इत्यादिष्वसत्यतावादिनां[२] निन्दा च श्रूयते ।

नन्वत्र कीदृशं सत्यत्वमुच्यते? यादृशं ब्रह्मणस्तादृशमेवेति ब्रूमः । नच विश्वं मिथ्येत्यावयोरेकाऽपि सम्मता श्रुतिरस्तीति सङ्क्षेपः ।

विश्वमिथ्यात्वे श्रुतिसंवादनिरासः

"नेह नानाऽस्ति"[३] (का. २.१.११.) इति श्रुत्या सर्वभेदप्रपञ्चनिषेधः क्रियत इति चेत्, मैवं वोचः । स्वगतनानात्वनिषेधपरत्वादस्याः । इह सगुणे नानावतारे ब्रह्मणि किञ्चन नाना नानात्वं[४] नास्ति इत्यर्थः। "द्व्येकयोः–"[५] (पा. सू. १.४.२२.) इत्यादिवन्नानेति भावप्रधानो निर्देशः । "नानाशब्दः पृथग्भाववचनः" इति कय्यटोक्तेश्च । अतो नानया श्रुत्याऽप्यद्वैतवादिनामिष्ट-सिद्धिः ।

---

१ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ।
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ।

यद्यपि व्यासस्मृतावपि निन्दैव श्रूयते । तथाऽपि नहि निन्दा निन्दनीयं निन्दित्वैव परं स्वार्थं लभते । किन्तु जगत्सत्यत्वद्रढिम्ने सत्यतावादिनः स्तोतुं स्वात्मान-मर्पयतीति स्फोरयितुं पृथग्वचनम् ।

२ "वादिनां च" इति क. पाठः ।

३ मनसैवेदमाप्तव्यं नेह नानाऽस्ति किञ्चन ।
मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ।

४ "किञ्चन नानात्वं" इति क. ख. पाठः ।

५ "द्व्येकयोर्द्विवचनैकवचने" इति समग्रं सूत्रम् । द्वित्वे वाच्ये द्विवचन-मेकत्वे वाच्य एकवचनमिति ।

किञ्चेयं श्रुतिः ब्रह्मव्यतिरिक्तस्य सर्वस्य यदि मिथ्यात्वं प्रतिपादयेत् तदा स्वस्य स्वार्थस्यापि मिथ्यात्वं प्रतिपादयेत्, नवा? नेति पक्षे तत्रैव प्रामाण्यं विहतं स्यादस्याः । तेनैव सदद्वैतभङ्गश्च स्यात् । प्रथमे स्वक्रिया-विरोधोऽस्मदिष्टसिद्धिश्च स्यात् । जगन्मिथ्येति मिथ्या चेत् सत्यतैव पर्यवस्यति । यथाऽनृतं ब्रह्मेत्यनृतं चेदृतं ब्रह्मेति सिद्ध्यति[1] ।

"यदेवेह तदमुत्र यदमुत्र तदन्विह ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" (का. २.१.१०)

इति नानावताराणां प्रकृतत्वादुपक्रमविरोधश्च स्यात् । तस्मात्सर्वज्ञेन भगवता भाष्यकारेणोक्तो भगवति स्वगतभेदाभाव एव श्रुत्यर्थोऽवसेयः ।

"ब्रह्मणस्तद्गुणानां च भेददर्श्यधरं तमः ।
भेदाभेदप्रदर्शी च मध्यमं तु तमो विशेत् ।"

इति पैङ्गिश्रुत्या च निश्चितोऽयमर्थः । त्वयाऽपि "एकमेव" (छा. ६.२.१.) इत्यत्र स्वगतभेदवर्जनं श्रुत्यर्थो वर्ण्यते[2] । अत्र प्रकरणे[3] आत्मानं बहुधा जनया-मासेत्युक्तम् । "यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति" (का. २.४.९.)

---

१ इतः परं ग. पुस्तके "यस्य विषयो मिथ्या स्यात् तत्प्रमाणं च न भवति । वन्ध्यासुतवचनवत्" इत्यधिकं दृश्यते ।

२ तथाहि शाङ्करं व्याख्यानम् – "रज्ज्वाद्यवयवेभ्यः सर्पादिसंस्थानवत् बुद्धिपरिकल्पितेभ्यः सदवयवेभ्यो विकारसंस्थानोपपत्तेः 'एकमेवाद्वितीयम्' परमार्थत इदं बुद्धिकालेऽपि" । अत्रावयवा अपि सतो बुद्धिकल्पिता न स्वतो भिन्ना वर्तन्त इति ।

समन्वयनये भाष्यरत्नप्रभा चैवमेवाऽह – "सजातीयविजातीयस्वगत-भेदनिरासार्थं 'एकमेवाद्वितीयम्' इति पदत्रयम्" इति ।

खण्डनटीकायां प्रथमपरिच्छेदे विद्यासागरश्च – "एकमित्युक्त्वा पुनरेव-कारमद्वितीयमिति च ब्रुवाणा सजातीयविजातीयस्वगतनानात्वाभावोपलक्षितं स्वरूपं बोधयति" इति ।

३ "तत्र प्रकरणे" इति ख. पाठः । काठके किलोत्तरत्र "एकं रूपं बहुधा

इत्यादिनाऽनेके धर्माः कथिताः । यत्र बहुत्वं धर्मधर्मिभावश्च तत्र तार्किक-नीत्याऽत्यन्तभेदः[1] प्राप्तः । भट्टनीत्या च भेदाभेदौ प्राप्तौ । तदेतत्प्राप्तमनेन निरस्यते ।

भवितृप्राधान्येऽप्येवं योजना । इह ब्रह्मणि किञ्चन धर्मादिकं नाना नास्ति इति[2] । अत्र किञ्चनशब्दः प्रकृतपर एव । यथा "सर्वेभ्यो दर्शपूर्णमासौ"[3] इत्यत्र सर्वशब्दस्य सर्वनामतया प्रकृतपरत्वात् प्रकृतपश्वादिसर्वकामपरता, न पुनरप्रकृतसर्वकामपरतेति सिद्धान्तितम्, तथाऽत्र किञ्चनशब्दः । तथाच प्रकृतं धर्मादिकं[4] नाना नास्तीत्यर्थो युक्तः । नानाभूतगुणनिषेधे च नानात्वमेव निषिद्धं भवति । विशेषणस्य प्रथमप्राप्तत्वात् । अन्यथा तदुपादानवैयर्थ्यात् । "सविशेषणे विधिनिषेधौ विशेषणमुपसङ्क्रामत" इति न्यायात्[5] । "लोहितोष्णीषा ऋत्विजः प्रचरन्ति"[6], "न जीर्णमलवद्वासाः स्नातकः स्यात्" इत्यादौ तथा दर्शनात् । अत एवोक्तम्— "विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे" इति ।

नन्वनेन वाक्येन ब्रह्मव्यतिरिक्तं सर्वं[7] बाध्यतामिति चेत्, हन्तैतद्वाक्यार्थोऽपि ब्रह्मव्यतिरिक्तो वक्तव्यः । प्रतिषेधरूपत्वात् । स च सत्यो मिथ्या

यः करोति" (का. २.५.१२.) इत्यात्मनो बहुधा जननं श्रूयते । "या भूतेभिर्व्यजायत" ((का. २.४ ७.) इत्यत्रैव च ।

१ "अत्यन्तं भेदः" इति क. पाठः ।

२ "नाना नास्ति" इतीयानेव क. पाठः ।

३ अयमेव मीमांसकाभिमतः पाठः । परन्तु सर्वत्रापि लिखितपुस्तकेषु "सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ" इति पाठो दृश्यते ।

४ "प्रकृतधर्माधिकं" इति क. पाठः ।

५ "न्यायः" इति ख. पाठः ।

६ "ऋत्विजश्चरन्ति" इति ख. पाठः ।

७ "ब्रह्मव्यतिरिक्तं बाध्यतां" इति क. पाठः ।

वा? मिथ्या चेद्युष्मदिष्ट[1]व्याघातः श्रुतेरतत्वावेदकत्वं च स्यात्[2] । अस्मदिष्टसिद्धिश्च स्यात् । सत्यश्चेत् ब्रह्मव्यतिरिक्तस्य सत्यत्वं[3] न विघातयेत् । "सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य" इति महाभाष्योक्तन्यायात् । यथा 'निकुचित' इत्यत्र कित्त्वसन्निधानेन कुञ्च[4]धातोर्नलोपे सत्युदुपधत्वमिति "उदुपधाद्भावादिकर्मणोरन्यतरस्याम्" (पा. सू. १.२.२१.) इत्यकित्त्वस्य

---

१ "मिथ्या चेदिष्ट –" इति ख. पाठः ।

२ "अतत्वावेदकत्वं स्यात्" इति क. पाठः ।

३ "ब्रह्मव्यतिरिक्तं सत्यं" इति क. पाठः ।

४ लिखितपुस्तकेषु सर्वत्राप्येवं पाठः – "यथा निकुञ्चित इत्यत्र कित्त्वसन्निधानेन कुञ्चिधातोः" – इत्यादि । नायं साधुः पाठः । नायं कुञ्चिधातुः । नापि निकुञ्चित इति रूपम् । यदि नायं पाठः, कथमथ पठितः ? लिपिकृतामेवायं प्रमादः । लिपिकृतः प्रमाद्यन्ति । नहि तथा ग्रन्थप्रणेतारः प्रमाद्यन्ति विदितवेद्याः । कथं तर्हि पठनीयम् ? एवं पठनीयम् – "यथा निकुचित इत्यत्र कुञ्चधातोः" इत्यादि । तथाहि महाभाष्यं प्रथमाध्याये चतुर्थाह्निके – "निकुचितेऽप्युक्तम् । किम्? सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति" । व्याचख्यौ च कय्यटः – "निकुचित इति कित्त्वसंयोगेन नलोपे सत्युदुपधत्वमिति निमित्तमकित्त्वस्य न भवति ।"

तथाचायमर्थः । कुञ्चधातुरयमनिदित् हलन्तश्च । तेन निष्ठायां कित्त्वान्नकारलोपे निकुचित इति रूपम् । तथाहि सूत्रम् । – "अनिदितां हल उपधायाः क्ङिति" (पा. सू. ६.४.२४.) एवमुपधाया नस्य लोपे उकार उपधा भवति । उदुपधत्वे च "उदुपधाद्भावादिकर्मणोरन्यतरस्याम्" (पा. सू. १.२.२१) इति कित्त्वाभावः प्रसज्यते । तत्राऽह महाभाष्यकृत् – "सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य" इति । यदुपजीवनेन प्रवृत्तो विधिः स स्वोपजीव्यं न विहन्तुमीष्ट इति । इदमुदुपधत्वं च नलोपसूत्रमुपजीव्य प्रवृत्तं न प्रभवति पूर्वसम्बन्धिनं विहन्तुमिति । "सन्निपातः सम्बन्धः" इति नागेशः ।

निमित्तं न भवति, तथा ब्रह्मव्यतिरिक्तसत्यत्व[1]प्रसादेन लभ्यः[2] श्रुतेरर्थः स्वोपजीव्यं ब्रह्मव्यतिरिक्तसत्यत्वं[3] न बाधेत । यदि बाधेत[4] स्वात्मानमपि बाधेत । ततश्च व्याहतिः स्यात् । ब्रह्मव्यतिरिक्तं सत्यं स्यादेव । तस्मान्नानात्व-मात्रनिषेधे तात्पर्यं श्रुतेरिति ।

उभयनिषेधे गौरवं च स्यात् । श्येने श्रूयते – "दृतिनवनीतमाज्यं भवति" इति । तत्राऽज्यस्याप्रकृतत्वान्न तदनुवादेन दृतिनवनीतत्वं विधीयते, किन्तु विशिष्टविधिरिति प्राप्ते तृतीयाध्यायस्याष्टमे पादे समर्थितम्–विशिष्टविधौ गौरवात्, गौरवस्य च दुष्टत्वात्, अतिदेशतः प्राप्तिसम्भवात् तदनुवादेन दृतिनवनीतत्वं विधीयत इति[5] । तस्मा[6]द्धर्मादीनामपृथक्त्वे तात्पर्यं श्रुतेरिति । किञ्चनेति सामान्यशब्दस्याप्यनुवादस्य प्रकृतगामित्वात् प्रकरणाच्च सङ्कोचः । यथा "व्रीहीनवहन्ति" इत्यत्र सामान्यव्रीहिश्रुतेः प्रकरणाच्च सङ्कोचः–

---

१ "सत्यप्रसादेन" इति क. पाठः ।

२ "लभ्यः सत्यः श्रुतेरर्थः" इति ख. ग. पाठः ।

३ "ब्रह्मव्यतिरिक्तस्य सत्यत्वं" इति क. पाठः ।

४ "बाधेत तर्हि" इति ग. पाठः ।

५ एतद्वाक्यस्याऽनुपूर्वी सर्वत्रापि लिखितपुस्तकेषु किञ्चिदिवास्तव्यस्ता । मीमांसानयेष्वनधीतिनां पाठक्रममजानतां लिपिकाराणामेवायं प्रमाद इति तानि वाक्यानि, तानि च पदानि यथायोगमेवं योजितानि । क. पाठस्तु बहुत्र संवादी ।

६ तस्मादिति पूर्वोक्तन्यायात् । तथाहि – प्रपञ्चस्य च भेदस्य च निषेधे गौरवं स्यात् । दुष्टं च गौरवम् । न च प्रपञ्चोऽनूद्यते । अप्रकृतत्वात् । धर्माश्च प्रकृता उपक्रान्ताः । "एवं धर्मान्" इत्युपसंहारे च । न च धर्माणां च भेदस्य च निषेधः शक्यशङ्कः । गौरवतादवस्थ्यात् । नहि गौरवं दण्डेन निवार्यते । तस्मात् प्रकृतान् धर्माननूद्य तेषु नानात्वं निषेधति श्रुतिरिति सुवचम् । तदेतदुक्तम्– "तस्माद्धर्मादीनामपृथक्त्वे तात्पर्यं श्रुतेरिति" ।

दर्शपूर्णमासापूर्वीयान् व्रीहीनवहन्यादिति, तथा[1] किञ्चनेत्यनुवादः संनिहित-धर्मादिकमेवाभिधत्ते । यथा च "वैश्वदेव्यामिक्षा" (मै. सं. १.१०.१०.) इत्यत्र तद्धितः सन्निहितामिक्षामेवाभिधत्ते[2] । यथा वा "आग्नेयीभिरुपतिष्ठते" इत्यत्रानुवादस्यैव सन्निहितगामित्वम्, आग्नेयीनां तु तृतीयाश्रुत्योपस्थानं प्रत्युपात्तत्वात्[3] प्रकृताभिरप्रकृताभिर्वाऽऽग्नेयीभिरुपस्थानं कर्तव्यमिति पूर्वः पक्षः । सिद्धान्तस्तु प्रकृता एव "अग्न आ याहि वीतये" इत्याद्या ऋचो गृह्येर-न्निति । तद्वदत्र 'किञ्चन'शब्दः प्रकृतपरामर्शीति निश्चीयते । अपिच "छागो वा मन्त्रवर्णात्" (पू. मी. ६.८.) इति न्यायेन यथा "अग्नीषोमीयं पशुमालभेत" इत्यत्र सामान्यशब्दस्य "छागस्य वपाया मेदसोऽनुब्रूहि" इति वाक्यात् छाग-विशेषे पर्यवसानम्;[4] यथा वा "सन्दिग्धेषु वाक्यशेषात"[5] (पू. मी. १.४.२९.)

---

१ "तथाच" इति क. पाठः ।

२ अयं भावः । वैश्वदेवीति कोऽर्थः? विश्वदेवा देवता अस्या इति किल वैश्वदेवी । "साऽस्य देवता" (पा. सू. ४.२.२४.) इति हि पाणिनिः सर्व-नामार्थे तद्धितं स्मरति । सर्वनामगर्भेण च तद्धितेन किं बोध्यते? नहि सर्वम्, किन्तूपस्थितमेव सर्वम् । उपस्थिता चाऽमिक्षा । तेन च सैव तद्धितार्थः । यथोक्तं तन्त्रवार्के (२.२.९.) –

"आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः ।
"आमिक्षापदसांनिध्यात्तस्यैव विषयार्पणम्" इति ।

तप्ते पयसि दधिक्षेपे यः पयसो घनांशः साऽऽमिक्षा । जलांशस्तु वाजिनम् ।

३ "प्रत्युपादानात्" इति ख. पाठः ।

४ तदुक्तं मण्डनमिश्रेण – "छागो मन्त्राद्दीक्षितोक्तः पशुः स्यात्" इति षष्ठाष्टमपादे । तथाचायमर्थः । पशुमालाभेतेति चोदनायां केवलपशु-पदश्रवणेऽपि मन्त्रवाक्ये "छागस्य वपायाः" इति पशुविशेषश्रवणात् दीक्षित-स्योपालम्भनीयत्वेनोक्तः पशुश्छाग एव स्यादिति ।

५ "यथा च 'सन्दिग्धे वाक्यशेषात्' " इति ख. ग. पाठः ।

इति न्यायेन "अक्ताः शर्करा उपदधाति" इत्यत्र "तेजो वै घृतम्" इति वाक्यशेषात्[1] घृतविशेषनिर्णयः;[2] तथाऽत्रापि "एवं धर्मान् पृथक्पश्यन्" (का. २.१.१४.) इति वाक्यशेषाद्विशेषनिर्णयः ।

अपिच बाधबलात् किञ्चनशब्दस्य सङ्कोचो न्याय्यः । उद्दिश्यमानत्वाच्च सन्निहितपरत्वं न्याय्यम् । "बहुबाधात्सङ्कोचो न्याय्यः" इति भवनाथेन संमार्जनाधिकरणे समर्थितत्वात् । किञ्च "स एष नेति नेत्यात्माऽगृह्यो नहि गृह्यते " (बृ. ४.५.१५.) इत्यादिना[3] घटादेर्भेदोऽभिहितः । "एष सर्वेश्वर एष सर्वज्ञ एष सर्वान्तर्याम्येष योनिः सर्वस्य" (माण्डू. १.६.) इत्यादिना च गुणा अभिहिताः । नच श्रुतिविहितस्य सर्वथा निषेधोऽस्ति । अन्यथाऽष्टदोषदूषितविकल्पाश्रयणं क्वापि न स्यात्[4] । पर्युदासाधिकरणानारम्भश्च

---

१ अयमर्थः । शर्कराणामभ्यञ्जनं तावत् श्रुतौ श्रूयते । केन तद्युक्तम्? जलेन घृतेन पयसा वा? विशेषाविधानाद्येन केनापीति प्राप्तम् । सिद्धान्तस्तु "तेजो वै घृतम्" इत्युत्तरत्रार्थवादः श्रूयते । नहि जलमत्र स्तूयते । नापि पयः । किन्तु घृतमेव । तेन वाक्यशेषगताऽन्यथा व्यर्थीभवन्ती स्तुतिरियं शर्कराणां घृतेनैवाञ्जनमिति निर्णयन्ती सार्थक्यमावहति । यथाऽऽह मण्डनमिश्रः – "सन्देहे निर्णयः श्रुतेः" इति ।

२ अत्र मूले "छागविशेषे पर्यवसानम्" इत्यत्र "घृतविशेषनिर्णयः" इत्यत्र च छागरूपपशुविशेषे पर्यवसानमिति घृतरूपद्रवद्रव्यविशेषनिर्णय इति चार्थः ।

३ "स एष नेति नेत्यात्मेत्यादिना" इति ख. ग. पाठः ।

४ श्रुतौ श्रूयते – "व्रीहिभिर्यजेत" इति, "यवैर्यजेत" इति च । तत्र प्रथमं व्रीहिहोमे यवहोमश्रुतेरप्रामाण्यस्वीकारः प्रामाण्यत्यागश्च स्याताम् । ततश्च यवहोमे यवश्रुतेः स्वीकृताप्रामाण्यत्यागस्त्यक्तप्रामाण्यस्वीकारश्च स्याताम् । एवं चत्वारो दोषाः । एवं पूर्वं यवहोमे व्रीहिश्रुतेरप्रामाण्यस्वीकारः प्रामाण्यत्यागश्च स्याताम् । ततश्च व्रीहिहोमे व्रीहिश्रुतेः स्वीकृताप्रामाण्यत्यागस्त्यक्तप्रामाण्यस्वीकारश्चेति पुनश्चत्वारो दोषाः । एवमष्टविधदोषदूषितोऽपि विकल्पः स्वीक्रियत उभयश्रुतिप्रामाण्यायेति ।

प्रसज्येत[1] । तस्मादपृथक्त्वमात्रे[2] तात्पर्यं श्रुतेरिति । नतु धर्मस्वरूपस्य प्रपञ्चस्य वाऽत्र निषेधः क्रियते। यदि धर्मादिकं प्रपञ्चो वा नास्तीति श्रुत्यर्थः स्यात् तर्हि नानेति पृथगिति च न वक्तव्यं स्यात्[3] । वैयर्थ्यात् । तस्मात् 'सन्ति धर्माः, किन्तु न पृथग्भूताः' इति श्रुत्यर्थः ।

---

१ अयमर्थः । निषेधगर्भो विधिः पर्युदासः । विधिगर्भो निषेधः प्रतिषेधः । तदुक्तम् –

"प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ।
अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्" इति हरिकारिकायाम् ।

तथाहि – "जुगोपाऽत्मानमत्रस्तो भेजे धर्ममनातुरः" । अयं पर्युदासः । अत्र नञोऽनुवादेनैव हि सार्थक्यम् । अत्रस्ततामनातुरत्वं चानूद्य गोपनं धर्मभजनं च हि विधीयते । तथा – "अमुक्ता भवता नाथ मुहूर्तमपि सा पुरा ।" एष प्रतिषेधः । नञः साक्षात् क्रिययैव सम्बन्धात् । मुक्तत्वं ह्यत्र निषिध्यते ।

श्रुतिप्रामाण्याय चायं पर्युदासोऽवश्यमभ्युपेयः । तथाहि – "तस्य व्रतम्" इत्याद्यारभ्य "नेक्षेतोद्यन्तमादित्यम्" इति श्रूयते । कर्तव्यविधेरुपक्रान्तत्वादत्राकर्तव्यनिषधोऽनन्वितः स्यात् । तेन श्रुतेरनन्वितार्थाभिधायितया चाप्रामाण्यं स्यात् । तद्भिया चात्र पर्युदास आश्रयणीयः । तथाच – उद्यदादित्यदर्शननिषेधद्वारा तददर्शनसङ्कल्पमेव श्रुतिरियं विधत्ते – 'अनीक्षणसङ्कल्पेन भावयेत्' इति ।

यद्यपि "नेक्षेतोद्यन्तमादित्यम्" इति मनुवचनमेव दृश्यते । न श्रुतिवचनम् । तथाऽपि तन्मूलभूता काचित् श्रुतिरत्र विचारितेत्यवगम्यते । नहि निर्मूलमृषयो वदन्ति । "तस्य व्रतम्" इत्युपक्रमश्च मनुवचने न दृश्यते । तेन ज्ञायते नेदं मानवं किन्तु तन्मूला काचन श्रुतिरेवेति ।

२ "अपृथक्त्वमात्र एव" इति क. पाठः ।

३ "नेहास्ति किञ्चन", "एवं धर्मान् पश्यन्" इत्येतावतैव विवक्षापूर्तेरिति भावः ।

विशिष्टनिषेधे च वाक्यभेदः स्यात् । भिन्नपदत्वात् । मत्वर्थशब्दाभावाच्च[1] । नानात्वं नास्ति, किञ्चन विश्वं नास्तीति विध्यावृत्तेर्वाक्यभेदः स्यादेव । नेदं रजतमित्यत्रापि न विशिष्टं निषिध्यते । यथोक्तं[2] न्यायविद्भिः–

"एकदेशापवादेन कल्प्यमाने च बाधने[3] ।
न सर्वबाधनं युक्तमिति न्यायविदः स्थिताः" इति ।

त्वद्रीत्याऽपि किञ्चन विश्वं नाना नास्तीत्युक्तेऽविनाभूतमस्तीत्येवोपलभ्यते[4] । ततोऽपि न मिथ्यात्वसिद्धिः । नह्यग्निनाऽविनाभूतो धूम इत्युक्ते धूममिथ्यात्वं सिद्ध्यति । प्रत्युत सत्यत्वमेव । त्वन्मते नानापृथगिहादिशब्दानां वैयर्थ्यं च स्यात् । तस्मात् "नेह नानाऽस्ति किञ्चन" इत्यस्यायमर्थः– किञ्चन गुणादिकं पृथक्पृथङ्नास्तीति[6] । अथवा "न तदस्ति विना यत्स्यान्मया भूतं चराचरम्" (भ. गी. १०.३९.) इति भगवद्गीतानुसारेण ईश्वरं विना किञ्चन नास्ति इत्यर्थः । नानाशब्दोऽसहाये वर्तते । यथाऽऽह पाणिनिः "विनञ्भ्यां नानाञौ नसह" (पा.सू. ५.२.२७.) इति । "वि, नञ् इत्येताभ्यां यथासङ्ख्यं नानाञौ प्रत्ययौ भवतोऽसहायेऽर्थे[7] पृथग्भावे" इति काशिका-

---

१ नानाशब्दो भावप्रधान इत्याशयेनेदमुक्तम् । भवितृप्राधान्ये तु "त्वद्रीत्याऽपि" इति वक्ष्यति ।

२ "तथोक्त" इति क. ख. पाठः ।

३ "बाधके" इति क. ख. पाठः ।

४ "अस्तीत्युपलभ्यते" इति क. पाठः । "अस्तीत्येव लभ्यते" इति ग. पाठः ।

५ इतः परं "इहेत्यव्ययं द्वितीयार्थे । नानाशब्दो विनापर्यायः । 'पृथग्विनाऽन्तरेणर्ते हिरुङ्नाना च वर्जने' इत्यमरोक्तेश्च" इत्यधिकं ख. ग. पुस्तकयोः । तथाच इह एतमात्मानं नाना विना अन्यत्किञ्चन नास्तीति श्रुत्यर्थः । यथाऽग्निं विना धूमो नास्ति तथेति ।

६ "इत्यस्यार्थः – किञ्चन गुणादिकं नाना नास्तीति" इति क. पाठः ।

७ "असहायार्थे" इति क. पाठः ।

वृत्तिः । "वि, नञ् इत्येताभ्यामसहायवाचिभ्यां नानाञौ भवतः स्वार्थे" इति च महाभाष्योक्तेरस्मदीय एवार्थः । "नाना पृथक् चासहाये" इति चाव्यय-वृत्तिरस्मदीयार्थेऽस्ति ।

किञ्च इह ब्रह्मणि किञ्चन विश्वं नास्तीत्युक्तेऽन्यत्र स्वकारणेऽस्तीत्येव लभ्यते । नत्वसत्त्वम् । नहि देवदत्तो गृहे नास्तीत्युक्तेऽसन्नेव भवति । नापि पटो[1] भूमौ न समवेत इत्युक्तेऽसन्नेव भवति[2] । ब्रह्मैव कारणमति चेत्, किं निमित्त-कारणम्, किंवोपादानकारणम्? नाऽद्यः । निमित्ते कार्यस्यासमवेतत्वात् । नहि कुविन्दे पटोऽस्ति, अपितु स्वोपादान एव । नोत्तरः । ब्रह्मप्रेरितायाः[3] प्रकृतेरेवोपादानत्वात् । जडद्रव्यस्य हि जडमेव परिणामिद्रव्यमुपादानं युक्तम्; नतु निर्विकारमजडं ब्रह्मेति शास्त्रे व्युत्पादितत्वात् । तस्मान्नानया श्रुत्या विश्वमिथ्यात्वसिद्धिरिति सिद्धम् ।। * ।।

"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" (छा. ६.१.४.) इति श्रुत्या जगन्मिथ्यात्वसिद्धिरिति चेत्,[4] मैवमसम्भावितं भाषिष्ठाः । यथा संस्कृतापभ्रंशनामधेययोर्हेतुहेतुमद्भावः तथा ब्रह्मजगतोरिति व्युत्पादन-परत्वादस्याः श्रुतेः । नह्यत्र मिथ्यात्वप्रतिपादकं पदमप्यस्ति । यथोक्तं[5] शास्त्रे–

"वाचारम्भणमित्युक्ते मिथ्येत्यश्रुतकल्पनम् ।
[6]पुनरुक्तिर्नामधेयमितीत्यस्य निरर्थता" (अनु. १.४.१२२.) इति।

---

१ "घटो भूमौ समवेतः" इति ख.ग. पाठः ।

२ "असन्नेव स भवति" इति क. पाठः ।

३ "ब्रह्माधिष्ठितप्रकृतेः" इति क. पाठः ।

४ "जगन्मिथ्यात्वं प्रतीयत इति चेत्" इति क. ग. पाठः ।

५ "तथोक्तं" इति क. ख. पाठः ।

६ लिखितपुस्तकेषु "पुनरुक्तं नामधेयं" इति पाठो दृश्यते । परन्त्वयमेव मूलपाठः ।

विस्तरस्तु खण्डनखण्डने द्रष्टव्यः । तस्मान्न प्रपञ्चस्यालीकत्वे श्रुतिरस्तीति[1] सिद्धम् ॥ * ॥

विश्वमिथ्यात्वानुमाने साध्यभङ्गः

नापि विश्वमिथ्यात्वेऽनुमानमस्ति । नन्वस्ति– विवादपदं मिथ्या दृश्यत्वात्, यदित्थं तत्तथा, यथा सम्प्रतिपन्नम्, तथाचेदम्, तस्मात्तथेति । अत्र ब्रूमः । किमिदं मिथ्यात्वं नाम? किमसत्त्वम्, उत प्रमाणाविषयत्वम्, अप्रमाणविषयत्वं वा, अयथार्थज्ञानविषयत्वं वा, सद्विलक्षणत्वं[2] वा, अविद्यातत्कार्ययोरन्यतरत्वं वा, बाध्यत्वं वा, अनिर्वचनीयत्वं[3] वा, स्वात्यन्ताभावसमानाधिकरणत्वं[4] वा, तथा प्रतीयमानत्वं वा, अथवाऽन्यत्किञ्चित्? नाऽद्यः । अपसिद्धान्तापातात् । व्यप्त्यादेरत्यन्तासत्त्वे[5]ऽनुमानत्वव्याहतेश्च ॥ १ ॥ न द्वितीयः । ब्रह्मणोऽपि मिथ्यात्वापातात् । तस्य स्वयंप्रकाशत्वेन त्वया सर्वप्रमाणागोचरत्वाङ्गीकारात्[6] ॥ २ ॥ न तृतीयः । सद्वादिभिरपि तस्याङ्गीकृतत्वेनार्थान्तरत्वात् । प्रपञ्चस्य क्षणिकमिदमित्यप्रमाणगोचरतायाः[7] सुप्रसिद्धत्वात् । स्मृतिविषयस्य

---

१ तथाहि शाण्डिल्यसूत्रम् – "शक्तित्वान्नानृतं वेद्यम्" इति । सत्यः सो अस्य महिमेति भगवन्महिमरूपत्वादस्य जगतः वेद्यं दृश्यमिति हेतोर्नेदमनृतमिति ।

२ "सद्विविक्तत्वं" इति क. पाठः । आनन्दबोधाभिमतोऽयमर्थः ।

३ "मिथ्याशब्दोऽनिर्वचनीयतावचनः" इति पञ्चपादिकायां पद्मपादाचार्यवचनम् ।

४ अयं चित्सुखाभिमतः पक्षः ।

५ "व्याप्त्यादेरसत्त्वे" इति ख. पाठः । "अनुमानव्याहतेश्च" इति च बहुत्र पाठः ।

६ "सर्वप्रमाणगोचरत्वानङ्गीकारात्" इति तु सर्वत्र प्रचुरः पाठः ।

७ ननु वयमप्यङ्गीकुर्मः क्षणिकत्वं जगतः । बाढम् । अङ्गीकुर्मः ।

याथार्थ्याभ्युपगमाच्च[1] ।। ३ ।। नापि चतुर्थः । उक्तदोषानुषङ्गादेव ।। ४ ।। नापि पञ्चमः । अस्माभिर्ब्रह्म वैलक्षण्याङ्गीकारात्, सतोऽपि सदन्तरवैलक्षण्याङ्गीकारात् सिद्धसाधनतापातात् ।। ५ ।। नापि षष्ठः । अनाद्यनिर्वाच्याया अविद्याया अप्रसिद्धत्वात् । सर्वाङ्गीकृताज्ञानस्य तत्कार्यस्य च प्रवृत्तिसंस्कारादेः[2] (?) सत्यत्वाच्च सिद्धसाधनतापत्तेः ।। ६ ।।

नापि सप्तमः । बाध्यत्वं नामान्यथा विज्ञातस्य सम्यग्विज्ञातत्वं वा, ज्ञाननिवर्त्यत्वं[3] वा, प्रतिपन्नस्य प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं[4] वा? नाऽद्यः । सिद्धसाधनात् । न द्वितीयः । ज्ञाननिवर्त्यस्याप्यभावज्ञानसुखदुःखादेः[5] सत्यत्वात् । सर्वस्य सत्यत्वेऽपि परैरीश्वरज्ञाननिवर्त्यत्वाङ्गीकाराच्च[6] । तृतीये का वा प्रतिपन्नता? प्रमाणप्रतिपन्नता भ्रान्तिप्रतिपन्नता वा[7]? नाऽद्यः । प्रमाणेनोपाधौ यः प्रतिपन्नस्तस्य तत्र निषेधासम्भवात् । भ्रान्तिप्रतिपन्नस्योपाधौ निषेधप्रतियोगित्वस्य सत्यत्वेऽपि सम्भवेनार्थान्तरत्वात्[8] । किञ्चेदं

कथन्तर्हि तदप्रमाणम्? आशुविनाशित्वं हि तत् यदस्माभिरङ्गीक्रियते । तथागतानां क्षणिकत्वमत्र विवक्षितमिति न विरोधः ।

१ स्मृतिर्हि व्यवहारे भट्टनयमभिनयतां न प्रमाणम् । अनधिगतार्थगन्तृ हि प्रमाणम् । स्मृतिविषयत्वाच्च घटादीनामप्रमाणविषयत्वम् । नचैतावता शुक्तिरजतसाम्यं घटादेस्तन्मतेऽपि ।

२ "प्रकृतिसंस्कारादेः" इति च पाठः ।

३–४ विवरणोक्तमिदं पक्षद्वयम् ।

५ "अभावाज्ञानसुखदुःखादेः" इति च पाठः । ज्ञानेन प्रागभावोऽज्ञानं च सत्ये एव निवर्तेते । उत्तरज्ञानेन पूर्वज्ञानं सत्यमेव निवर्तते । विरोधिहेतुदर्शने च सति सुखदुःखे सत्ये एव निवर्तेते ।

६ परैरिति कैः? मायावादिप्रतिवादिभिस्तत्त्ववादिभिः । ईश्वरज्ञानेन सत्यमेव जगन्निवर्तत इति हि तैरङ्गीकृतम् ।

७ "प्रमाणप्रतिपन्नता वा भ्रान्तिप्रतिपन्नता वा" इति क. पाठः ।

८ इतः परं ख. ग. पुस्तकयोः "नहि ब्रह्म विश्वं न भवतीत्युक्तेऽपि विश्वं मिथ्या भवेत्" इत्यधिकम् ।

साध्यं बाध्यमबाध्यं वा[1]? अथवा साधारणम्? पूर्वत्र सिद्धसाधनता । तस्य प्रपञ्चसत्यत्वाविरोधित्वात् । उत्तरत्र किं ब्रह्मस्वरूपमुत ततो भिन्नम्? आद्ये सिद्धसाधनता । ब्रह्मसम्बन्धस्यास्माभिरूरीकरणात्[2] । द्वितीये तेनैव हेतोरनैकान्त्यात् । नापि साधारणमिति तृतीयः पक्षः । बाधितं बाध्यत्वमभ्युपगच्छता मया[3] साधारणाकारस्याप्यङ्गीकारात् । नचेदं जात्युत्तरम् । व्याहत्यभावात् । तथोक्तम्[4]–

"मिथ्यात्वस्य च मिथ्यात्वे मिथ्यात्वं बाधितं भवेत् ।
सत्यत्वस्य च सत्यत्वे सत्यत्वं स्थापितं भवेत्" ( )

इत्यादि ॥ ७ ॥

अष्टमेऽपि[5] किमिदमनिर्वचनीयं नाम? किं निर्वचनानर्हमुत सत्त्वासत्त्वाभ्यां निर्वक्तुमशक्यम्? नाऽद्यः। व्याघातमूकीभावादिप्रसङ्गेनासम्भवित्वात्। द्वितीये प्रत्येकं लक्षणत्वे सदसतोरनिर्वचनीयतापातात् । समुदितस्य तथात्वे सतोऽसतश्च सदसदात्मकत्वाभावेन तत्प्रसङ्गानिस्तारात् । अत्रोक्तं चित्सुखेन –

"प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत् ।
गाहते तदनिर्वाच्यमाहुर्वेदान्तवेदिनः" इति ।

अत्रापि प्रत्येकं लक्षणत्वे सदसतोरनिर्वचनीयतापातात् । ([6]समुदितस्य तथात्वे सतोऽसतश्च सदसदात्मकत्वाभावेन तत्प्रसङ्गानिस्तारात् । सत्त्वैकस्वभावस्य प्रपञ्चस्य सदसत्त्वाद्यनङ्गीकारात् । विशेष्यस्य वैयर्थ्याच्च । नहि सत्त्वासत्त्वे क्वाप्येकत्र स्तः । किञ्च सत्त्वादिभिर्निर्वक्तुमशक्यमनिर्वाच्यं चेत् अतिव्याप्तिरर्थान्तरता च स्यात् । नहि ब्रह्म घटो वा सत्त्वमित्युच्यते । सत्त्वाद्यभावा यत्र

---

१ "किञ्चेदं साध्यं बाध्यत्वं किं बाध्यमुताबाध्यम्?" इति क. ग. पाठः ।
२ "ब्रह्मणः सम्बन्धस्यास्माभिरङ्गीकरणात्" इति क. पाठः ।
३ क. पुस्तके "मया" इति नास्ति ।
४ "तथोक्तम् –'मिथ्यात्वस्य च मिथ्यात्वे'– इत्यादि" इति क. ख. पाठः ।
५ "अष्टमे" इतीयानेव क. ख. पाठः ।
६ ( ) एतच्चिह्नान्तर्गतः पाठः क. ख. पुस्तकयोर्नोपलभ्यत ।

सन्ति तदनिर्वाच्यमिति चेत् भागे सिद्धसाधनता । नहि सत्तायामपरा सत्ताऽस्ति । अन्यथाऽनवस्थापत्तेः । निर्गुणे ब्रह्मण्यसति चातिव्याप्तेः । नहि तत्र त्वप्रत्ययार्थस्त्वत्पक्षे सम्भवति) । यत्सदसद्विलक्षणं तदनिर्वाच्यमिति चेत्, न, व्याहतत्वेनासम्भवित्वात् । तथाहि – सदसच्छब्दावबाध्यमानबाध्यमानार्थावुत प्रामाणिकाप्रामाणिकार्थौ किंवाऽर्थक्रियार्हतदनर्हार्थौ किंवा विद्यमानाविद्यमानार्थौ?[1] अत्र सर्वत्र व्याहतिरपसिद्धान्तोऽर्थान्तरता च कथं न स्यात्? नहि बाध्यं च न भवति, अबाध्यं च न भवतीत्युक्ते न व्याहतिः। एवं सर्वत्रोहनीयम् । ब्रह्मणो विलक्षणं तुच्छादपीत्यभिप्रायश्चेत्, तर्हि सिद्धसाधनता । अबाध्याद्विलक्षणं तुच्छादपि विलक्षणमित्यभिप्रायश्चेत् न, अबाध्यादबाध्यान्तरस्य वैलक्षण्याङ्गीकारात् । अबाधितं च न भवति निरुपाख्यं च न भवतीत्याकूतमिति चेत्, तर्हि बाध्यत्वमेव प्रतिज्ञातं स्यात् । तच्चापाकृतमित्यलं विडम्बेन[2] ।। ८ ।।

नापि नवमः । स्वात्यन्ताभावसमानाधिकरणत्वस्य व्याहतत्वात् । (प्रदेशभेदाङ्गीकारे चार्थान्तरत्वात्[3] ।) ।। ९ ।। नापि तथा प्रतीयमानत्वमिति दशमः पक्षः । असत्त्वापातात् । किञ्च प्रामाणिकात्यन्ताभावोऽत्र विवक्षितः किमप्रामाणिकात्यन्ताभावः? नाऽद्यः । अभावानां सत्यत्वे तैरेव द्वैतवादिनां विजयापत्तेः । तथाचोक्तम्[4] –

---

१ "उत भावाभावार्थौ" इत्यधिकं ख. ग. पुस्तकयोः ।

२ तथाहि प्राचां वचनम् – "निर्वक्तुमसामर्थ्ये गुरव उपास्यन्ताम्, येभ्यो निरुक्तयः शिक्ष्यन्ते" इति । अनिर्वचनीयत्वं दुर्निरूपमिति खण्डनकारेण मुखत एवाङ्गीकृतम् । तथाच खण्डनखण्डखाद्ये प्रथमपरिच्छेदे वचनम् – "वस्तुतस्तु वयं प्रपञ्चसत्यत्वव्यवस्थापनविनिवृत्ताः स्वतःसिद्धे चिदात्मनि ब्रह्मतत्वे केवलं भरमवलम्ब्य चरितार्थाः सुखमास्महे ।" अनिर्वचनीयतासाधने न भरः । किन्तु प्रपञ्चसत्यत्वव्यवस्थापनविनिवृत्तिरेव फलमिति हि भणितं भवति । किमतोऽप्यधिकं भणितव्यम्?

३ ( ) एतदन्तर्गतः पाठः क. ख. पुस्तकयोर्न दृश्यते ।

४ "तथोक्तम्" इति क. ख. पाठः ।

"अभावा यद्यबाध्याः स्युस्तद्भेदा अप्यबाधिताः ।
तत्प्रमाणान्यबाध्यानि जितं तद्भेदवादिभिः ।
अभावाद्भेद[1] इष्टश्चेद्भावादपि तथेष्यताम् ।
दूषणं भूषणं यस्मात्समं चात्र समा श्रुतिः[2]" इति [3]।

न द्वितीयः । रजते सीसभ्रमे तन्न रजतमिति रजते रजतत्वप्रतिषेधे प्रातिभासिकात्यन्ताभावप्रतियोगिनोऽपि रजतस्यामिथ्यात्वेनार्थान्तरतापातात् ।। १० ।। नाप्येकादशः । उक्तपक्षाबहिर्भावात् । किञ्च –

साध्यं ते यदि सत्यं स्याज्जयः स्यात् सत्यवादिनाम् ।
साध्यं ते यद्यसत्यं स्याज्जयः स्यात् सत्यवादिनाम् ।

इत्यलं प्रतिज्ञाखण्डनेन ।। ११ ।। * ।।

दृश्यत्वहेतुभङ्गः

अथ किमिदं दृश्यत्वं नाम? किं चाक्षुषत्वम्, किंवा चिद्रूपदृग्विषयत्वम्, उत वृत्तिरूपदृग्विषयत्वम्, किं वृत्तिजन्यफलाश्रयत्वम्, किं ज्ञेयतामात्रम्, उतास्वप्रकाशत्वम्? नाऽद्यः । भागासिद्धेः ।। १ ।। न द्वितीयः । अन्यतरभागासिद्धेः । चिद्रूपदृग्विषयत्वस्यास्माभिर्घटादावप्यनङ्गीकारात् ।। २ ।। न तृतीयः । आत्मन्यनैकान्त्यात् । आत्मनोऽपि वेदान्तजनितवृत्तिविषयत्वात् ।। ३ ।। चतुर्थे फलं ज्ञातता व्यवहारो वा? नाऽद्यः । घटादावपि तदभावादसिद्धेः[4] । द्वितीये पुनरनैकान्त्यमेव । आत्मनोऽपि वेदान्तजनितवृत्तिव्यवहारविषयत्वात् । आत्मा

---

१ "अभावभेदः" इति ग. पाठः ।

२ श्रुतिर्हि सर्वस्य ब्रह्मतामभिधत्ते । नहि तत्र केवलं भावपदार्थस्य नत्वभावस्येति विभागः । यद्यभावाद्भेद इष्यते तर्हि भावरूपादपि जगतो भेद इष्यताम् । श्रुतिस्तु भावाभावयोरुभयोरपि समाना न क्वापि विशेषपक्षपातिनीति ।

३ ख. पाठे "इति"पदं नास्ति ।

४ भट्टनये भणितायाः ज्ञातताया अङ्गीकार्यत्वे नहि राज्ञामाज्ञाऽस्ति ।

न पराधीनप्रकाश इति चेत्, हन्तैतद्वृत्तिविषयो नवा? आद्ये दृश्यत्वापत्तिः । मूकोऽहमितिवत्स्वक्रियाविरोधश्च । द्वितीये व्यतिरेकासिद्ध्या सन्दिग्धानैकान्त्यं[1] स्यात् । किञ्च ब्रह्मणो दृश्यत्वं नास्तीत्यत्र ब्रह्मशब्दः कस्यचिद्बोधको नवा? द्वितीये नैरर्थ्यप्रसङ्गः[2] । आद्येऽप्यब्रह्मबोधक उत ब्रह्मबोधकः? नाऽद्यः । अब्रह्मणस्तेनाभिधाने तस्यैव दृश्यत्वनिषेधः स्यात् । ततश्च प्रपञ्चेऽसिद्धो हेतुः । न द्वितीयः । ब्रह्मणो दृश्यत्वस्य दुस्त्यजत्वात् । लक्षणयाऽपि शब्दजन्यवृत्तिविषयत्वे दृश्यत्वस्यावर्जनीयत्वात् । अविद्यानिवृत्तावनैकान्त्यं स्यात् । एवमसतोऽपि ज्ञानविषयत्वं द्रष्टव्यम् । ("अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि"[3] (श्लो. वा.) इत्युक्तेः[4] ।) ॥ ४ ॥ अत एव न पञ्चमः ॥ ५ ॥ षष्ठे स्वप्रकाशत्वं च वक्तव्यम्, यदभावो दृश्यत्वम् । अवेद्यत्वमिति चेत्, तर्हि वेद्यत्वं दृश्यत्वमित्युक्तं स्यात् । तथाच पूर्वोक्तदोषापातः । स्वव्यवहारे स्वातिरेकिदर्शनानपेक्षत्वं स्वप्रकाशत्वम्, तदभावो दृश्यत्वमिति चेत्,[5] तर्ह्यात्मनोऽप्यद्वितीयत्वादिस्वव्यवहारे संविदन्तरापेक्षासद्भावात् व्यभिचारः स्यात् । निर्विकल्पकस्वव्यवहारे संविदन्तरानपेक्ष आत्मेति चेत्, तर्हि घटोऽपि तथैवेत्यसिद्धिः स्यात् । घटे निर्विकल्पकव्यवहार एव नास्ति चेत्,[6] तर्ह्यात्मन्यपि

---

१ "अनैकान्त्यं स्यात्" इतीयानेव क. पाठः ।

२ "नैरर्थक्यप्रसङ्ग" इति ख. ग. पाठः ।

३ इत्थं हि चोदनासूत्रे श्लोकवार्तिकम्–

"अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि ।
अबाधात्तु प्रमामत्र स्वतः प्रामाण्यनिश्चलाम् ।"

क्वचित्तु "अत्यन्तासत्यपि ह्यर्थे ज्ञानं" इति पठितम् ।

४ ( ) नायं भागः क. पाठे दृश्यते ।

५ स्वव्यवहारे स्वातिरेकिसंविदन्तरापेक्षानियतिर्दृश्यत्वमिति प्रमाणमालानुसारेणेदमुदितम् ।

६ "नास्तीति चेत्" इति क. पाठः ।

स सम्मतो नास्तीति[1] । अवेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वं स्वप्रकाशत्वम्, तदभावो दृश्यत्वमिति चेत्, किं विशेषणाभावेनोत विशेष्याभावेनाथोभयाभावेन दृश्यत्वं निर्वक्तव्यम्? आद्येऽवेद्यत्वाभावो वेद्यत्वमेव । तत्र चोक्तो दोषः । द्वितीयेऽसिद्धिः । तृतीये पुनरनैकान्त्यं विशेष्यासिद्धिश्चेत्यलं विस्तरेण ।। ६ ।।

दृग्दृश्यसम्बन्धनिरूपणम्

ननु दृग्दृश्ययोः सम्बन्धानुपपत्त्या विश्वस्य मिथ्यात्वमवश्यमास्थेयम् । तथाहि – दृग्दृश्ययोः कः सम्बन्धः? न तावत्संयोगः । द्रव्ययोरेव हि संयोगः । दृष्टेश्चाद्रव्यत्वात् । तत्त्वाभ्युपगमेऽपि गुणादिभिस्तस्यानुपपत्तेः । नापि समवायः। दर्शनस्याऽत्मैकगुणत्वेन घटादिना तदयोगात् । नचार्था ज्ञानसमवेताः[2] । बाह्यत्वात् । अतद्गुणतयैव प्रतीयमानत्वाच्च[3] । तादात्म्यमपि विरुद्धरूपयो[4]र्जडाजडयोः कथं स्यात् । नाप्येकान्तःकरणसंक्रमप्रलापः । निर्विकारायाश्चितेः[5] संक्रमाख्यपरिणामायोगात् । नचार्थस्याप्यन्तःकरणे[6] संक्रमः । बहिरेवोपलभ्यमानत्वात् ।

विषयविषयिभावमपि न तत्त्वतो जानीमः[7] । न तावत् ज्ञानजन्यफलाधारत्वं विषयत्वं तज्जनकत्वं च विषयित्वमिति । विकल्पासहत्वात् । तत्फलं ज्ञातता व्यवहारो वा? नाऽद्यः । अतीतादेरविषयत्वप्रसङ्गात् । न द्वितीयः ।

---

१ "तर्हि स आत्मन्यपि सम्मतः" इति ग. पाठः ।

२ "ज्ञाने समवेताः" इति क. ख. पाठः ।

३ "नतद्गुणतयैव" इति क. पाठः । "अतद्गुणत्वेन" इति ख. पाठः।

४ "विरुद्धयोः" इति क. पाठः ।

५ "निर्विकाराया वित्तेः" इति क. पाठः ।

६ "अन्तकरणसंक्रमः" इति क. पाठः ।

७ विस्तृतं चैतत् खण्डनखण्डखाद्ये चतुर्थपरिच्छेदे "ज्ञानीयफलाधारत्वं विषयत्वं तद्वत्त्वं विषयित्वमित्यपि दुष्टम्" इत्यादिना ।

अतदर्थिनो व्यवहारानुत्पत्तावविषयत्वप्रसङ्गात् । (चोरादिज्ञानानन्तरमादीयमानदण्डादेरपि चोरादिज्ञानविषयतापातात्[1] ।) नापि ज्ञानगोचरत्वम् । तस्यैव निरूप्यमाणत्वात् । नापि व्यवहारयोग्यत्वम् । अतिप्रसङ्गात् । योग्यतायां तदभ्युपगमेऽनवस्था । तदनभ्युपगमे तस्याविषयत्वप्रसङ्गात् । यत्सन्निकृष्टेन करणेन[2] यद्विज्ञानं जन्यते स तस्य विषय इति चेत्, न, रूपादिज्ञानस्याऽकाशादिविषयतापातात् । ईशनित्य[3]ज्ञानस्य निर्विषयतापाताच्च । यस्यां संविदि योऽर्थोऽवभासते स तस्या विषय[4] इति चेत्, न, भासमानताया एवाद्याप्यनिरूपणात् । नच ज्ञानकर्मत्वं विषयत्वम् । अतीतादिज्ञानस्येश्वरज्ञानस्य च कर्मकारकाजन्यत्वेनाविषयत्वप्रसङ्गात् । नाप्यस्य द्रव्याद्यन्तर्भाव:[5] सुवच: । बहिर्भावे त्वभावत्वप्रसङ्ग: । सर्वथाऽप्यतीतानागतयो: सम्बन्धस्य दुर्निरूपत्वम् । नहि निराधार: सम्बन्ध: सम्भवमर्हति[6] । किञ्च विषयविषयिभाव: सम्बन्धो द्विष्ठ एकनिष्ठो वा? नाऽद्य: । द्वयोरपि विषयत्वविषयित्वप्रसङ्गात् । न द्वितीय: । सम्बन्धरूपताव्याघातात् । तदेवं विषयविषयिभावानिरूपणात्, आत्मन्यध्यस्ततया च सिद्धौ,[7] प्रपञ्चसत्यत्वे दृश्यत्वानुपपत्तिर्बाधिकेति ।

तदेतदयुक्तम्[8] । व्याहते:[9] । तथाहि – दृग्दृश्ययो: सम्बन्धो नास्तीत्यनेन किं बोध्यते? सम्बन्धाभाव इति चेत्, हन्तात्रैव बोधने सम्बन्धोऽङ्गीकृतो नवा?

---

१ ( ) एतदन्तर्गत: पाठ: क. पुस्तके नास्ति ।

२ 'यत्सन्निकृष्टकरणन" इति क. पाठ: ।

३ "ईशज्ञानस्य" इति क. पाठ: ।

४ शालिकनाथोक्तं विषयलक्षणमिदं खण्डनखण्डखाद्येऽपि प्रस्तुतम् – "अथोच्यते य एवार्थो यस्यां संविदि भासते" इत्यादिना ।

५ "द्रव्यान्तर्भाव:" इति क. ख. पाठ: ।

६ "सम्भवति" इति ख. पाठ: ।

७ विनैव सत्यतां प्रपञ्चव्यवहारसिद्धावित्यर्थ: ।

८ एतावताऽनूदितं विकल्पजालमुत्तरग्रन्थेन निरस्यति — तदेतदिति ।

९ "तदयुक्तं व्याहते:" इति ख. पाठ: ।

आद्ये स्वव्याहतिः । द्वितीयेऽतिप्रसङ्गान्न तावद्बोधनं[1] स्यात् । अथ नायमपि सम्बन्धः सत्यः, तदा वक्तव्यम् । एतद्वृत्तिविषयो मिथ्या सत्यो वेति वक्तव्यम् । आद्ये न नो हानिः । सम्बन्धाभावस्यालीकत्वे सम्बन्धसत्यत्वावगतेः । द्वितीये तद्वदेव प्रपञ्चसत्यत्वाविघातः[2] स्यात् ।

किञ्च किमत्र दृग्दृश्ययोः सम्बन्धानुपपत्त्या तदर्थं दृश्यमिथ्यात्वकल्पनमित्यर्थापत्तिविवक्षा? किंवा सम्बन्धाभावात् सम्बन्धिनोऽप्यभाव इत्यनुमानेन साधनम्? अथ दृश्यसत्यत्वे तस्य संवेदनाभावप्रसङ्ग इति प्रपञ्चमिथ्यात्वानुमानादेरनुग्राहकतर्कविवक्षा?

नाऽद्यः । अन्यथैवोपपत्तेः । अनुपपद्यमानदर्शनादुपपादके बुद्धिः खल्वर्थापत्तिः । तस्याः सामग्री – आक्षेप्यस्योपपादकत्वं प्रमाणाविरुद्धत्वं च, आक्षेपकस्यानुपपद्यमानत्वं प्रमितत्वं चेति । अत एव, अन्यथाऽप्युपपत्तिरन्यथैवोपपत्तिः प्रमाणविरुद्धत्वमप्रमितत्वमनुपपत्त्यभावश्चेत्यर्थापत्तिदूषणानि । अत्र चाऽक्षेप्यस्योपपादकत्वाभावः । नहि दृग्दृश्यसम्बन्धस्योपपादकं दृश्यमिथ्यात्वम्, अपितु प्रतिक्षेपकमेव । "विश्वं सत्यम्" (ऋ. २.७.३.) इत्यादिश्रुतिविरुद्धं चाऽक्षेप्यम् । नाप्याक्षेपकस्यानुपपद्यमानत्वम्[3] । सम्बन्धस्य कार्यान्वयव्यतिरेकसिद्धत्वात् । अन्यथाऽतिप्रसङ्गात् । त्वयाऽपि तत्त्वावेदकवेदान्तजनितज्ञानस्य ब्रह्मविषयत्वाङ्गीकारात् व्याघातश्च दुष्परिहरः स्यात् ।

तथाऽपि कोऽसौ सम्बन्ध इति चेत्, कोऽसाविति किं तत्र प्रमाणं पृच्छ्यते, किं संज्ञाविशेषः, उत स्वरूपविशेषः, यद्वा लक्षणम्, किंवा संयोगादिषु कुत्रान्तर्भाव इति? नाऽद्यः । नियतव्यवहाररूपकार्यान्वयव्यतिरेकसिद्धत्वात् । द्वितीये तमन्तरेणापि सामान्यतयैव व्यवहारसिद्धौ[4] किं तद्विशेषविचारक्लेशेन? विषय-

---

१ "तद्बोधनं" इति ख. पाठः । "तद्बोधः" इति च पाठः ।

२ "सत्यताऽविघातः" इति ख. पाठः ।

३ "अनुपपन्नत्वम्" इति ख. पाठः ।

४ "सिद्धेः" इति क. ख. पाठः ।

विषयिभाव एव विशेषनाम निर्दिश्यताम् । सङ्केत्यतां वा यथारुचि नामान्तरम् । तृतीये स एव सः । (न त्वसः[1] ।) अन्यथा व्याघातात् । चतुर्थे लक्षणमन्तरेणापीक्षुक्षीररसवैषम्यवत्[2] स्फुटप्रतीतिसिद्धस्य दुरपह्नवत्वात् । पञ्चमे न कुत्रचिदिति । क्वचिदन्तर्भावदर्शने तत्रैव वा कथ्यताम् । सन्ति चैकशतं षष्ठ्यर्थाः । यथोक्तं महाभाष्ये –"षष्ठी स्थानेयोगा" (पा. सू. १.१.४९.), "नियमार्थोऽयमारम्भः । एकशतं षष्ठ्यर्थाः सन्ति । एते सर्वे षष्ठ्यामुच्चारितायां प्राप्नुवन्ति" इति ।

एवं लोकवेदप्रसिद्धाः सम्बन्धाः सन्ति । अन्यथा 'पितुर्धनं पुत्रो गृह्णीयात्' इत्यादिसर्वव्यवहारलोपप्रसङ्गात् । नच ते द्विष्ठाः । नापि विद्यमानयोरेव नियत्या व्यवहर्तव्याः । निरूप्यनिरूपकभावेन च सम्बन्धः । निरूपकत्वं च सत इव कदाचिदसतोऽप्यस्त्येव । 'गुरूणां टीका', 'कुरूणां क्षेत्रम्' इत्यादिप्रयोगात् । नाप्यपारमार्थिकाः । बाधकाभावात्[3] । तादृश एव विषयविषयिभावः सम्बन्धोऽस्तु ।

कथं च मिथ्यात्वे प्रपञ्चस्य दृश्यत्वम्? गगन इव गन्धर्वनगरस्य दृशि[4] प्रपञ्चस्याऽरोपितत्वादिति चेत् तर्हि सर्वेण सर्वं दृश्येत, नवा केनापि किञ्चित् । इन्द्रियसन्निकर्षादिकं नियामकमिति चेत्, तर्हि किमनेनाऽरोपितत्वेन? सत्यत्वेऽपि करणसम्बन्धनिबन्धनो विषयविषयिभाव एवास्तु दृग्दृश्ययोः सम्बन्धः । विषयस्य लक्षणं च शास्त्रे कथितम् –

"नियत्या भेदको यस्तु ज्ञानस्य विषयः स हि ।
ज्ञानस्य कर्म वा तच्च न क्रियोत्पादकं मतम् ।

---

१ ( ) एतच्चिह्नान्तर्गतः पाठः क. पुस्तके नास्ति ।

२ तथाहि शाङ्करीयं वचनम्–

"मधुक्षीरद्राक्षामधुमधुरिमा कैरपि पदैः
विशिष्यानाख्येयो भवति रसनामात्रविषयः ।"

३ "बाधाभावात्" इति ख. पाठः ।

४ "दृश्यप्रपञ्चस्य" इति क. पाठः ।

करणं येन[1] सम्बन्ध्य ज्ञानसाधनतां व्रजेत् ।

स तस्य विषयो यत्तज्ज्ञानत्वं चोपदिश्यते" ( ) इति ।

ज्ञानक्रियाकर्मत्वं च न क्रियोत्पादकस्यैव, नापि सत एवेति नियमोऽस्ति । यथाऽऽह भवनाथः – "क्रियां कुर्वद्धि कारकम् । यथा कर्तृकरणादि क्रियातः पूर्वभावित्वान्मुख्यं कारकम् । कर्मणस्तु क्रियासाध्यत्वान्न कारकत्वम् । किन्तूद्देश्यत्वाकारेणैव कारकत्वव्यपदेशः । अत एवौपचारिकं[2] कारकत्वं बुद्धिस्थत्वसाम्यात्"[3] इति ।

नापि द्वितीयः[4] । सम्बन्धाभावेऽपि[5] सम्बन्धिनोः सत्त्वाविघातात् । अन्यथा दृश्यवद्दृशोऽपि किं मिथ्यात्वं न स्यात्[6]? "अनुभूतिः स्वप्रकाशा, अनुभूतित्वात्, यन्नैवं तन्नैवम्, यथा घटः" इति विवरणोक्तेः स्वप्रकाशत्वात्सत्यत्वमिति चेत्, हन्तानुमानादिविषयत्वे कथं विषयत्वं विघटयसि? अतः सम्बन्धमिथ्यात्वेऽपि न सम्बन्धिमिथ्यात्वे व्याप्तिरस्ति ।

---

१ "केन" इति क. पाठः ।

२ "औपाधिकम्" इति क. पाठः ।

३ "बुद्धिस्थत्वमात्रात्" इति क. ग. पाठः ।

४ सम्बन्धाभावात्सम्बन्धिनोऽप्यभाव इत्यनुमानमिति पूर्वं (२१ तमे पत्रे) विकल्पितो द्वितीयः पक्ष इत्यर्थः ।

५ सम्बन्धाभावेऽपि यथैकसम्बन्धिन्या दृशः सत्यत्वं तथाऽपरसम्बन्धिनोऽपि किमिति न सत्यत्वं स्यात्? किमपराद्धं दृश्येन? किञ्च पुण्यं चीर्णं दृशा?

६ नचाभ्युपगमसम्भवः । दृशः सत्त्वोरीकरणमेव केवलं तथागतसमयादद्वैतिनां विशेष इति खण्डनकृता साभिमानमाघोषणात् । तथाह्याह खण्डखाद्ये प्रथमपरिच्छेदे श्रीहर्षः – "एवञ्च सति सौगतब्रह्मवादिनोरयं विशेषः यदादिमः सर्वमेवानिर्वचनीयं वर्णयति । विज्ञानव्यतिरिक्तं पुनरिदं विश्वं सदसद्भ्यां विलक्षणं ब्रह्मवादिनः सङ्गिरन्ते" इति ।

"ज्ञेयेन ज्ञानस्य निरूपणात् ज्ञानेन ज्ञेयस्य निरूपणात् नैकमपि परमार्थम्" इति ह स्माऽह तथागतमनोगतं विवृण्वन् विद्यासागरः ।

नापि तृतीयः । असत्यत्वपक्षेऽपि सम्बन्धानुपपत्तिप्रसङ्गेन प्रतितर्क-पराहतत्वात् । अनुभूतेः सत्यत्वेऽपि यथाऽनुमानविषयता, ब्रह्मणः सत्यत्वेऽपि यथा श्रुतिगम्यता तथा प्रपञ्चस्य सत्यत्वेऽपि दृश्यत्वं स्यात्; ब्रह्मवदेव । किञ्चात्र कथमापादनम्? यदि विश्वं सत्यं स्यात् तदा सम्बन्धानुपपत्तिः स्यादिति चेत्, तद्दूर्युपपद्यते च सम्बन्ध इति विपर्यये पर्यवसानं स्यात् । आरोपितः सम्बन्धो दृश्यसत्यत्वे न स्यादिति चेत्, तर्ह्यनारोपितः सम्बन्ध इत्यङ्गीक्रियताम् । यदि विश्वं सत्यं स्यात् तर्हि तज्ज्ञानज्ञेयसम्बन्धोऽपि सत्यः स्यादिति चेत्, न, इष्टत्वात् । वेदान्तज्ञानज्ञेयसम्बन्धस्यालीकत्वेऽपि विषयस्य सत्यत्वाभ्युपगमाच्च । विस्तृतं चैतत् खण्डनखण्डन इत्यलं विस्तरेण ॥ ॥

सदसद्वैलक्षण्यभङ्गः

विमतं सदसद्विलक्षणं ज्ञानबाध्यत्वात्, शुक्तिरजतवत्, इति साधनम-स्त्विति चेत्, न, प्रतिज्ञाव्याहतेः । सन्न भवतीत्युक्तेऽसदेव लब्धम् । इह पुनरसन्न भवतीत्यभिधाने कथं न व्याहतिः स्यात्? नचैतत्साधनार्हम् –

"सम्भावितः प्रतिज्ञाया अर्थः साध्येत हेतुना ।
न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो मृतः" इति न्यायात् ।

तृतीयप्रकाराङ्गीकारिणां न व्याहतिरिति चेत्, न, एतत्प्रतिज्ञासिद्धौ तृतीय-प्रकारसिद्धिस्तत्सिद्धौ च व्याहत्यभावात्प्रतिज्ञासिद्धिरिति परस्पराश्रयापत्तेः । अप्रसिद्धविशेषणता च स्यात् । नहि सत्त्वेन चासत्त्वेन चानिरूप्यं प्रसिद्धं सम्मत-मस्ति ॥ ॥

यदुक्तं चित्सुखेन – "सत्त्वासत्त्वे एकधर्मिनिष्ठात्यन्ताभावप्रतियोगिनी धर्मत्वात् रूपरसवत्" इति । तदसत् । अभिधेयत्वादिना व्यभिचारात् । तस्यापि किञ्चिन्निष्ठात्यन्ताभावप्रतियोगित्वसाधने तदादिशब्दाभिधेयत्वात्[1] व्याघातः स्यात् । अविरुद्धत्वं चोपाधिः । नच रूपरसयोः प्रतिषेध्यप्रतिषेधक-रूपो विरोधोऽस्ति ।

---

१ अयं भावः — यत्राभिधेयत्वस्याभावः साध्यते तस्य किल पक्षतया

किञ्चात्र साध्यमभिमतम्? सदसद्वैलक्षण्यमिति चेत् मैवं वोचः । प्रपञ्चस्यास्माभिरसद्वैलक्षण्याङ्गीकारात् सिद्धसाधनतापातात् । सद्वैलक्षण्येन सहासद्वैलक्षण्यं मयाऽत्र साध्यते, अतः कथं[1] सिद्धसाधनमिति चेत्, न, दोषापरिहारात् । नहि सिद्धमसिद्धेन सहोच्यमानमसिद्धं भवति । सद्वैलक्षण्यविशिष्टासद्वैलक्षण्यसाधनाददोष इति चेत्, न, तथाऽपि सिद्धसाधनत्वात् । सतोऽपि सदन्तरवैलक्षण्याङ्गीकारात् । सदसद्वैलक्षण्यं नाम सदसत्त्वानाधारत्वमिति चेत्, तथाऽपि सिद्धसाधनताऽनिस्तारः । सत्त्वैकस्वभावस्य प्रपञ्चस्य सदसत्त्वानङ्गीकारात् । सत्त्वानधिकरणत्वमसत्त्वानधिकरणत्वं च साध्यत इति चेत्, न, असत्त्वानधिकरणत्वसाधनवैयर्थ्यात् । सत्त्वानधिकरणत्वसाधने प्रत्यक्षबाधश्च । नहि सत्त्वं नामैकमनुगतमावयोर्मतम् । किन्तु प्रतिवस्तु भिन्नम् । अत्र[2] वियदादेः सत्त्वानधिकरणत्वं साध्यमानं किं एकसत्त्वानधिकरणत्वम्, उतानेकसत्त्वानधिकरणत्वम्, आहोस्विदखिलसत्त्वानधिकरणत्वम्, किंवाऽविशेषितसत्त्वानधिकरणत्वम्, किंवा सर्वथा सत्त्वानधिकरणत्वं[3] विवक्षितम्? नाऽद्यः । सतोऽपि सत्त्वान्तरानधिकरणत्वात्सिद्धसाधनतापत्तेः । अनेकसत्त्वापत्त्याऽनर्थाच्च । न द्वितीयतृतीयौ । एकस्यैवानेकसर्वसत्त्वास्वीकारात् । न चतुर्थः। ब्रह्मगतसत्त्वानधिकरणतयाऽपि प्रतिज्ञातार्थोपपत्तेरर्थान्तरत्वात् । न पञ्चमः । उपजीव्यप्रत्यक्षागमबाधात् ।

किञ्च सदिति त्वया किमुच्यते? किं सज्जातिः, ब्रह्मस्वरूपं वा, अर्थक्रियाकारि वा, व्यावहारिकं वा, अय तुच्छेतरत्, किं प्रातिभासिकेतरत्, किं प्रामाणिकम्, अबाध्यं वा? आद्ये सज्जात्यङ्गीकारे सद्बहुत्वमङ्गीकरणीयं

निर्देशः करणीयः । अन्यथा मूकवदसाधनमेव स्यात् । तथाच येन वा पदेन पक्षो निर्दिश्येत, तत्पदाभिधेयत्वं तस्य को निवारयिता? यच्च साध्यते, यदपि च साधनम्, तदपि किमपदेन ताण्डवं क्रियते?

१ "कथमत्र" इति ग. पाठः ।

२ "तत्र" इति क. ख. पाठः ।

३ "किंवा सत्त्वमात्रानधिकरणत्वम्" इति क. पाठः ।

स्यात् । अन्यथा तल्लक्षणं व्याहन्यते । सिद्धसाधनतापाताच्च । किञ्च सत्ता-विधुरस्यापि ब्रह्मणो यथा नासत्त्वादि तथा प्रपञ्चस्यापि स्यात् । जातिजाति-मद्वैलक्षण्यसाधने चार्थान्तरताद्यापत्तेः । न द्वितीयः । ब्रह्मवैलक्षण्यं हि तद्विपरीत-लक्षणयोगो वा तल्लक्षणराहित्यं वा तत्तादात्म्याभावो वा । तस्य सर्वस्य जगत्यस्माभिरङ्गीकारात् । न तृतीयचतुर्थौ । बाधापसिद्धान्ताद्यापत्तेः । अत एव न पञ्चमषष्ठौ । न सप्तमः । त्वयाऽपि प्रत्यक्षानुमानागमविषयत्वाङ्गीकारा-द्व्याहतेः । अद्वैतवादिनाऽपि किञ्चित्प्रमाणमङ्गीकृतं नवा? नेतिपक्षे नेष्टसिद्धिः । आद्ये तद्वेद्यं स्वप्रकाशं ब्रह्म, उतान्यत्? आद्ये स्वप्रकाशत्वव्याघातः । द्वितीये पुनर्व्याहतिः । तदन्यस्य प्रमाणगम्यत्वाभ्युपगमात् । नाप्यष्टमः । अबाध्यत्वा-भावो बाध्यत्वमेव । तच्च निरस्तं प्रागेव । किञ्च तव ब्रह्मैवाबाध्यम् । तद्वैलक्षण्यं सिद्धमेव जगतः । मम मतेऽप्यबाध्यस्याप्यबाध्यान्तरवैलक्षण्यमस्त्येव । अतः सिद्धसाधनता दुर्वारा स्यादित्यलं साध्यविडम्बनेन ॥ * ॥

दृष्टान्तभङ्गः

दृष्टान्तश्च साध्यविकलः । अत्राऽहुश्चित्सुखादयः—"न तावदिदं रजत-मत्यन्तासत् । असतः ख्यात्ययोगात् । अस्य च ख्यायमानत्वात् । नापि सत् । सतो बाधायोगात् । अस्य च बाध्यमानत्वात् । अतः ख्यायमानत्वाद्बाध्यमान-त्वाच्च शुक्तिरजतादेः सिद्धं सदसद्वैलक्षण्यम्" इति । एतदतीव मन्दम् । तथाहि—बाध्यमानत्वात्सन्न भवतीत्यत्र किं सदिति विवक्षितम्? किं[1] ब्रह्मस्वरूपम्, उताबाध्यम्, अथ सत्तायुक्तम्, अथ व्यावहारिकम्, किंवाऽर्थक्रियाकारि, भावरूपं[2] वा, प्रत्यक्षादिप्रमाणविषयो वा? नाऽद्यः । सिद्धसाधनत्वादर्थान्तर-त्वाच्च । न द्वितीयः । यदबाध्यं तदबाध्यमिति साध्याविशिष्टतापातात् । न

---

१ "किं" इति ख. पुस्तके नास्ति ।

२ "भावस्वरूपम्" इति ग. पाठः ।

तृतीयः । सत्तायुक्तस्यापि प्रपञ्चस्य भवन्मते बाध्यतया यत्सत्तदबाध्यमिति व्याप्त्यसिद्धेः । अत एव नेतरे पक्षाः ।

असन्न प्रतीयत इति व्याप्त्यभावश्च । तथाहि – असतः प्रतीतिं निषेधताऽसत्प्रतीतं नवा?[1] आद्ये स्वक्रियाविरोधः । द्वितीये न तन्निषेधो युज्यते । नन्वपरोक्षभानस्येह विवक्षितत्वात्, असत्त्वेन भानस्य परोक्षभानस्य चानिराकरणात्, नायं पर्यनुयोगः । तस्मादसतः सत्त्वेनापरोक्षतया प्रतीतिर्नास्तीति व्याप्तिरस्त्येवेति चेत्, न, हेत्वन्तरनिग्रहापत्तेः । अपिच किमसतः सत्त्वेनापरोक्षतया प्रतीतिरभ्रान्तौ नास्ति, किं भ्रान्तावपि? नाऽद्यः । प्रकृतानुपयोगात् । न द्वितीयः । व्याप्त्यभावात् । अन्यथाख्यातिवादिभिरसत एव तादात्म्यस्य, विज्ञानख्यातिवादिभिरसत्या एव बाह्यतायाः, असत्ख्यातिवादिभिरसत एव रजतस्य प्रतीत्यङ्गीकारात् । सत एव प्रतीतिरिति पक्षे न भ्रान्तिर्नापि बाधः । नहि भ्रान्तावप्यसन्न प्रतीयत इति मनुवचनं कुलधर्मो वाऽस्ति ।

परेणापीदंरजतयो[2]स्तादात्म्यावभासोऽङ्गीक्रियत एव । यथोक्तम् – "अध्यासो नामातस्मिंस्तदिति प्रत्ययः"[3] इति । अत्र शुक्तिकेदमंशस्य रजतत्वसंसर्गे रजतस्येदन्तासंसर्गो हि तावदसन्नेव प्रतीयते। अतोऽत्र व्याप्त्यभावान्नानेनासत्त्वासिद्धिः । सर्वेषां मते त्वयोग्ये रजते वलयकरणादियोग्यता तावदसत्येव प्रतीयते । तव मतेऽपि प्रातिभासिकं किं प्रातिभासिकतया प्रतीयते, किं व्यावहारिकतया? नाऽद्यः । प्रवृत्त्यभावप्रसङ्गात् । नहि प्रातिभासिकमर्थक्रियासूपयुज्यमानं क्वचिदनेनोपलब्धम् । यतस्तथाभावं प्रतीत्यापि प्रवर्तेत । द्वितीये प्रतीयमाना व्यावहारिकता[4] सती, उतासती? आद्ये प्रातिभासिकतानुपपत्तिः ।

---

१ ग. पुस्तके त्वेवं पाठः – "असत्प्रतीतं नवा? नेति पक्षे न तन्निषेधो युज्यते । आद्ये पुनर्व्याप्त्यभावः । नन्वपरोक्षभानस्य –" इत्यादि ।

२ "इदन्त्वरजतत्वयोः" इति क. पाठः ।

३ अध्यासभाष्ये सम्प्रति परिदृश्यमानाऽऽनुपूर्वी – "अध्यासो नाम अतस्मिंस्तद्बुद्धिः" इति ।

४ "प्रतीयमानव्यावहारिकता" इति क. पाठः ।

द्वितीये त्वसतोऽपि सत्त्वेन चापरोक्षतया प्रतीतिप्रसक्तिः[1] । विवृतं चैतत् खण्डन-खण्डने । तस्मादसन्न प्रतीयत इति बालभाषितमिति स्थितम् ।। * ।।

साधनशून्यं च निदर्शनम् । ननु सर्वैः शुक्तिरजतादेर्बाधस्तावदङ्गीकृत एव[2] । हन्त तत्रैव निश्चीयतां को बाध इति । केचिदाहुः – "अधिष्ठानया-थात्म्यज्ञानेन सविलासाऽविद्या विनश्यति । यावन्ति ज्ञानानि तावन्तोऽविद्याः" इति। तन्मतनीत्या[3] ज्ञानेन विनाशो वा बाधः? अन्ये तु–एकैवाविद्या, तदवस्था-विशेषा एव रजताद्युपादानानि भवन्तीति[4] मन्वाना अधिष्ठानतत्त्वज्ञानेन सह कार्यैरविद्या तिरोधत्त इत्याहुः । तन्मतनीत्या[5] ज्ञानेन निवृत्तिर्वा बाधः? अपरे त्वाहुः – "प्रतिपन्नोपाधौ नासीन्नास्ति न भविष्यतीति[6] कालत्रयसत्ता-निषेधो बाधः । तद्विषयत्वं रजतस्य बाध्यत्वं" इति[7] । तन्नीत्या कालत्रयसत्ता-निषेध्यत्वं बाध्यत्वं वा?

नाऽद्यः । असतो नाश्यत्वायोगात् । तथाहि – न तावत् शुक्यादि बाध्यम्[8] । तस्य बाधानन्तरमपि वर्तमानत्वात् । अथ रजतादिरिति चेत्, न, तस्यासत्त्वात् । शुक्तिरजतं न नाश्यम्, असत्त्वात्, वन्ध्यापुत्रवदिति प्रयोगात् ।

---

१ "प्रतीतिप्रसङ्ग" इति ग. पाठः ।

२ "अङ्गीक्रियत एव" इति ग. पाठः ।

३ "रीत्या" इति ग. पाठः ।

४ "उपादानीभवन्तीति" इति ख. पाठः ।

५ "रीत्या" इति क. ग. पाठः ।

६ "नास्ति नासीन्न भविष्यति" इति ख. पाठः ।

७ अत्रोत्तरं पक्षद्वयं विवरणेऽपि विवृतम् — "अज्ञानस्य स्वकार्येण वर्तमानेन प्रविलीनेन वा सह ज्ञानेन निवृत्तिर्बाधः" इति "प्रतिपन्नोपाधावभाव-प्रतियोगित्वलक्षणस्य मिथ्यात्वस्य" इति च तद्वचनात् । उक्तं हि सुरेश्वराचार्ये-णापि – "अविद्या सह कार्येण नासीदस्ति भविष्यति" इति ।

८ "शुक्त्यादेर्बाध्यत्वम्" इति ख. ग. पाठः ।

न द्वितीयः । तस्याप्रवृत्तत्वात् । निवृत्तिर्हि तिरोधानादिरूपाऽऽविर्भावादिमतो भवेत् । सद्धर्मश्चाऽऽविर्भावः । नचासावसतः सम्भवति ।

नापि तृतीयः । पुरोवर्तिप्रतिपन्नस्य रजतस्याधिष्ठानज्ञानेन मायायां विलीनायां तत्परिणामितया स्वयमेव विलीयमानस्य नेदं रजतमिति निषेधाविषयत्वाङ्गीकारात् । त्रैकालिकसत्तानिषेधविषयत्वे त्वसत्त्वापत्त्याऽपसिद्धान्तः स्यात्[1] । सत्ताविरहव्यतिरेकेण शशविषाणादेरप्यसत्त्वस्यानिरूपणात् । नापि शुक्तिरियमिति विरोधिभावान्तरज्ञानं बाधः । ब्रह्मण्यपि सम्भवात् । नापि पूर्वप्रसञ्जितान्यथाकारस्य लोडनमिव सम्यग्ज्ञानं बाधः । आत्मनि विपक्षेऽपि गतत्वात्[2] । सत्योऽप्यात्मा[3] देहाद्यात्मतयाऽवगतो वेदान्तजनितसम्यग्ज्ञानविषय इति त्वयाऽप्यङ्गीकारात् । अन्यथाऽविद्याऽनिवृत्तेरिति । नापि प्रपञ्चबाध्यत्वं क्वापि श्रूयत इत्यसिद्धोऽपि हेतुः[4]। एवमन्येऽपि[5] हेतवो निराकरणीया इत्यलं विस्तरेण ॥ * ॥ * ॥

---

१ तदेतदुक्तमनुव्याख्याने भगवत्पादैः –

"बाधाभावात्सत इति व्याप्तिरेषा क्व दृश्यते ।
कश्चायं बाध उद्दिष्टो नहि नाशोऽसतो भवेत् ।
निवृत्तिश्चाप्रवृत्तस्य कथमेवोपपद्यते ।
नासीदस्ति भविष्यच्च तदिति ज्ञानमेयता ।
यदि बाधस्तदाऽसत्त्वं तेनैवाङ्गीकृतं पुनः ।" (२. ३. ४९-५१)

२ "भावात्" इति ग. पाठः ।

३ "सन्नप्यात्मा" इति क. ख. पाठः ।

४ "इत्यसिद्धो हेतुः" इति ख. ग. पाठः ।

५ "एवमपरेऽपि" इति ग. पाठः । प्रकृत एवानुमाने जडत्वं परिच्छिन्नत्वमिति हेतुद्वयम्; भेदो मिथ्या भेदत्वात्, अयं पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी पटत्वात्, सर्वाणि शरीराणि देवदत्तस्यैव भोगायतनानि शरीरत्वात्, इत्याद्यनुमानानि च निर्दिष्टेनैव पथा निराकरणीयानीत्यर्थः । नह्येतादृशामाभास-

---

समानयोगक्षेमाणां निरासाय ग्रन्थकृतैव पृथक् प्रयतितव्यम् । अतिदेशेनैव पर्याप्तेः । स्फुटप्रतीयमानदोषत्वात् । अभेदो मिथ्या, अभेदत्वात्, इत्यादि प्रतिवदतो मुखं को मुद्रयितुमीष्टे?

क्वचिन्मूलकोशेष्वन्येऽपि हेतवो मुखतो निराकृता दृश्यन्ते । वादावली-न्यायामृतादिगतं युक्तिजालं पुनरावर्तयत् तन्मूलं सुदीर्घं च महान्तं चापरमेव कञ्चन सम्पाठं पठति । तद्यथा –

"नापि विश्वमिथ्यात्वे जडत्वं हेतुः । प्रोक्तदोषानिस्तारात् । अपिच जडत्वं किमज्ञानत्वम्, उताज्ञातृत्वम्, उत ज्ञानानाश्रयत्वं वा? नाऽद्यः । वृत्तिज्ञाने भागासिद्धत्वात् । आत्मनोऽपि ज्ञानत्वाभावादनैकान्त्याच्च । तथाहि – यदात्म-रूपं ज्ञानमुररीकरोषि तत् सविषयं निर्विषयं वा? सविषयत्वेऽपि स्वविषयं परविषयं वा? नाऽद्यः । एकस्यां क्रियायां कर्तृकर्मत्वयोरेकस्मिन् विरुद्धत्वात् । परसमवेतक्रियाफलशालित्वस्य च कर्मलक्षणत्वात् । विषयविषयिभावस्य च पराक्-प्रत्यग्भावरूपत्वेनैकस्यासम्भवाच्च । न द्वितीयः । तदभावान्मोक्षे ज्ञाना-भावप्रसङ्गात् । नोत्तरः । आत्मा न ज्ञानं ज्ञेयशून्यत्वात्, घटवदित्यनुमानात् । इतरथा घटोऽपि ज्ञानं स्यादित्यसिद्धो हेतुः । न द्वितीयः । आत्मनोऽपि ज्ञातृत्वा-भावात् । अहङ्कारस्य ज्ञातृत्वाङ्गीकाराद् भागासिद्धेश्च । न तृतीयः । असदात्मनोः विपक्षभूतयोश्च वर्तमानत्वात् । तस्मादसमीचीनोऽयं हेतुः ।। * ।। इति जडत्वहेतु-भङ्गः ।। * ।।

"नापि जगन्मिथ्यात्वे परिच्छिन्नत्वहेतुः साधुः । तथाहि देशतः परिच्छिन्नत्वं कालतो वा वस्तुतो वा? नाऽद्यद्वितीयौ । नित्येषु सर्वगतेषु प्रकृतिकालादिष्व-सिद्धेः । तेषामपरिच्छिन्नत्वाभावे ब्रह्मणोऽपि तत् कुतः? श्रुत्यादिकं तूभयत्र समानम् । न तृतीयः । "नेति नेति" इत्यादिना ब्रह्मणोऽपि जगदन्योन्याभावाधि-करणतया श्रुतत्वात् । सोऽपि भेदो मिथ्येति चेत्; तत्किं परमार्थभेदवत्त्वं हेतुः? तथा सति पक्षे तदसिद्धिः स्यात् । अस्मद्रीत्या विरुद्धः स्यादिति ।। * ।। परि-च्छिन्नत्वहेतुभङ्गः ।। * ।।

"नापि विमतं मिथ्या, अनात्मत्वात्, संमतवदिति साधीयोऽनुमानम् । तथाहि – किमिदमात्मत्वं यदभावोऽनात्मत्वम्? किमात्मत्वं जातिः, उत सत्त्वम्, किमजडत्वम्, ज्ञानत्वं वा, ज्ञानाधारत्वं वा, स्वप्रकाशत्वं वा, आत्मपदवाच्यत्वं वा, तल्लक्ष्यत्वं वा? नाऽद्यः । आत्मन एकत्वेन जात्ययोगात् । कल्पितानेकभेदसद्भावान्नेति चेन्न । कल्पितात्मनां पक्षनिक्षिप्ततया भागासिद्धेः । न द्वितीयः । साध्याविशिष्टत्वात् । न तृतीयः । असति व्यभिचारात् । प्रागेव निरस्तत्वाच्च । न चतुर्थः । वृत्तिज्ञाने भागासिद्धत्वात् । न पञ्चमः । अत्मन्यभावात् । तद्वतस्तस्य पक्षनिक्षेपात् । न षष्ठः । स्वकर्मकसंविद्रूपताव्यतिरिक्तस्वप्रकाशताया निराकरणात् । न सप्तमः । आत्मन्यभावात् । तद्वतस्तस्य पक्षनिक्षेपात् । अत एव नान्तिमः ।। * ।। अनात्मत्वहेतुभङ्गः ।। * ।।

"अयं पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी, अंशित्वात्, पटत्वाद्वा; पटान्तरवत्, इत्यत्र पटस्य एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वसाधनमत्यन्ताभावस्य निष्प्रतियोगित्वेन बाधितम् । एतत्तन्तुषु नास्तीति साधने सिद्धसाधनम् । कार्यकारणयोरभेदेनाऽधाराधेयभावाभावात् । एतत्तन्तुकार्यो न भवतीति साधने प्रत्यक्षबाधः । अकार्यत्वान्यकार्यत्वसिद्धयाऽर्थान्तरता च । आकाशादिषु प्रयोगासम्भवेन सर्वजगन्मिथ्यात्वासिद्धेश्च । किञ्च किमत्र पटस्यासत्त्वमापाद्यते, संसर्गनिषेधो वा क्रियते? नाऽद्यः । सद्दर्शनविरोधात् । दृष्टान्तश्च साध्यविकलः । नोत्तरः । तन्तुपटसंसर्गाभावस्य सिद्धत्वात् । अथैतत्तन्तुजन्यो न भवतीति प्रतिज्ञावाक्यार्थः, तर्हि तस्यांशित्वमपि न स्यादिति हेतोरसिद्धिः । इह तन्तुषु पट इत्यादिप्रत्यक्षविरुद्धं चैतत् । अन्यथा दहनशैत्यानुमानादेरप्यप्रतिबद्धप्रसरतया बाधपरिभाषापरिमोषापातात् । नच प्रत्यक्षस्यानुमानबाधितत्वे दृष्टान्तं पश्यामः । नच नभोनीलिमाऽनुमानबाध्यः । तथाहि – महत्त्वान्नभसो रूपं निषिद्ध्यते, अद्रव्यारम्भकत्वाद्वा, स्पर्शरहितत्वाद्वा? न त्रयमपि । तत एवाशब्दत्वप्रसङ्गात् । उपजीव्यप्रत्यक्षविरोधे यदाऽऽगमस्यापि पराभवस्तदा का कथा वराकस्यानुमानस्य तत्पादोपजीविन इत्यलं विस्तरेण ।। * ।। अंशित्वानुमानभङ्गः ।। * ।।

"विमतो भेदो मिथ्या, भेदत्वात्, चन्द्रभेदवति चेत्, न । अत्र साध्यस्य

सत्यत्वे सदद्वैतवादिनोऽपसिद्धान्तापातात् । बाध्यत्वे कालात्ययापदिष्टः स्यात् । साध्याद्धेतोर्भेदो नास्तीति चेत् साध्याविशिष्टता स्यात् । अस्ति चेत् सत्यो मिथ्या वा? आद्ये तत्रैवानैकान्त्यं स्यात् । द्वितीये पूर्वदोषप्रसङ्गात् । किञ्च पक्षात् परमार्थतः परं ब्रह्माभिन्नं भिन्नं वा? आद्ये तस्यैव मिथ्यात्वमापद्येत । द्वितीयेऽत्र व्यभिचारो दुर्वारः स्यात् । मिथ्यात्वं च सदसद्वैलक्षण्यं चेद्व्याहतिः । बाध्यत्वं चोपाधिः । तस्यापि तत एव साधने त्वप्रामाणिकत्वमुपाधिरित्यलं पल्लवेन ॥ * ॥ भेदत्वहेतुभङ्गः ॥ * ॥

"विमतं स्वान्तर्भेदहीनं मतत्वात् गगनवदित्यत्र स्वान्तर्भेदहीनत्वमपि समुदायस्य समुदायिनो भेदाभावेनास्माकं सिद्धमेव । भेदहीनत्वमात्रे दृष्टान्तस्य साध्यविकलता, प्रत्यक्षबाधः, "प्रपञ्चो विनिवर्तेत कल्पितो यदि केनचित्" इति श्रुतिबाधश्च दुष्परिहरः ॥ * ॥ मतत्वानुमानभङ्गः ॥ * ॥

"विमतानि देवदत्तस्यैव भोगायतनानि भोगायतनत्वात्, देवदत्तशरीरवत्; देवदत्तयज्ञदत्तयोर्भेदो मिथ्या भेदत्वात्, चन्द्रभेदवत्; विमतानि शरीराणि मयैवाऽत्मवन्ति, शरीरत्वात्, मच्छरीरवत्; विमतानीन्द्रियाणि मदीयज्ञानसाधनानि, इन्द्रियत्वात्, मदीयेन्द्रियवत् – इत्यादि । एतदप्ययुक्तम् । चेष्टाद्यनुमितात् प्रवर्तमानादप्रवर्तमानोऽहं भिन्न इत्यनुभवविरोधात् । नच वाच्यं परात्मनः प्रत्यक्षत्वानभ्युपगमात् प्रत्यक्षाप्रत्यक्षयुगधर्मस्य भेदस्य प्रत्यक्षत्वानुपपत्तिः, वायुवनस्पतिसंयोगवदिति । यतो नायं भेदो युगधर्मः । किन्त्वेकस्यैव धर्मोऽपरेण निरूप्य इत्यङ्गीकारात् । नापि प्रत्यक्षमतात्त्विकविषयम्; बाधकाभावात् । एवं "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्" इत्यादिश्रुतिबाधितान्यनुमानानि । सर्वशरीराणां देवदत्तभोगायतनत्वसाधनेऽपि तत्र स्थितिमात्रसाधने सर्वगतत्वसिद्ध्याऽर्थान्तरम् । तन्निमित्ततः सुखादिभोगसाधनेऽपि देवदत्तस्य तत्पुरे प्रवेशमात्रसिद्ध्याऽर्थान्तरम् । देवदत्तस्यैवेति विशेषणाददोष इति चेन्न । ब्रह्मग्रहाधिष्ठिते शरीरेऽन्यस्य भोगाभावेन तदभावसिद्ध्याऽर्थान्तरताऽपरिहारात् । सर्वदेति विशेषणे बाधः । सुप्त्यादावभावात् । जाग्रत्त्वविशेषणे दृष्टान्तस्य साध्यविकलता । तत्रापि कदाचित्प्रवेशसम्भवादि-

---

त्यलम् । भेदो मिथ्येत्यत्र दोषजन्यत्वमुपाधिः । तस्यापि प्रकृते साधने बाध्यत्व-मुपाधिः । मयैवाऽत्मवन्तीत्यत्र कोऽहमर्थो विवक्षितः? किमहङ्कारः, किं तत्र प्रतिफलिता संवित्, किं तदुभयोत्तीर्णः साक्षी? नाऽद्यः । क्वाप्यहङ्कारस्याऽत्म-त्वानभ्युपगमात् । दृष्टान्तस्य साध्यविकलत्वात् । अनात्मनाऽऽत्मवन्तीति प्रतिज्ञाविरोधश्च । न द्वितीयः । तत्प्रतिफलितसंविदोऽप्यात्मत्वानभ्युपगमात्; दृष्टान्तस्य साध्यविकलत्वात्; अप्रसिद्धविशेषणत्वाच्च । अस्माभिः संविदाश्र-यस्याचेतनस्याऽत्मत्वानभ्युपगमात् । न तृतीयः । तवाभिमतस्याऽविद्यकस्य साक्षिणोऽस्मन्मतेऽप्रसिद्धत्वात् । यदि साक्षी ईश्वरोऽभिमतस्तदा सिद्ध-साधनता । यतो जीवाश्रितेष्वपि शरीरेषु नियामकतया परमात्माऽस्त्येवेति संक्षेपः" ।। * ।।

एवं प्रायः परोदितान्यखिलान्यभेदानुमानानि निरस्य श्रुतिस्मृतिभिरपि जगतः सत्यतां व्यवस्थापयितुमुत्तरो ग्रन्थः प्रस्तुतः । तद्यथा –

"भवन्ति चात्राऽगमाः – "असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । त आसुराः स्वयं नष्टा जगतः क्षयकारिणः" इति व्यासस्मृतिः । "सत्य आत्मा-सत्यो जीवः सत्यं भिदा सत्यं भिदा मैवाऽरुवण्यो मैवाऽरुवण्यः" इति भाल्लवेय-श्रुतिः । मैत्रेयीशाखायां च – "अथ ज्ञानोपसर्गाः" इति प्रतिज्ञायेदमुदितम् – "अथ ये चान्ये मिथ्यातर्कैर्दृष्टान्तैः कुहकेन्द्रजालैर्वैदिकेषु परिस्थातुमिच्छन्ति तैः सह न संवदेत् । प्राकाश्या ह्येते तस्करा अस्वर्ग्या इति ह्याह — नैरात्म्यवाद-कुहकैर्मिथ्यादृष्टान्तहेतुभिः । भ्राम्यन् लोको न जानाति वेदविद्यान्तरं महत्" इति । अत्र 'वैदिकेषु परिस्थातुमिच्छन्ति' इति ज्ञापकात् अद्वैतवादिन एवाभि-प्रेताः । नतु बौद्धादयः । नहि ते वैदिकेषु परिस्थातुमिच्छन्ति । नन्वद्वैतवादिमतं शङ्कराचार्येण प्रवर्तितं कथं श्रुत्या निषिद्ध्यत इति चेत्; मैवं बालिशवद् भाषिष्ठाः । समयानां प्रवाहतोऽनादित्वात् । नह्याधुनिको मायावादः । "ईशोऽनीशो जगन्मिथ्या न पूज्यो गुरुरित्यपि । एक आत्मा पुमर्थश्च कामार्थाभ्यां विना नहि । एवमादि विरुद्धानि वचनान्यथ युक्तयः । प्रमाणैर्बहुभिर्ज्ञेया आभासा इति वैदिकैः" इति व्यासस्मृतिः ।

"ननु पुराणे "स्वप्नमनोरथो यथा" इति स्वप्नसाम्यं जगतः श्रूयते । तदनित्यत्वसाम्यादिति ब्रूमः । "अनित्यत्वविकारित्वपारतन्त्र्यादिरूपतः । स्वप्नादिसाम्यं जगतो नतु बोधनिवर्त्यता । सर्वज्ञस्य यतो विष्णोः सर्वदैतत् प्रतीयते । बोधासहं ततो नैतत् किन्त्वाज्ञावशमस्य हि" इति परमोपनिषदि निर्णीतत्वात् । एवं पुराणे जगदनृतमसन्मायामयमिति ईश्वरप्रज्ञानिर्मितत्वादेवोच्यते । तथा निर्वचनश्रवणात् – "ऋगताविति धातोस्तु पूर्वावगतवत्सदा । स्थितेर्ब्रह्मर्तमित्युक्तमनृतं परिणामतः । प्रकृतिप्राकृतं प्रोक्तमसत्तदशुभत्वतः । असतां बुद्धिगम्यत्वादसत्यमिति चोच्यते । प्रज्ञाविनिर्मितं यस्मादतो मायामयं जगत्" इति न क्वापि विरोधशङ्का । "नच मायाविना माया दृश्यते विश्वमीश्वरः । सदा पश्यति तेनेदं न मायेत्यवधार्यताम् ।" प्रयोगश्च – विश्वं न विष्णुमायाकल्पितं तेन दृश्यमानत्वात् । यद्यन्मायाकल्पितं न तत्तेन साक्षात्क्रियते । यथैन्द्रजालिकं मायाविनेति । अन्यथाऽदृष्टकल्पनाप्रसङ्गात् । एवं वा – नेदं मायामयम्, मायावित्वाभिमतेन दृश्यमानत्वात् । न यदेवं नैतदेवं यथैन्द्रजालिकं मायाविनेति । "अपरोक्षदृशो मिथ्यादर्शनं न क्वचिद्भवेत् । सर्वापरोक्षविद्विष्णुर्विश्वदृक् तन्न तन्मृषा" इति च ब्रह्माण्डे । प्रयोगस्तु – विवादपदं नाऽरोपितम्; सर्वात्मनाऽधिष्ठानापरोक्षज्ञानवता दृश्यमानत्वात्; यदेवं तदेवम्; यथोक्तविधया स्तम्भविदा दृश्यमानो न कुम्भस्तत्राऽरोपित इति । अथवा यन्नैवं तन्नैवम् – यथा शुक्तावरोपितं रजतमुक्तरीत्या शुक्तिदर्शिना न दृश्यत इति । अधिष्ठानासाधारणाकारयाथात्म्यापरोक्षज्ञानेऽपि भ्रमानुवृत्तौ कदाऽप्यनिवृत्तिप्रसङ्गः । ततश्च ब्रह्मज्ञानान्वेषणवैयर्थ्यप्रसङ्गः स्यादिति ।

"ननु सत्यमबाध्यं तदन्यन्मिथ्येति विद्वत्सम्मतिरस्ति । तर्हि विश्वस्यापि सत्यत्वे कथं "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुत्या सत्यं ब्रह्मेति लक्षणं कथ्यते? मुक्तामुक्तनियन्तृत्वात् सत्यमिति ब्रह्मलक्षणं युक्तम् । यथोक्तं छान्दोग्येऽष्टमे प्रपाठके – "तस्य वा एतस्य ब्रह्मणो नाम सत्यमिति । तानि हवा एतानि त्रीण्यक्षराणि सत् ति यमिति । तद्यत् सत् तदमृतम्; अथ यत् ति तन्मर्त्यम्; अथ यद् यं तेनोभये यच्छति ।" ननु "यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो

न ज्यायोऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्" इत्यस्यां श्रुतौ परापरयोरुभयोरपि निषेधः श्रूयते । मैवम् । 'तेनेदं पूर्णमि'त्यादिवाक्यशेषविरोधात् । इदंशब्दार्थाभावे किं तेन पूर्णं स्यात्? यस्मात् परमेश्वरात् परमुत्कृष्टं नास्ति, 'अपरमस्ति' अपकृष्टमस्त्येव; तच्च 'किञ्चित्' अल्पमित्यर्थः । 'यस्मान्नाणीय' इत्यत्र नञो द्विःप्रयोगादुभयनिषेधोऽङ्गीक्रियत एवेति । तथाच ईश्वरादुत्कृष्टं वस्तु नास्ति; अपकृष्टं जगदस्त्येवेति सिद्धम् ।

"विश्वमिथ्यात्वयुक्तयस्त्वाभासा एव – "ईशोऽनीशो जगन्मिथ्या न पूज्यो गुरुरित्यपि । एक आत्मा पुमर्थश्च कामार्थाभ्यां विना नहि । एवमादि विरुद्धानि वचनान्यथ युक्तयः । प्रमाणैर्बहुभिर्ज्ञेया आभासा इति वैदिकैः । वेद-वेदानुसारेषु विरोधेऽन्यार्थकल्पना । इतराणि विरुद्धानि प्रलम्भभ्रमजान्यपि" इति व्यासस्मृतिः । ननु श्रुत्याऽनिर्वचनीयं वस्तु प्रतीयते । "नासदासीन्नो सदासीत्तदानीं नाऽसीद्रजो नो व्योमा परो यत्" इत्यत्र प्रलये सदसदभावः प्रतीयते । सामर्थ्यात्तदा विद्यमानस्यार्थस्य सत्त्वासत्त्वप्रतिषेधात् परिशेषतोऽनिर्वचनीयत्वावगमात् । मैवम् । यदि प्रलयेऽवशिष्टस्यानिर्वाच्यत्वं स्यात्तर्हि "आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनाऽस" इति ब्रह्मणोऽतिसन्निहितत्वात् तस्यानिर्वचनीयत्वं स्यात् । किञ्च तदानीमिति व्यर्थम्; सर्वदाऽनिर्वाच्यत्वात्तमसः । असन्नासीदित्यपि व्यर्थमेव; प्राप्त्यभावात् । तस्मान्मूढानामेवैवं व्याख्यानम् । तर्हि श्रुतेः कोऽर्थस्तत्त्वविन्मते? उच्यते । प्रलयेऽसदमूर्तं वाय्वन्तरिक्षादिकं नाऽसीत् । सच्च पृथिव्यप्तेजोरूपं नाऽसीत् । रजःशब्दोपलक्षितं गुणत्रयं च नाऽसीत् । यत्परः परमं व्योम तन्नाऽसीदित्यर्थः – "मूर्तं सदिति सम्प्रोक्तममूर्तमसदुच्यते । मूर्तामूर्तेतरद्ब्रह्म न सत्तन्नासदुच्यते" इत्याद्यागमादवसेय इति ।

"ननु प्रपञ्चो यदि विद्येत निवर्तेत न संशयः । मायामात्रमिदं द्वैतमद्वैतं परमार्थतः", "विकल्पो विनिवर्तेत कल्पितो यदि केनचित् । उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते" इति श्रुतिभ्यां भेदप्रपञ्चमिथ्यात्वमवगम्यत इति चेत्; मैवं विरुद्धं भाषिष्ठाः । श्लोकद्वयेन पञ्चविधभेदप्रपञ्चनित्यत्वसत्यत्व-

---

स्थापनात् । तथाहि – "अनादिमायया सुप्तो यदा जीवः प्रबुध्यते । अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा" इति पूर्वश्लोकेऽनादिमायया परमेश्वरेच्छया जडप्रकृत्या च जीवजातस्याज्ञानावरणलक्षणं सुप्तत्वं तथैव तत्त्वज्ञानलक्षणः प्रबोधश्चोक्तः । पश्चादखण्डमीशं नित्यमुक्तं प्रेक्षत इति चोक्तम् । तेन जीवेशयोर्जीवजडयोर्जडेशयोर्भेदाः सन्तीति सिद्धम् । शृङ्खलया बद्धस्य मुक्तस्य प्रभोश्च भेददर्शनात् । "प्रभवः सर्वभावानाम्" इति (प्रभवाच्च) उक्तानां जीवानां मिथो भेदोऽपि लब्धः । तत एवाऽवरणानां मिथोऽर्थाल्लभ्यते । तेषां पञ्चानां भेदानां भास्करीया औपाधिकत्वं वर्णयन्ति; मायावादिनः कल्पितत्वं कथयन्ति । एतन्मतद्वयं निरस्य पञ्चभेदानामनादित्वं नित्यत्वं सत्यत्वं चेदं श्लोकद्वयं प्रतिपादयति । तेन न तावदुपाधिलभ्यो भेदप्रपञ्च इत्याह – प्रपञ्च इति । भेदप्रपञ्चो यदि विद्येत लभ्येत तर्हि निवर्तेत; औपाधिकस्य निवृत्तिनियमात् । नच मोक्षेऽपि निवर्तते; तस्मादनादिरेवायम् । यदि जीवजडादिभेदो नश्येत् तर्हि जीवस्य जडत्वापत्तिरित्याद्यनिष्टं द्रष्टव्यम् । ननु जीवेशयोर्नित्यत्वाद्भेदस्यानादिनित्यत्वं युक्तम्; जडानां भेदः कथं नित्यः स्यात्? अत आह – मायामात्रमिति । भेदो हि धर्मिस्वरूपः । धर्मी च प्रकृतिर्नित्या । तन्मात्रं द्वैतं कथं नित्यं न स्यात्? यद्वा मायेति भगवत्प्रज्ञा । तया ज्ञातत्वाद्रक्षितत्वाच्च न द्वैतं निवर्त्यम्; किन्तु नित्यमेवेत्यर्थः । तर्हि "अद्वैतः सर्वभावानाम्" इत्यादिव्यपदेशः कथमित्यत उक्तम् – अद्वैतं परमार्थत इति । उत्तमार्थे ब्रह्मण्येवाद्वैतम् । ल्यब्लोपनिमित्ता वा पञ्चमी । उत्तमार्थमीश्वरमपेक्ष्येत्यर्थः । नापि कल्पितो भेद इत्याह – विकल्प इति । यदि केनचिदज्ञानादिना कल्पितो भेदः स्यात् तर्हि निवर्तेत; कल्पितस्य बाधनियमात् । नच बाध्यते । तस्मान्न कल्पित इति । 'अयं' भेदसत्यत्ववादः 'उपदेशात्' – "सत्य आत्मा सत्यो जीवः सत्यं भिदा" इत्याद्युपनिषत्सूपदेशात्, "स आत्माऽतत्त्वमसी"त्याद्युपदेशाच्चावसीयते । तर्हि मायिनां कथं द्वैतं नास्तीति प्रतीतिरिति? तत्राऽह–अज्ञाते द्वैतं न विद्यत इति । श्रुतितात्पर्यापरिज्ञाननिमित्तात् तेषां मते द्वैतं न विद्यत इत्यर्थः । यदि स्वरूपकथनं स्यात्तदा प्रपञ्चो निवर्तिष्यत इति वक्तव्यम् ।

यदिशब्दौ न युज्येते । यद्यदस्ति तन्निवर्तत इति व्याप्त्यभावाच्च । तस्मादुक्त एवार्थः श्रुतिशतसिद्धः । "जीवेश्वरभिदा चैव जडेश्वरभिदा तथा । जीवभेदो मिथश्चैव जडजीवभिदा तथा । मिथश्च जडभेदोऽयं प्रपञ्चो भेदपञ्चकः । सोऽयं सत्यो ह्यनादिश्च सादिश्चेन्नाशमाप्नुयात् । नच नाशं प्रयात्येष नचासौ भ्रान्तिकल्पितः । कल्पितश्चेन्निवर्तेत नचासौ विनिवर्तते । द्वैतं न विद्यत इति तस्मादज्ञानिनां मतम् । मतं हि ज्ञानिनामेतन्मितं त्रातं च विष्णुना । तस्मात्सत्यमिति प्रोक्तं परमो हरिरेवतु" इति परमश्रुतिः । "अथैनमाहुः सत्यकर्मेति सत्यं ह्येवेदं विश्वमसौ सृजते" इत्यादिश्रुतिभिः, "एवम्भूतो महाविष्णुर्यथार्थं जगदीदृशम् । अनाद्यनन्तकालीनं ससर्जाऽत्मेच्छया विभुः" इति वाराहवचनादिभिः सत्यत्वावगमात् । विश्वसत्यत्वमनङ्गीकुर्वतां निन्दा च श्रूयते – "असत्यमाहुर्जगदेतदज्ञाः शक्तिं हरेर्ये न विदुः परां हि । यः सत्यरूपी जगदेतदीदृक्सृष्ट्वा त्वभूत्सत्यकर्मा महात्मा" इति परमोपनिषदि । "केचिद्भेदं सत्यरूपमासुरज्ञानवृत्तयः । निराकुर्वन्त्यतो मन्दा भेदस्य परमार्थताम् । ये तु तत्त्वविदो मुख्या भेदं ब्रह्मान्यवस्तुनः । ज्ञात्वा हि परमं देवं नित्यं विष्णुमुपासते" इति गारुडे । "असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्परसभूतं किमन्यत् कामहैतुकम् । एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः । प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः" इति भगवद्वचनात् । तस्मान्मायिमाध्यमिकमतापाकरणमेवात्र क्रियत इति संक्षेपः ।

"प्रत्यक्षागमसिद्धान् पदार्थान् पक्षीकृत्य खल्वनुमानेन मिथ्यात्वं साधनीयम् । नच तद्युक्तम् । धर्मिग्राहकतयोपजीव्यप्रत्यक्षादिभिर्बाधितत्वात् । नन्वनुमानमेव प्रत्यक्षस्य बाधकं किं न स्यात्? मैवं वोचः । प्रत्यक्षविरोधेन मरणावस्थस्य तस्य प्रत्यक्षविरोधाक्षमत्वात् । नहि हरिणशावस्तरक्षोः प्रतिपक्षो भवितुमर्हतीति । येन विना यस्योत्थानं नास्ति तत्तस्योपजीव्यम् । व्याप्त्यादिग्राहकतयोपजीव्यं प्रत्यक्षमनुमानस्य । तत्कथं स्वोपजीव्यमाभासीकुर्यात्? अन्यथा दहनशैत्यानुमाऽपि तदुष्णताग्राहिप्रत्यक्षबाधकत्वेन प्रमाणं प्रसज्येत । तदुक्तम् – "तर्कमात्रतः प्रत्यक्षबाधने भूतचतुष्टयस्य पृथिवीत्वादृष्टेः

पृथिव्या अपि पृथिवीत्वं न स्यात्" इति । ननु प्रत्यक्षं वर्तमानमात्रविषयम्; तत्कथमागामिबाधाभावलक्षणं सत्यत्वं गृह्णीयात्? सत्यत्वावान्तरग्रहणं तु प्रकृतानुपयुक्तम् । उच्यते । प्रत्यक्षं तावत् प्रमाणं बाधाभावात् । अनुमानं तु धर्मिग्राहकेणैव बाधितम् । प्रबलबाधस्यादर्शनात् । भविष्यतीति निर्मूल-शङ्काया अनुचितत्वात् । ततश्च वर्तमाने सत्तां गृह्णत् प्रत्यक्षं बाधाभावमेव साधयति । नहि विनाशो बाधः । किन्तु कालत्रयसत्तानिषेधः । नह्येकस्मिन् काले सतः स सम्भवति । असति च बाधके प्रत्यक्षेणैवाबाध्यत्वलक्षणं सत्यत्वं गृह्यते स्वतः प्रामाण्यादिति । साक्षी च यथार्थस्वभावः । नहि साक्षिसिद्धसुखदुःख-भयादौ कश्चित्सन्दिग्धे । नापि विपर्येति । नह्यसति सुखे सुखानुभवोऽस्ति । तद्विषयमिथ्यात्वसाधने तद्बाधो दुर्वारः स्यात् । आगमैकसिद्धस्वर्गापवर्गादि-रनुमानेन बाधनेऽतिप्रसङ्गात् । द्रवत्वात्पयोवत् ब्राह्मणेनापि सुरा पेया प्रसज्येत ।

"नन्वागमेन कीदृशं सत्यत्वं स्वर्गादिर्गृह्यते? ब्रह्मणो यादृक् तादृगेवेति सन्तोष्टव्यम् । किञ्च "विश्वं सत्यम्" इति यथा प्रत्यक्षश्रुतिर्न तथा विश्वं मिथ्येति क्वापि स्पष्टं श्रूयते । नन्वत्र कीदृशं सत्यत्वमुच्यते? त्रैकालिका-बाध्यत्वलक्षणमिति ब्रूमः । व्यावहारिकं सत्यत्वं किं न स्यादिति चेत्; हन्त पारमार्थिकसत्यत्वमपि व्यवहारयोग्यमेव । सत्त्रैविध्यकल्पनाया निर्मूलत्वात् । विवरणविडम्बने निराकरिष्यमाणत्वाच्च । श्रुतौ तत्कल्पनाया निर्बीजत्वात् । अन्यथा ब्रह्मसत्यत्वमपि व्यवहारिकमारोपितं वेति सुवचं स्यात् । तस्मा-द्वादिप्राप्त्या तर्कतश्च प्रसक्तमिथ्यात्वनिषेधेन प्रत्यक्षाविषयीभूतं पारमार्थिक-सत्यत्वमेव श्रुतिस्मृतियुक्तिभिः प्रतिपाद्यत इति संक्षेपः ।

"ननु विश्वसत्यत्वे किं प्रमाणम्? प्रत्यक्षं तावत् 'सन् घट' इति प्रतीयते । ननु शुक्तिरजतस्यापि सत्यत्वं प्रतीयत इति चेन्न । तस्य प्रत्यक्षाभासत्वात् । तदपि दोषप्रयुक्तभानत्वात् । तदपि बाधात् । प्रत्यक्षं वर्तमानमात्रार्थग्राहकमिति चेत्, अस्तु । नहि विनाशो बाधः । किन्तु कालत्रयसत्तानिषेधः । नह्येकस्मिन् काले सतः स सम्भवति । असति च बाधके स्वतः प्रामाण्याद्विषयस्य च निर्बाधं सत्यत्वं सेत्स्यतीति । अस्त्वनुमानमेव प्रत्यक्षबाधकमिति चेन्न । केवलानुमानस्य

प्रत्यक्षविरोधेन प्राप्तमरणावस्थस्य प्रत्यक्षविरोधाक्षमत्वात् । अन्यथा दहन-शैत्यानुमानमपि तदुष्णताग्राहिप्रत्यक्षबाधकं स्यात् । यदा प्रत्यक्षविरोधात् श्रुतिरप्यपसरति तदा का वार्ता तत्पादोपजीविनो वराकस्यानुमानस्य? नभो-मालिन्यं तु पञ्चीकरणन्यायेन सत्यमेवेत्युक्तम् । प्रतिबिम्बस्य च सत्यत्वं विवरणविडम्बनावसरे वक्ष्यामः । 'प्रादेशमात्रश्चन्द्र' इति प्रत्यक्षाभास एव । दूरतादोषग्रस्तत्वात् । निर्दुष्टप्रत्यक्षस्य च क्वाप्यबाध इत्यलं विस्तरेण ।

"सर्वज्ञानानां प्रामाण्यग्राहकः साक्षी यथार्थग्राहक एव । नो चेदद्वैतागम-प्रामाण्यं न सिद्ध्येत् । तेन च स्वविषयस्य सुखादेः सत्यत्वमवसीयते । नच साक्ष्यनुभवस्य क्वापि बाधोऽस्तीति शास्त्रे द्रष्टव्यम् । "अथैनमाहुः सत्य-कर्मेति सत्यं ह्येवेदं विश्वमसौ सृजते" इत्याद्युपनिषद्भिः विश्वसत्यत्वमव-गम्यते । व्यावहारिकसत्यत्वमत्रोच्यत इति चेन्मैवम् । एतत्कल्पनाया निर्बीज-त्वात् । व्यावहारिकपदाभावाच्च । नहि श्रुत्या बाध्योऽर्थो वर्ण्यते । अन्यथाऽति-प्रसङ्गात् । शुष्कतर्काणां च सर्वत्रापि प्रसरात् । यथाऽऽह सूत्रकारः – "कामाच्च नानुमानापेक्षा", "तर्काप्रतिष्ठानादन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः" इति ।

"त्वद्रीत्या शून्यवादान्वारोहाद्वोच्यते – विमतं ब्रह्म मिथ्या ज्ञानत्वात्, शुक्तिरजतज्ञानवत्; एवं भातत्वात् पदार्थत्वादित्यादि प्रयोक्तव्यम् । नच बाधकज्ञाने व्यभिचारः । स्वरूपेण मिथ्याभूतस्यापि यथार्थसाधकत्वाभ्युप-गमात् । नच ज्ञानं सदित्यनुभवविरोधः । व्यावहारिकसत्त्वेन तदुपपत्तेः । सर्वथा बाधवैधुर्यस्याऽगमेतरप्रमाणैरसर्वज्ञेन विज्ञातुमशक्यत्वात् । नच बाध्यत्व-मुपाधिः । तस्यैव साध्यत्वात् । नच "सत्यं ज्ञानम्" इति श्रुतिविरोधः । "असद्वा इदमग्र आसीत्" इत्यादिवाक्यनिषेध्यसमर्पकतया सांव्यावहारिकसत्त्वानु-वादपरत्वात् श्रुतेः । नचाद्वैतश्रुतिविरोधः । तासामुपासनापरत्वात् । तत्त्वा-वेदकत्वानङ्गीकाराच्च । तत्त्वावेदकम् – "असद्वा इदमग्र आसीत्" इत्येकं वाक्यं निषेधकम् । प्राप्तिस्तु लोकतो वादितश्च । भ्रान्तिसिद्धब्रह्मसद्भावो निषिद्ध्यत इति सुवचं स्यात् । तस्माद्विशेषपरिहाराभावात् पक्षपातं विहाय

प्रामाणिकरीत्या व्यवहर्तव्यम् । सर्वप्रमाणानि तत्त्वावेदकान्येव । यत्र बाधो न तत् प्रमाणम् । तथाच प्रत्यक्षस्य वर्तमानार्थमात्रग्राहित्वाद्दुर्ग्रहं विश्वसत्यत्वं साशङ्कं बाधजनकतर्कैरुपद्रुतं च । तदागमेन कालत्रयाबाध्यत्वरूपं निःशङ्कं पारमार्थिकं विश्वसत्यत्वं ब्रह्मसत्यत्ववद्भगवती श्रुतिः प्रतिपादयतीति सर्वमनवद्यम् ।

"अथ प्रपञ्चसत्यत्वेऽनुमानानि – विमतं धर्मादिकं सत्यं श्रुतिप्रतिपादितत्वात्, आत्मवत् । सत्यमबाध्यं तदन्यन्मिथ्येति च विद्वत्सम्मतम् । पारमार्थिकसत्यत्वसाधनान्न सिद्धसाधनता । उपनिषदर्थस्योभयमते च बाध्यत्वानङ्गीकारान्न साध्यसाधनविकलता । "चोदनालक्षणोऽर्थो धर्मः" इति न्यायान्नायमसिद्धः । बाध्यस्य शुक्तिरजतादेः प्रमाणाविषयत्वान्न विरुद्धो नाप्यनैकान्तिकः । अपौरुषेयवेदार्थस्य बाधायोगादिति । विमतं जगदबाध्यं तुच्छप्रातिभासिकेतरत्वात्, आत्मवत् । व्याप्यस्य पक्षे प्रमितत्वान्नासिद्धिः । विपक्षे त्वविद्यमानत्वान्नानैकान्त्यादि । सपक्षे विद्यमानत्वान्नानध्यवसितः । अत्मत्वमुपाधिरिति चेन्न । तस्यैवानिरूपणात् । न तावज्ज्ञानत्वम् । ज्ञातृज्ञेयशून्यस्य ज्ञानस्यापि शून्यत्वात् । नेदं ज्ञानं ज्ञेयशून्यत्वात्, घटवदित्यनुमानात् । नापि ज्ञानाश्रयत्वम् । अनङ्गीकारात् । नापि सामान्यविशेषः । वास्तवस्य परासम्मतेः । कल्पितस्य देहादावपि सम्भवात् । आत्मशब्दस्य नानार्थत्वादात्मशब्दवाच्यत्वमपि नोपाधिरिति । नच स्वप्रकाशत्वमुपाधिः । पक्षे दीपेऽपि सत्त्वात् । स्वव्यवहारे संविदन्तरानपेक्षत्वं स्वप्रकाशत्वमिति चेन्न । आत्मनोऽप्यद्वितीयत्वादिस्वव्यवहारे वेदान्तजनितसंविदन्तरापेक्षत्वात् । परात्मनश्चानुमानगम्यत्वादिति । नच जगत्प्रत्यक्षादिप्रमाणबाध्यम् । तेषां तद्विधानपरत्वात् । अनुमानानां प्रागेव निरस्तत्वात् । नच श्रुतिर्बाधिकाऽस्तीत्युक्तम् । नहि कालत्रयसत्तानिषेधः क्वापि श्रूयते । प्रलये ध्वंसस्तु सत्यस्यापि स्यात् । ज्ञानान्निवृत्ति श्रुतिसूत्रे वदतः – "भिद्यते हृदयग्रन्थिः" इति श्रुतिः । "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ" इति सूत्रम् । अनुमानेन बाध्यत्वं साध्यत इति चेन्न । 'विश्वं सत्यमि'ति बाधादिति सर्वमनवद्यम् ।

"विमतं सत्यं प्रमाणदृष्टत्वात्, परमेश्वरवत् । नच साध्यानिरुक्तिः । अबाध्यतायाः साध्यत्वात् । तस्याश्च ब्रह्मणि सिद्धत्वान्नाप्रसिद्धविशेषणता । ननु किमिदं प्रमाणदृष्टत्वम्? तात्त्विकप्रमाणदृष्टत्वमतात्त्विकप्रमाणदृष्टत्वं वा? नाऽद्यः । अस्माकमसिद्धेः । प्रत्यक्षादिप्रमाणानां तत्त्वावेदकत्वानभ्युपगमात् । न द्वितीयः । तवासिद्धेरिति चेत् न । प्रमाणमतत्त्वावेदकमिति व्याहतेः । प्रत्यक्षादिकं तत्त्वावेदकं प्रमाणत्वात्, श्रुतिवत् । प्रपञ्चस्तत्त्वावेदकप्रमाणदृष्टः सम्प्रतिपन्नभ्रान्तिपदार्थेतरत्वात्, ब्रह्मवत् । किञ्च तत्त्वावेदकत्वातत्त्वावेदकत्वादिविशेषणान्यवधूय प्रमाणदृष्टत्वं हेतुः किं न स्यादिति? नचासाधारणः । आत्मनोऽपि वेदान्तजनितवृत्तिव्याप्यत्वाङ्गीकारात् । प्रपञ्चः सत्यः ईश्वरदृष्टत्वात्, ईश्वरवत् । "सर्वापरोक्षविद्विष्णुर्विश्वदृक् तन्न तन्मृषा" इति ब्रह्माण्डवचनान्नासिद्ध्यादिशङ्केति । ईश्वरसत्यत्वानङ्गीकारे निरीश्वरवादावतारः स्यादिति । पृथिवी सत्या, अपरोक्षव्यवहारविषयत्वे सति प्रातिभासिकेतरत्वात्, आत्मवत् । अर्थक्रियाकारित्वं च सत्यत्वे हेतुः । नह्यारोपिताच्छुक्तिरजताद्वलयाद्यर्थक्रिया भवति । नापि बाष्पधूमादेर्वह्निः सिद्ध्यति । ब्रह्मणोऽर्थक्रियाकारित्वाभावे जन्मादिसूत्रविरोधः । अज्ञानसिद्धिश्च कथं साक्षिणेष्यते? अज्ञानवशादेवेति वदतोऽन्योन्याश्रयः स्यात् । नच स्वाप्नरम्भासंयोगे व्यभिचारः । पक्षसमत्वात् । नापि प्रतिबिम्बे व्यभिचारः । विवरणविडम्बने प्रतिबिम्बसत्यत्वस्य वक्ष्यमाणत्वात् । भयहेतुत्वं रज्जुसर्पेऽस्तीति चेन्न । तत्र सर्पज्ञानस्य भयकम्पादिजनकत्वात् । ज्ञानस्वरूपस्य च सत्यत्वात् । ननु किं ज्ञानमात्रं भयकम्पादिजनकम्, उतार्थविशेषितम्? अद्ये सकलज्ञानानां भयकम्पादिजनकत्वप्रसङ्गः । द्वितीये सर्पस्यापि तज्जनकत्वमापन्नमिति चेन्न । ज्ञानं प्रत्यस्योपलक्षणत्वात् । नहि चित्रगुरागतश्चेच्चित्रा गावोऽप्यागच्छन्ति । नापि कुरूणां क्षेत्रकर्षणे कुरवोऽपि कृष्यन्ते । नापि स्वर्गकामनादेर्यागसाधनत्वे स्वर्गस्यापि स्वसाधनं प्रति साधनत्वमस्ति । परस्पराश्रयतापातात् । ज्ञानोल्लेखित्वं प्रतियोगित्वं चासतोऽपि बौद्धमेवास्तीति संक्षेपः ।

"विमतो भेदः परमार्थसत्यः, प्रतीयमानत्वे सति आब्रह्मज्ञानादबाध्यत्वात्,

---

आत्मवत् । नित्यमबाध्यस्याऽत्मन आब्रह्मज्ञानादबाध्यत्वमस्त्येवेति न साधन-विकलता । नच वाच्यं क्वापि भेदप्रतीतिर्नास्तीति । सर्वव्यवहारविलोप-प्रसङ्गात् । नह्यद्वैतवादिनाऽपि स्वसिद्धान्तपरसिद्धान्तयोर्दूष्यदूषकयोर्विद्या-ऽविद्ययोः स्वपत्नीजनन्योर्विवेको नेष्यते । अथास्ति चेद्भेदप्रतीतिः सा किं निष्कारणा, किं निर्विषया, किं बाधितविषया? नाऽद्यः । कार्यस्य कारणावश्य-म्भावात् । न द्वितीयः । निर्विषयत्वे ज्ञानत्वव्याघातात् । न तृतीयः । बाधा-दर्शनात् । नहि घटपटादिभेदं निषेधत् प्रत्यक्षमागमं वा प्रतीमः । 'नेह नाना' इति श्रुतेस्तु स्वगतभेदवर्जने तात्पर्यमुक्तम् । 'एकमेवाद्वितीयम्' इति श्रुतेश्च समाभ्यधिकराहित्ये तात्पर्यमुक्तम् । नतु सजातीयविजातीयभेदवर्जने । यथोक्तम्– "यथा चोळनृपः सम्राडद्वितीयोऽस्ति भूतले । इति तत्तुल्यनृपतिनिवारणपरं वचः । नतु तत्पुत्रतद्भृत्यकलत्रादिनिवारकम्" इति । 'अग्रे' इति कालादेः सत्त्वावगमाच्च । किञ्च किं बाधकप्रमाणं भेदस्यैव ग्राहकम्, किं भेदाभावस्यैव, किं वा यस्य कस्यचित्? नाद्यान्तिमौ । विरोधाभावात् । न द्वितीयः । भेदस्यैव स्थिरीकरणात् । भेदाभावोऽपि भेदाद्भिन्न एव सिद्ध्यति । अन्यथा तदसिद्धेः । सर्वप्रमाणं खलु प्रमाणाभासविषयात् स्वविषयं व्यावृत्तमेव व्यवस्थापयति । तथाच दुस्त्यजो भेदः । मोक्षेऽपि भेदस्य श्रुतत्वात् सत्यो भेदः । "सह ब्रह्मणा विपश्चिता" इति सहोक्त्या स्पष्टं भेदावगमाद्भेदसिद्धिः ।

"अयं भेदप्रपञ्चः सत्यः प्रामाणिकत्वात्, ईश्वरवदित्यन्वयव्यतिरेकी । अयं भेदः स्वस्वेतरवृत्तित्वानाक्रान्ताबाध्यनिष्ठाधिकरणम्, मेयत्वात्, आत्म-वत् । ननु पक्षवृत्तित्वाभावे पुनस्तद्वानित्युक्ते व्याघातः । पक्षेतरवृत्तित्वाभावे चाप्रसिद्धविशेषणत्वं स्यात् । उभयत्राभावे व्याघाताप्रसिद्धविशेषणत्वे दुर्वारे स्त इति । मैवम् । यथा पक्षवृत्तिधर्मेषु पक्षवृत्तित्वं नाम धर्मः, पक्षेतरवृत्तिधर्मेषु पक्षेतरवृत्तित्वं नाम धर्मः, एवं ये पक्षे तदितरस्मिन् वर्तन्ते तेषु पक्षतदितर-वृत्तित्वं नाम धर्मः । तदत्यन्ताभावः स्वस्वेतरवृत्तित्वानाक्रान्तत्वम् । तद्वांश्च स्वस्वेतरवृत्तित्वानाक्रान्तः स चासावबाध्यनिष्ठश्च । तेन स्वस्वेतरवृत्तित्वा-त्यन्ताभाववदबाध्यनिष्ठधर्मवान् पक्ष इति प्रतिज्ञार्थः स्यात् । तथाच न

व्याघातः । पक्षमात्रवृत्त्यबाध्यनिष्ठधर्मसिद्ध्याऽपि प्रतिज्ञावाक्यस्योपपन्नत्वात् । नचाप्रसिद्धविशेषणत्वम् । पक्षमात्रनिष्ठधर्मात्यन्ताभावपक्षान्योन्याभावयोः पक्षव्यतिरिक्तबाध्याबाध्यनिष्ठयोरुभयवादिसिद्धत्वात् । अयं च मेयत्वादिति हेतुः स्वस्वेतरवृत्तित्वानाक्रान्ताबाध्यनिष्ठधर्मवत्त्वं पक्षेऽवगमयन्नबाध्यत्वमन्तर्भाव्यैवावगमयति । एवं घटपटादिकं प्रत्येकं पक्षीकृत्य प्रयोक्तव्यम् । अयं भेदः अबाध्यत्वात्यन्ताभाववद्वृत्त्येतद्धर्मत्वानाक्रान्ताधिकरणम्, मेयत्वात्, घटवदिति । अत्राबाध्यत्वात्यन्ताभाववद्वृत्तयो य एतद्धर्मास्तेष्वबाध्यत्वात्यन्ताभाववद्वृत्त्येतद्धर्मत्वं नाम धर्मः । तदत्यन्ताभाववान् धर्मः पक्षे साध्यते । स च पक्षेऽबाध्यत्वमनधिगम्य न शक्योऽधिगन्तुम् । इयं भूः अबाध्यत्वव्यतिरिक्तैतद्धर्मत्वरहिताधिकरणम्, मेयत्वात्, सम्मतवत् । अत्र चाबाध्यत्वव्यतिरिक्तैतद्धर्मेष्वबाध्यत्वव्यतिरिक्तैतद्धर्मत्वं नाम धर्मः । तद्रहितश्च पक्षावृत्तिर्वा, अबाध्यत्वं वा । तत्र प्रथमः पक्षो नोपसंहर्तुं शक्यः । पक्षावृत्तिः पक्षे वर्तत इति व्याघातात् । तस्मात् द्वितीय एवाबाध्यत्वं पक्षे सिद्ध्यति । अयं प्रपञ्चः सम्प्रतिपन्नैतद्धर्मत्वानाक्रान्ताधिकरणम्, मेयत्वात्, सम्मतवत् । अत्र च सम्प्रतिपन्नैतद्धर्मेषु सम्प्रतिपन्नैतद्धर्मत्वं नाम धर्मः । तदनाक्रान्तश्च पक्षवृत्तित्वरहितो वा विप्रतिपन्नमबाध्यत्वं वा । प्रथमो व्याहतत्वान्न पक्षे सिद्ध्यति । तेन पक्षे विप्रतिपन्नाबाध्यत्वसिद्धिरिति । अयं भेदः भेदत्वात्यन्ताभावाबाध्यत्वान्यतराधिकरणम्, मेयत्वात्, घटवत् । भेदत्वात्यन्ताभावाबाध्यत्वान्यतरः भेदत्वात्यन्ताभावो वाऽबाध्यत्वं वा । आद्यः पक्षे व्याहतत्वान्न सिद्ध्यतीति अबाध्यत्वसिद्धिः । यद्वा, सामान्यतोऽयं पक्षः एतन्निष्ठात्यन्ताभावाबाध्यत्वान्यतराधिकरणम्, मेयत्वात्, सम्मतवत् । अयं पक्षः एतदन्योन्याभावात्यन्ताभावाबाध्यत्वात्यन्ताभावान्यतररहितः, मेयत्वात्, सम्मतवत् । अत्र चैतदन्योन्याभावात्यन्ताभाववति पक्षे तद्रहितत्वं व्याहतमिति एतदन्योन्याभावात्यन्ताभावाबाध्यत्वात्यन्तभावान्यतररहितत्वं पक्षे सिद्ध्यदबाध्यत्वमन्तर्भाव्यैव सिद्ध्यतीत्यबाध्यत्वसिद्धिः । अयं प्रपञ्चः एतन्निष्ठाबाध्यत्वात्यन्ताभावरहितः, मेयत्वात्, सम्मतवदिति । एतन्निष्ठश्चासावबाध्यत्वात्यन्ताभावश्चेति समासः । नचात्र विडम्बनावकाशः । अस्यार्थस्य श्रुतिसिद्धत्वात्।

एवञ्च सत्यस्य विश्वस्य[1] परमार्थतः कर्ता परमात्मा । तथाहि श्रूयते –
"असत्यमाहुर्जगदेतदज्ञाः शक्तिं हरेर्ये न विदुः परां हि ।
यः सत्यरूपी[2] जगदेतदीदृक् सृष्ट्वा त्वभूत्सत्यकर्मा महात्मा" इति[3] ।
"यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्म" (तै. ३.१.) इति । "एष सर्वेश्वर एष सर्वज्ञ एष सर्वान्तर्याम्येष योनिः सर्वस्य" (माण्डू. १.६.) इति च । "जन्माद्यस्य यतः" (ब्र. सू. १.१.२.) इत्यादिश्रुतिसूत्रैश्चेति संक्षेपः ।। * ।। * ।।

[4]इति श्रीमदखण्डवेदमार्गप्रवर्तकाचार्यनिखिलतार्किकचूडामणिसर्वतन्त्रस्वतन्त्र-
श्रीमद्राजेन्द्रतीर्थश्रीचरणकमलचञ्चरीकश्रीविष्णुदासार्यविरचितायां
वादरत्नावल्यां प्रथमः सरः

तस्माद्विश्वं परमार्थतः सत्यमिति सिद्धम् । एवमन्येऽपि हेतवो निराकरणीया इत्यलं विस्तरेण ।"

महानयं ग्रन्थभागः बहुशो मूलकोशेषु न दृश्यते । द्वित्रेष्वेव क्वचन कोशेषु परं दृश्यते । प्रतिपदं प्रतिवाक्यं च पदवाक्याभ्यां प्रतिपादयन्ती प्रौढा ग्रन्थकृत्परिपाटी पुनरत्र पुनरुक्तिबहुला क्रमविधुरा च प्रतीयते ।

१ "एवं चास्य विश्वस्य" इति क. पाठः ।

२ भाष्ये पुनः "यः सत्यरूपं जगदेतदीदृक्" (ब्र. भा. २.१.१८.) इति पाठः पठितः । स एव च स्वरसः । परन्त्वत्र सर्वत्रापि पुस्तकेषु हस्तलिखितेषु "सत्यरूपी" इत्येव पाठो दृश्यते ।

३ अनुपलब्धाकरं वचनमिदं श्रौतमिव भाति । "इत्यादिश्रुतिसूत्रैश्च" इति वदतो ग्रन्थकृतोऽप्यस्य श्रुतित्वमनुमतम् । तृतीयसरस्य चाऽदौ परमोपनिषद्गतमिदमिति सनामनिर्देशं स्फुटतरमेवाऽह । परन्तु भाष्यदीपिकाकृत् जगन्नाथयतिः "स्मृतिवाक्यमिदम्" (४४०तमे पत्रे) इति जगाद ।

४ क्वचिदेवं पाठः – "इति श्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापनाचार्यपरवादिमहागजपञ्चानन (सर्वतन्त्रस्वतन्त्र) श्रीमद्राजेन्द्रतीर्थश्रीचरणपरिचर्याचतुरषड्दर्शनीवल्लभश्रीविष्णुदासाचार्यविरचितायां" इत्यादि ।

द्वितीयः सरः

ननु जीवेभ्यः परमार्थतोऽन्यः परमात्मेति तु कुतः? श्रुतिस्मृतीतिहास-पुराणैर्मोक्षेऽपि जीवब्रह्मणोर्भेदस्य प्रमितत्वादिति तावद्ब्रूमः । तथाह्याथर्वणे (३.१.३.) श्रूयते –

"यदा पश्यः पश्यते रुग्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ।"

अत्र साम्यस्य भेदसमानाश्रयत्वात् भेदः प्रतीयते । 'निरञ्जन' इत्यनेन परम-मुक्तित्वं चावगम्यते ।

तैत्तिरीये (२.१.) "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता ।" अत्र सहोक्त्या स्पष्टो भेदोऽवगम्यते । "एतमानन्दमयमात्मानमुपसंक्रम्य । कामान्नी कामरूप्यनुसञ्चरन् । एतत्साम गायन्नास्ते" (तै. ३. १०. ५.) । अत्रापि स्पष्टो भेदोऽवगम्यते[1] । "अस्माल्लोकात्प्रेत्य" (तै. ३. १०. ५.) इति विदेहवचनात्परममुक्तित्वं चावगम्यते ।

"परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते । स तत्र पर्येति जक्षन् क्रीडन् रममाणः" (छा. ८.१२.३.) इत्यत्र सामीप्यादिप्राप्त्या भेदोऽवगम्यते । 'स्वेन रूपेण' इत्याद्युक्त्या परममोक्षत्वं च । फलाध्याये सूत्रकृता भाष्यकृता च सूत्रैः श्रुतिभिश्च मोक्षेऽपि भेदभोगादेः[2] समर्थितत्वाच्च । तथाहि –

"सम्पद्याविर्भावः स्वेन शब्दात्" (ब्र. सू. ४.४.१.) "स य एवंविदेवंमन्वान एवंपश्यन्नात्मानमभिसम्पद्यतेनाऽत्मना यथा कामं सर्वान् कामाननुभवति" इति

---

१ "भेदो गम्यते" इति ख. पाठः ।

२ "भोगभेदादेः" इति ग. पाठः ।

सौपर्णश्रुतिः (ब्र. भा. ४.४.१.) । "मुक्तः प्रतिज्ञानात्" (ब्र. सू. ४. ४. २.) "अहरहरेनमनुप्रविशत्युपसंक्रमते[1] च न तत्र मोदते न प्रमोदते न कामाननुभवति बद्धो ह्येष तदा भवति । अथ यदेनं मुक्तोऽनुप्रविशति मोदते च प्रमोदते च कामांश्चैवानुभवति" इति बृहत्श्रुतौ प्रतिज्ञानात् (ब्र.भा. ४.४.२.) । "एवमप्युपन्यासात्" (ब्र. सू. ४.४.७.) इति । "स वा एष एतस्मान्मर्त्याद्विमुक्तश्चिन्मात्रीभवत्यथ तेनैव रूपेणाभिपश्यत्यभिशृणोत्यभिमनुतेऽभिजानाति[2] तामाहुर्मुक्तिः" इति सौपर्णश्रुतौ चिन्मात्रेणाप्युपन्यासात् (ब्र.भा. ४.४.७.) । ब्रह्मवैवर्ते च – "स्वप्नस्थानां यथा भोगो विना देहेन युज्यते । एवं मुक्तावपि भवेद्विना देहेन भोजनम् । स्वेच्छया वा शरीराणि तेजोरूपाणि कानिचित् । स्वीकृत्य जागरितवद्भुक्त्वा त्यागः कदाचन ।" इति (ब्र. भा. ४.४.१४.) । "जगद्व्यापारवर्जम्" (ब्र. सू. ४.४.१७) "प्रकरणादसन्निहितत्वाच्च" (ब्र. सू. ४.४.१८.) । वाराहे च – "स्वाधिकानन्दसम्प्राप्तौ सृष्ट्यादिव्यापृतिष्वपि । मुक्तानां नैव कामः स्यादन्यान् कामांस्तु भुञ्जते" इति (ब्र. भा. ४.४.१८.) । "स एष एतस्मिन् ब्रह्मणि सम्पन्नो न जायते न म्रियते न हीयते न वर्धते स्थित एव सदा भवति दर्शन्नेव ब्रह्म दर्शन्नेवाऽत्मानं तस्यैवं दर्शतो नाऽपत्तिर्न विपत्तिः"[3] इति जाबालश्रुतिः[4] (ब्र. भा. ४. ४. २१.) "भोगमात्रसाम्यलि-

---

१ "उपसंक्रमे च" इति भाष्यसम्मतः पाठः । अहरहः सुप्तौ । उपसंक्रमे च प्रलये भगवत्प्रवेशेऽपि न मोदादिकम् । बद्धत्वात् । "सुखं स्वरूपभूतं यदानन्द इति कीर्तितम् । मुन्नाम विषयोत्थं यत्प्रकृष्टविषयात्प्रमुत्" इति तत्त्वप्रदीपोदाहृतं महामीमांसावचनं मोदप्रमोदयोरर्थविशेषं स्फुटमाह ।

२ "अभिविजानाति" इति भाष्यसम्मतः पाठः ।

३ "आपत्तिरविद्यमानस्याऽगमः । विपत्तिर्विद्यमानस्य विगमः" इति तत्त्वप्रदीपे ।

४ इत्याह जाबालश्रुतौ" इति भाष्यपाठः । इतः परं ग. पुस्तके – "आत्मेदं शरीरं निहत्याविद्यां गमयित्वाऽन्यन्नवतरं कल्याणतमं रूपं कुरुत इति श्रुतेः" इत्यधिकम् । नेयं भाष्योदाहृता श्रुतिः । भाष्यप्रतीकग्रहणमध्ये नातीव च स्वरसप्रवेशमर्हति ।

ङ्गाच्च" (ब्र.सू.४.४.२२.) "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता"[1] (तै. २. १.) "एतमानन्दमयमात्मानमनुविश्य न जायते न म्रियते न ह्रसते न वर्धते यथाकामं चरति यथाकामं पिबति यथाकामं रमते" (ब्र.भा. ४.४.२२.) इत्यादिश्रुतिसूत्रैर्मोक्षेऽपि जीवब्रह्मणोर्भेददर्शनात्[2] । एतद्व्यतिरिक्ता निर्गुण-मुक्तिरस्तीति प्रलापस्त्वप्रामाणिकत्वान्निर्भर्त्सनीयः ।

एवमनेकास्वप्युपनिषत्सु भेदः सिद्धः– ("स य एवंविदेवंमन्वान एवं-पश्यन्नात्मानमभिसम्पद्यतेनाऽत्मना यथाकामं सर्वान् कामाननुभवति" इति सौपर्णश्रुतिः[3] ।) "इमां घोरामशिवां नदीं तीर्त्वैतं सेतुमाप्येतेनैव सेतुना मोदते प्रमोदत आनन्दी भवति" इति च मौद्गल्यश्रुतिः[4] । एवमीशावास्यमाण्डूक-काठकतलवकाराथर्वणषट्प्रश्नतैत्तिरीयबृहदारण्यकच्छान्दोग्योपनिषदश्च दशापि जीवब्रह्मणोर्भेदं गमयन्तीति संक्षेपः । ग्रन्थविस्तरभयान्नेह लिख्यन्ते[5] ।

माण्डूकोपनिषदि (१.६.) "एष सर्वेश्वर एष सर्वज्ञ एष सर्वान्तर्याम्येष योनिः सर्वस्य" इति । काठके (२.५.१३.) च –

"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ।"

आथर्वणोपनिषदि (३.१.१.) –

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ।"

---

१ नेयमपि श्रुतिर्भाष्योदाहृता । भाष्यार्थपूरकतया स्वयमेव ग्रन्थकृता समुदाहृता भवेत् । भाष्ये यावन्ति वचनानि निरूपितानि न तावन्त्येव सूत्रे विषयसमर्पकाणि । किन्तु तत्समानार्थकान्यन्यान्यपि । अनन्तवेदार्थनिर्णायकत्वा-त्प्रतिसूत्रं ब्रह्ममीमांसाशास्त्रस्य ।

२ "जीवब्रह्मणोर्मोक्षेऽपि भेददर्शनात्" इति क. ख. पाठः ।

३ बहुपाठेषु श्रुतिरियमत्रोदाहृता । परन्तु सम्प्रत्येव सकृदुदाहृतेति पुनरप्यत्रोक्तिर्नाति हि सामीचीन्यमावहति । क्वचित्पुस्तके त्वेतन्न पठितम् ।

४ "इति मौद्गलश्रुतिः" इति ग. पाठः ।

५ "न लिख्यते" इति क. ख. पाठः ।

भागवते (११.११.६-७.) चैवं व्याख्यातम् –

"सुपर्णावेतौ सयुजौ[1] सखायौ यदृच्छया कृतनीडौ च वृक्षे ।
एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान् ।
आत्मानमन्यं च स वेद विद्वानपिप्पलादो नतु पिप्पलादः ।
योऽविद्ययाऽन्धः सतु नित्यबद्धो विद्यामयो यः सतु नित्यमुक्तः"
इति ।

तत्रैवाऽथर्वणे (३.१.२.)–

"समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः" इति ।

श्वेताश्वतरोपनिषदि (१.६.)–

"पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति" इत्युक्तम् ।

नच वेदोऽनृतवादी[2] । अपौरुषेयत्वेन वेदस्य[3] दोषशङ्काकलङ्कराहित्यात् । सिद्धे व्युत्पत्तेः स्वतः प्रामाण्यस्य चाऽवयोः समत्वात् । अयं भेदोऽनुवाद एवेति चेत्, मैवमन्याय्यं भाषिष्ठाः। किमनुवादचिह्नसद्भावादनुवाद इत्युच्यते? उत भेदग्राहिप्रत्यक्षैकार्थत्वात्? किंवा भेदत्वसाम्यात्? नाऽद्यः । असिद्धेः । नहि भेदश्रुतौ यद्वृत्ताद्यनुवादचिह्नं प्रतीयते । नापि योऽयं प्रत्यक्षसिद्धो भेद इति श्रूयते । द्वितीयोऽप्यसिद्धः । जीवादीशधर्मिकभेदस्य प्रत्यक्षागोचरत्वात् । भेदो हि धर्मिग्राहकप्रमाणग्राह्यः । धर्मी चेश्वरो वेदैकगम्यः । अतस्तद्भेदोऽपि वेदैकगम्यः । श्रुतिस्तु स्वमहिम्नैव भेदं प्रतिपादयति । दैवादितिहासादिसंवादेऽपि नानुवादकत्वम् । तस्या अपूर्वार्थत्वात् । तथोक्तं स्मृत्यधिकरणे भवनाथेन – "सापेक्षानुवादे हि न प्रमितिः । नतु दैवादनुवादेऽपि । धारावाहिकज्ञानवत्" इति । नापि तृतीयः । अतिप्रसङ्गात् । यदि घटपटभेदो[4]ऽध्यक्षसिद्ध इति भेदत्व-

---

१ "सदृशौ" इति विजयध्वजसम्मतः पाठः । "चिदानन्दत्वेन सदृशौ" इति हि तद्व्याख्यानम् । तत्त्वप्रदीपे तु "सयुजौ" इत्येव पठितम् ।

१ "अनृतवाची" इति क. ख. पाठः ।

२ "वेदस्य" इति नास्ति ग. पाठे ।

३ "भेदोऽप्यध्यक्षसिद्ध" इति ख. पाठः ।

साम्यादीशभेदस्य प्रतिपादिकायाः श्रुतेरप्यनुवादकत्वं स्यात्,[1] तर्हि स्वस्मात् घटस्यैक्यमप्यध्यक्षसिद्धमिति तत्साम्यात् जीवब्रह्मैक्यप्रतिपादिकायाः श्रुतेरप्यनुवादकत्वं स्यात् । घटैक्यमेवाध्यक्षसिद्धम्, न जीवब्रह्मैक्यमिति चेत्[2], तर्हि घटपटभेद एव प्रत्यक्षसिद्धः, जीवब्रह्मभेदस्तु वेदैकगम्य इत्यलं विस्तरेण ।। * ।।

नच भेदश्रुतेरैक्यश्रुतिविरोधः । ऐक्यश्रुतेः सावकाशत्वात् । भेदश्रुतेस्त्वसञ्जात[3]विरोधित्वात्प्राबल्यम् । एवमुपजीव्यत्वात्, अविरुद्धार्थत्वात्[4], बहुत्वाच्च प्राबल्यम्; सगुणविद्यावदिति । नच शुष्कतर्कविरोधः शङ्कनीयः । तर्काप्रतिष्ठानात्[5] । "नैषा तर्केण मतिराऽपनेया" (का. १. २. ९.) इति श्रुतेश्च । यद्यपि स्वगतभेदवर्जितः परमात्मा । अथापि जीवजडात्मकात् प्रपञ्चादत्यन्तभेद एवास्ति सत्यः परमात्मनः । "सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा सत्यं भिदा" इति भाल्लवेयश्रुतेः । "आत्मा हि परमः स्वतन्त्रोऽधिगुणो जीवोऽल्पशक्तिरस्वतन्त्रोऽवरः" इति चोत्तरत्र भाल्लवेयश्रुतौ[6] । स्मर्यते च –

---

१ "अनुवादकत्वं तर्हि" इति क. पाठः ।

२ "न ब्रह्मैक्यमिति चेत्" इति ग. पाठः ।

३ "भेदश्रुतेरसञ्जात–" इति क. पाठः । "भेदश्रुतेरनुपसञ्जात–" इति ग. पाठः ।

४ "अविरुद्धत्वात्" इति ग. पाठः । "अविरुद्धार्थत्वादपि बहुत्वात्" इति ख. पाठः ।

५ "तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयम्"इत्यादि ब्रह्ममीमांसा (२.१.१२.) वचनम् ।

६ "उत्तरभाल्लवेयश्रुतेश्च" इति ग. पाठः । "उत्तरत्र भाल्लवेयश्रुतेश्च" इति क. पाठः । नन्विदं भाष्यविरुद्धम् । कथम्? उत्तरश्रुतेः भाल्लवेयश्रुतित्वेऽपि "सत्य आत्मे"ति पूर्ववचनस्य पैङ्गिश्रुतिगतत्वमुक्तं भाष्ये (१.२.१३.) । तत्कथमिदमेवमत्रोच्यते, उभयमपि भाल्लवेयश्रुतिवचनमिति? नैष दोषः । नहीयं पैङ्गिश्रुतिरित्येतावता न भाल्लवेयश्रुतिरिति भवति । पैङ्गिनोऽप्येवं पठन्ति । भाल्लवेया अपि । तद्यथा 'द्वा सुपर्णा' इति आथर्वणेऽपि पठ्यते । श्वेताश्वतरोप-

"यथेश्वरस्य जीवस्य भेदः सत्यो विनिश्चयात् ।
एवमेव हि मे वाचं सत्यां कर्तुमिहार्हसि ।"
"यथेश्वरश्च जीवश्च सत्यभेदौ परस्परम् ।
तेन सत्येन मां देवास्त्रायन्तु सहकेशवाः" इति[१] ।
"जीवानां चैव विष्णोश्च यो न वेत्ति भिदां पराम् ।
तदनुव्रताश्च ये केचित्तेषां ज्ञानं न जायते" इति ब्रह्मवैवर्ते ।
"जीवेश्वरभिदा चैव जीवभेदः परस्परम् ।
जडेश्वरभिदा चैव जडभेदस्तथैव च ।
जडजीवभिदा चैव सत्योऽयं भेदपञ्चकः ।
न कदाचिन्निवर्त्योऽयं मुक्तौ संसार एव च ।
य एतदन्यथा ब्रूयुस्ते हि यान्त्यधरं तमः" इति भविष्यत्पर्वणि ।
"सर्वस्माद्भिन्नमीशेशं जीवाभेदेन यः स्मरेत् ।
स यात्यन्धं तमो घोरं नित्यातिशयदुःखदम् ।
सर्वोत्तमं तु यो विष्णुं भिन्नं जानाति सर्वतः ।
नित्यानन्दमसौ याति वासुदेवप्रसादतः" इत्यैतरेयसंहितायाम् ।
"ऐकात्म्यं नाम यदिदं केचिद्ब्रूयुरनैपुणाः ।
शास्त्रतत्त्वमविज्ञाय तथावादबला जनाः ।
कामक्रोधाभिभूतत्वादहङ्कारवशं गताः ।
वैगुण्यमेव पश्यन्ति न गुणानि नियुञ्जते ।

निषदि च । 'नेह नाने'ति काठकेऽपि पठ्यते । आरण्यके च । नहि 'द्वा सुपर्णा' इति आथर्वणवचनमित्युक्ते न श्वेताश्वतरवचनमिति भवति । नहि 'नेह नानेति' काठकवचनमित्युक्ते नाऽरण्यकवचनमिदमिति भवति । तद्वदिहापि भवति । अतएव भागवततात्पर्ये (१.२.१३) भाल्लवेयवचनमिदमित्याह भाष्यकारोऽपि । कथमन्यथा स्वयमेव स्वव्याहतं व्याहरेत्?

५ "'यथेश्वरस्य जीवस्य' इति पाद्मे । 'यथेश्वरश्च जीवश्च' इति स्कान्दे" इति पण्डिताचार्यवचनम् ।

तषां तमःशरीराणां तम एव परायणम् ।
यतः स्वरूपतश्चान्यो जातितः श्रुतितोऽर्थतः ।
कथमस्मि स इत्येव सम्बन्धः स्यादसंहितः"[1] इति मोक्षधर्मे ।

---

१ दाक्षिणात्यपाठे शान्तिपर्वणि मोक्षधर्मपर्वणि २७५तमेऽध्याये पठिता इमे । औत्तरेयाणां पाठे २६९तमेऽध्याये पठिताः । उभयत्रापि पाठक्रमो भिन्नः । "यतः स्वरूपत" इति श्लोकश्च न दृश्यते । तथाचायमिदानीन्तनो मुद्रितः पाठः–

"ऐकात्म्यं नाम कश्चिद्धि कदाचिदुपपद्यते ।
शास्त्रं ह्यबुद्ध्वा तत्त्वेन केचिद्वादबलाज्जनाः ।
कामद्वेषाभिभूतत्वादहङ्कारवशं गताः ।
याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः ।
ब्रह्मस्तेना निरारम्भा दम्भमोहवशानुगाः ।
नैर्गुण्यमेव पश्यन्ति न गुणाननुयुञ्जते ।
तेषां तमःशरीराणां तम एव परायणम् ।" (श्लो. ५१-५४)

अत्र स्फुटवचनं मौलं पाठमन्यथयद्भिः "शास्त्रदस्यवः" इति विशेषणं सार्थकं कृतम् । एतत्पाठे त्वन्वयास्वारस्यं स्फुटमेव । अत एवोक्तमाचार्यैः –

"क्वचिद्ग्रन्थान् प्रक्षिपन्ति क्वचिदन्तरितानपि ।
कुर्युः क्वचिच्च व्यत्यासं प्रमादात्क्वचिदन्यथा ।"

अत्र किल "यतः स्वरूपत" इत्याद्यन्तरितम् । "ऐकात्म्यं नाम यदिदं" इत्यादि व्यत्यासि । "न गुणानि नियुञ्जते" इत्येतत् "न गुणाननुयुञ्जते" इत्यन्यथयद्भिः पाणिनिमात्रपरिचितैर्भ्रान्तैर्वैयाकरणकैः प्रामादि । अत्रापि ख. पुस्तके "न गुणान्विनियुञ्जते" इत्येव पठितम् । पाणिनिनयपरिमुग्धानामदृष्टमूलकोशानामेतत्साहसं क्षन्तव्यम् । "याथातथ्यमविज्ञाय" इत्येको मध्यगतः श्लोकः ग्रन्थकृताऽपठित इति भाति । अत्र—

"यतः स रूपतश्चान्यो जातितः श्रुतितोऽर्थतः ।
कथमस्मि स इत्येव सम्बद्धः स्यादसंहितः" इति भगवत्पादसम्मतः मूलपाठः ।

"अभेदश्चास्मदादीनां मुक्तानां हरिणा तथा ।
इत्यादि सर्वं मोहाय कथ्यते पुत्र नान्यथा"[1] इति स्कान्दे ।

सूत्रकृताऽपि सूत्रितम् – "भेदव्यपदेशाच्चान्यः" (१.२.२१.), "स्थित्यदनाभ्यां च" (१.२.७.), "मुक्तोपसृप्यव्यपदेशात्" (१.२.२.), "पृथगुपदेशात्" (२.३.२८.) इत्यादिसूत्रैः[2] ।

"भिन्नोऽचिन्त्यः परमो जीवसङ्घात्पूर्णः परो जीवसङ्घो ह्यपूर्णः ।
यतस्त्वसौ नित्यमुक्तो ह्ययं च बन्धान्मोक्षं तत एवाभिवाञ्छेत् ।"
इति कौशिकश्रुतेश्च[3] । अतो जीवेभ्योऽत्यन्तभिन्नः परमात्मेति सिद्धम् ।। * ।।

जीवब्रह्मणोरैक्यं[4] नास्त्येव । अप्रामाणिकत्वात् । ननु सन्ति[5] जीवब्रह्मणोरद्वैते "तत्त्वमसि" (छा. ६.८.७.), "एकमेवाद्वितीयम्"[6] (छा. ६.२.१.) इत्यादीनि वेदान्तवाक्यानि । अतः कथमुच्यते तदप्रामाणिकमिति? मैवम् । तेषां प्रतीतार्थे निरवकाशभेदश्रुतियुक्तिविरोधात्[7] । भेद एव सावकाश-

---

१ रुद्रः स्वपुत्रं स्कन्दं प्रतीदमाह ।

२ इदमुपलक्षणम् – "भेदव्यपदेशात्" (१.३.५.), "इतरपरामर्शात्स इति चेन्नासम्भवात्" (१.२.१८.), "जीवमुख्यप्राणलिङ्गादिति चेत्तदुक्तम्" (१.४.१८.), "जगद्व्यापारवर्जम्" (४.४.१७.), "अधिकं तु भेदनिर्देशात्" (२.१.२३.), शारीरश्चोभयेऽपि हि भेदेनैनमधीयते" (१.२.२०.), "अनुपपत्तेस्तु न शारीरः" (१.२.३.), "नेतरोऽनुपपत्तेः" (१.१.१६.), "भेदव्यपदेशाच्च" (१.१.१७.), "अस्मिन्नस्य च तद्योगं शास्ति" (१.१.१९.) इत्यादिसूत्रान्तराणाम् ।

३ "इति सोपपत्तिककौशिकश्रुतेश्च" इति क. पाठः । भाष्येऽपि (२.३.२८.) इयमानुपूर्वी दृश्यते ।

४ "ब्रह्मजीवयोरैक्यम्" इति ख. पाठः ।

५ "नास्त्येव । ननु सन्ति – " इति ग. पाठः ।

६ "अद्वितीयं ब्रह्म" इति ख. पाठः ।

७ "भेदश्रुतिविरोधात्" इति ग. पाठः ।

त्वाच्च[1] । तथाहि – "भिन्नोऽचिन्त्यः परमो जीवसङ्घात्", "तयोरन्यः पिप्पलं स्वाद्वत्ति" (आ. ३.१.१.; श्वे. ४.६.), "पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति" (श्वे. १.६.), "परमं साम्यमुपैति" (आ. ३.१.३.), "सह ब्रह्मणा विपश्चिता" (तै. २.१.), "जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः" (आ. ३.१.२.; श्वे. ४.७.) इत्यादिनिरवकाशश्रुतिविरोधस्तु दुष्परिहरः ।

नच भेदोऽनूद्यत इति वाच्यम् । जीवप्रतियोगिकेश्वरभेदस्य श्रुत्येकगम्यत्वात् । नचेदृशेऽर्थे "पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्" (पू. मी. ६.५.५४.) इति नयावकाशः । भेदाभेदयोरत्यन्तविरोधादन्यतरस्यात्यन्ताप्रामाण्यप्रसङ्गात् । "तत्रह्येकैकशो निमित्तद्वयं सावकाशम्" इति भवनाथोक्तेः । वरदराजीये विवृतं चैतत्[2] — "तत्रोद्गातृप्रतिहर्त्रपच्छेदनिमित्तयोरदक्षिणसर्वस्वदानशास्त्रयोरेकैकशः केवलोद्गात्रपच्छेदप्रयोगे केवलप्रतिहर्त्रपच्छेदप्रयोगे च सिद्धप्रमाणभावत्वात्, क्वचित्प्रयोगे निमित्तद्वये च सति नैमित्तिकयोः समुच्चयानर्हयोरवश्यम्भाविन्यन्यतरबाधे च, निमित्तस्वाभाव्यात् पूर्वबाधेऽपि न सर्वथा तस्य बाधः । अन्यत्र तस्य सावकाशत्वात् । इह तु न तथेति वैषम्यम्" इति । तस्मात्पूर्वमेवोपक्रमाधिकरणन्यायेन बलीयोऽनुपसञ्जातविरोधित्वादित्येवमेव युक्तम् ।

अन्यथा युक्तिविरोधश्च दुष्परिहरः । तथाहि – जीवब्रह्मणोरैक्यं तथ्यं मिथ्या वा? आद्येऽपि ब्रह्मणो भिन्नमभिन्नं वा? नाऽद्यः । सदद्वैतभङ्गप्रसङ्गात् । न द्वितीयः । नित्यसिद्धब्रह्मस्वरूपत्वे शास्त्रावेद्यतापातात् । सिद्धार्थबोधकत्वेन शास्त्रस्य वैयर्थ्यापातात् । अप्राप्ते[3] शास्त्रमर्थवदिति न्यायात्[4] । नाऽद्यद्वितीयः । ऐक्यस्य मिथ्यात्वे तत्प्रतिपादकानां तत्त्वमस्यादिवाक्यानामतत्त्वावेदकत्वप्रसङ्गात् । तद्विरुद्धस्य भेदस्य सत्यतापाताच्च ।

---

१ "सावकाशत्वात्" इति ग. पाठः ।

२ विवृतं चैवम्" इति क. ख. पाठः ।

३ "अप्राप्ते हि" इति क. ख. पाठः

४ "न्यायः" इति क. ग. पाठः ।

"एकमेवाद्वितीयम्" श्रुत्यर्थः

तत्र भेद एव "तत्त्वमसि" इति वाक्यस्य विंशतिरर्थाः कथयिष्यन्ते । "एकमेवाद्वितीयम्" इति श्रुतेस्तु भेद एव सप्तार्थाः सन्तीत्युक्तं खण्डनखण्डने –

"एकमित्यस्य सप्तार्थाः स्वाभेदस्य हि वाचि तत् ।
अन्यप्रधानासाहाय्यसङ्ख्याऽऽद्यसमवाचि च ।"

एकमिति स्वगतभेदवर्जितमिति परेणापि व्याख्यातम् । अन्येऽपि षडर्था विद्वत्प्रसिद्धाः । "एको गोत्रे" (पा. सू. ४.१.९३.) इत्यत्र कय्यटः – "एकशब्दोऽयमन्यप्रधानासहायसङ्ख्याप्रथमसमानवाची" इति । तत्र "एकमेव" इत्यस्य स्वगतभेदवर्जने तात्पर्यम्; अद्वितीयमित्यस्य समाभ्यधिकराहित्ये तात्पर्यं शास्त्रे व्युदपादि[1] । स्मर्यते च –

"एक एवाद्वितीयोऽसौ हरिर्देवेषु सर्वदा ।
एक एवाद्वितीयोऽसावश्वमेधः क्रतुष्वपि ।
एक एवाद्वितीयोऽसौ तद्गभेदविवर्जनात् ।
समस्याभ्यधिकस्यापि ह्यभावात्पुरुषोत्तमः" इति ब्राह्मे ।

ननु चाद्वितीयमिति प्रकृतब्रह्म समानरहितमित्ययं[2] कुतोऽर्थोऽवगम्यते? अवधीयताम् – द्वितीयशब्दः प्रकृतसमानवाचीति व्युत्पत्तिसिद्धम् । तथोक्तं महाभाष्ये "अन्तराऽन्तरेण युक्ते" (पा. सू. २.३.४.) इत्यत्र – "अस्य गोर्द्वितीयेन भवितव्यमित्युक्ते सदृशो गौरेवोपादीयते । नाश्वो न गर्दभः[3]" इति । नञ्युक्तमन्यसदृशाधिकरणमिति[4] न्यायात् । प्रकृतब्रह्मसदृशं वस्तु नास्ती-

---

१ "शास्त्रेऽप्युपपादितम्" इति ग. पाठः ।

२ "समानरहित इत्ययम्" इति ख. पाठः । "समरहित इत्ययम्" इति ग. पाठः ।

३ इयं प्रचलिता महाभाष्यानुपूर्वी – "अस्य गोर्द्वितीयेनार्थ इति । गौरेवाऽनीयते । नाश्वो न गर्दभः ।"

४ विवृतं चैतत् 'अराजामनुष्यपूर्वे'ति पाणिनिवचनं व्याचक्षाणैर्वैयाकरणैः – राजपदभिन्नं राजपदसमानार्थकं चेनादिपदमराजपदगदितमिति ।

त्यर्थः ।। १ ।। एवं वाऽर्थः– अद्वितीयं स्वसमानरहितम् । एकमेव स्वोदरस्थेभ्यो जीवेभ्योऽन्यदेवाऽसीदिति ।। २ ।। एवं वाऽर्थः– एकमसहायमेव । तत्तेजोऽसृजतेत्यन्वयः ।। ३ ।। अथवा 'एकं' एकत्वसङ्ख्याक्रान्तं 'सत्' निर्दुष्टं 'इदमग्र आसीत्' इति ।। ४ ।। अथवा 'सत्' निर्दुष्टं त्वेकमेव प्रधानमेव ब्रह्म । नतु संसारि जीवाख्यं ब्रह्म । तच्च प्रधानं 'अद्वितीयम्' द्वितीयात् तत्त्वात् परमार्थतोऽन्यदेवेत्यर्थः ।

एकशब्दस्यानेकार्थत्वं[1] "ष्णान्ता षट्" (पा. सू. १.१.२४.) इत्यत्र महाभाष्येऽप्युक्तम् – "एकशब्दोऽयं बह्वर्थः । अस्त्येव सङ्ख्यापरः । अस्त्यसहायवाची । अस्त्यन्यार्थे[2] वर्तते – "सधमादो द्युम्न एकास्ताः"[3] । एका अन्या इत्यर्थः"[4] इति । अद्वितीयमिति पर्युदासो वा । यथोक्तं महाभाष्ये – "अनपुंसकस्येति पर्युदासोऽयम् । यदन्यन्नपुंसकादिति" । तथाऽत्र द्वितीयात् जीवप्रकृतिरूपात् तत्त्वात् यदन्यत् तदद्वितीयमित्यर्थः । पर्युदासपक्षे त्वेकवाक्यतालाभः । प्रसज्यप्रतिषेधे तु वाक्यभेदः[5] स्यात् ।। ५ ।।

अथवा 'एकं' आद्यं नारायणाख्यं ब्रह्मैव, 'अद्वितीयं' असहायम्; "तत्तेजोऽसृजत" इत्यन्वयः । द्वितीयशब्दः सहायवाची । "असिद्वितीयोऽनुससार पाण्डवम्" इति प्रयोगात् । महाभाष्येऽप्युक्तम् – "अनेकमन्यपदार्थे" (पा. सू. २.२.२४.) इत्यत्र – " 'असिद्वितीयः' असिसहाय इति गम्यते" इति ।। ६ ।। अथवा सत् 'एकमेव' सर्वावस्थासु निर्दुष्टतया समानमेव । जीवा एव दोषास्पदं

---

१ "एकशब्दानेकार्थत्वम्" इति क. ख. पाठः ।

२ "अस्त्यन्यार्थः" इति ग. पाठः ।

३ सधेति सहेत्यर्थेऽस्ति वैदिकं पदम् । सह पानेन माद्यन्ति सधमादः ।

४ एवं हि श्रूयते महाभाष्ये – "एकशब्दोऽयं बह्वर्थः । अस्त्येव सङ्ख्यापरः । तद्यथा – एको द्वौ बहव इति । अस्त्यसहायवाची । तद्यथा – एकाग्नयः, एकहलानि, एकाकिभिः क्षुद्रहलैर्जितमिति । असहायैरित्यर्थः । अस्त्यन्यार्थे वर्तते । तद्यथा – प्रजामेका रक्षत्यूर्जमेकेति । अन्येत्यर्थः । सधमादो द्युम्न एकास्ताः । अन्या इत्यर्थः ।"

५ एकत्वं विधीयते; द्वितीयश्च निषिध्यते इति वाक्यभेदः ।

नतु नानावतारं परं ब्रह्मेत्यर्थः[1] । तदाह सूत्रकारः – "न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि"[2] (ब्र. सू. ३.२.११.) इति ।। ७ ।। परमते त्वद्वितीयमिति ब्रह्मव्यतिरिक्तवस्तुमात्रप्रतिषेधे व्युत्पत्तिविरोधः । बहुप्रमाणविरोधश्च । 'अग्र' इति कालादेः सत्तावगमविरोधश्च । एकमेवेत्यादिपदवैयर्थ्यप्रसङ्गश्चेत्यलं परमतखण्डनेन ।। * ।। * ।।

"तत्त्वमसि" वाक्यार्थः

ननु च्छान्दोग्ये षष्ठे प्रपाठके "तत्त्वमसि" (छा. ६.८.७.) इति महावाक्यमद्वैते प्रमाणमस्ति । तत्कथं जीव[3]ब्रह्मणोरद्वैतमप्रामाणिकं स्यात्? मैवमविचारितरमणीयं भाषिष्ठाः । उपक्रमादिभिः "तत्त्वमसि" इत्युपदेशवाक्यस्य[4] भेदपरत्वात् । तथाऽऽह सूत्रकारः– "पृथगुपदेशाद्" (ब्र. सू.२.३.२८) जीवेभ्यः परमात्मा पृथगेव । "स आत्माऽतत्त्वमसि श्वेतकेतो" इति नवकृत्वोऽपि भेदोपदेशात् । एवं "भिन्नोऽचिन्त्यः परमो जीवसङ्घात्" ( ) इत्याद्युपनिषत्सूपदेशात् ।

नहि विरुद्धस्वभावयोर्जीवब्रह्मणोरैक्यं युज्यते । तथाहि—तच्छब्दस्य मुख्यार्थो हि यः "सदेव सोम्य" (छा. ६.२.१.) इत्यादिना प्रकृतस्तेजोऽबन्नादीनां स्रष्टा सत्यसङ्कल्पः सर्वज्ञः स्वतन्त्रः परमात्मा, त्वंपदार्थस्त्ववच्छिन्नज्ञानादिः प्रत्यक्षादिसिद्धो दोषकलुषितो[5] जीवः, तयोर्विरुद्धयोरनेन वाक्येनैक्य-

---

१ "नानावतारं ब्रह्मेति" इति ग. पाठः ।

२ स्थानापेक्षयाऽपि परमात्मनः न भिन्नं रूपम् । उभयमिति भिन्नम्; लिङ्गमिति रूपम् । "लिङ्गं स्वरूपमुद्दिष्टम्" इति हि स्मरन्ति । स्थानभेदः उभयत्वस्य लिङ्गं च न भवति । यतः "सर्वेषु भूतेष्वेतमेव" इति श्रुतिः सर्वत्रापि तद्रूपाणामभेदमेवाऽचष्टे । सर्वत्र च श्रुतिस्मृतीतिहासेषु रूपभेदाभावनिगदाच्च ।

३ "ब्रह्मजीवयोः" इति ख. पाठः ।

४ "उपदेशस्य" इति क. ख. पाठः ।

५ "दोषकल्मषितः" इति ग. पाठः ।

मुच्यते, उत विरुद्धभागत्यागलक्षणया वा? नाऽद्यः । परस्परविरोधेन योग्यताविरहे जरद्गवादिवाक्य[1]वदाभासत्वप्रसङ्गात् । त्वयाऽनङ्गीकाराच्च । कथं च विरुद्धधर्माक्रान्तयोः सतोरैक्यप्रतिपादने प्रत्यक्षविरोधः स्ववचनविरोधश्च न स्यात्?

नापि जहदजहल्लक्षणयेति द्वितीयः पक्षः । अशक्यत्वात् । तथाहि – विरोध्याकारपरित्यागो हि किं विवक्षाभावमात्रेण, उत तस्यानित्यत्वेन, अथ मिथ्यात्वेन? नाऽद्यः । तन्मात्रेण विरोधानिवृत्तेः । नहि क्षितिजलत्वाद्यविवक्षामात्रेण क्षितिजलयोरैक्यं वक्तुं युक्तम् । विरोध्याकारस्याविवक्षायामप्यनपायात् । न द्वितीयः । तथा सति 'तत् त्वं भविष्यसि' इति निर्देशः स्यात् । नत्वसीति वर्तमाननिर्देशः । किञ्चेशगुणनित्यत्वम् – "नित्यानन्दो नित्यज्ञानो नित्यबलः परात्मा"[2] ( ) इत्यादिश्रुतिभिर्निश्चीयते[3] । जीवधर्मनित्यत्वं च – "अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा" (बृ. ४.५.१४.) इत्यादिश्रुतिभिश्च, "तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जायन्ते नित्या एवाऽत्मनो हि ते"[4] ( ) इत्यादिस्मृतिभिश्च निर्णीतम् । अतस्तयोर्धर्मनित्यत्वस्य निश्चितत्वात्कथं त्यागः स्यात्? अत एव न तृतीयः । "पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" (श्वेता.६.८.),

---

१ तद्यथा – "जरद्गवः कम्बलपादुकाभ्यां
द्वारि स्थितो गायति भद्रकाणि ।
तं ब्राह्मणी पृच्छति रन्तुकामा
राजन् रुमायां लशुनस्य कोऽर्थः ।"

२ इदमाग्निवेश्यवचनमिति भाष्यादवगम्यते । तथाहि द्वितीयस्य तृतीये भाष्यम् (२.३.३२.) "नित्यानन्दो नित्यज्ञानो नित्यबलः परात्मा । नैवमसुराः । एवमनेवं च मनुष्याः इति ह्याग्निवेश्यश्रुतिः" इति ।

३ "इत्यादिभिर्निश्चीयते" इति क. पाठः ।

४ अस्य "यथोदपानकरणात् क्रियते न जलान्तरम्" इति पूर्वार्धेनान्वयः । क्वचित्तदपि पठ्यते ।

"सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये" (ऋ. १०.५५.६.) इत्यादिश्रुतिभिर्गुणसत्यत्वनिश्चयाच्च । तस्मान्नायमद्वैतोपदेशः ।

किञ्च मुख्यार्थासम्भवे हि लक्षणाश्रयणं युज्यते । सम्भवति चात्र भेद एव मुख्यार्थः । 'तत्' ऐतदात्म्यं 'त्वमसि', एतदन्तर्यामिक एतदीयो वा त्वमसीत्यर्थः । अथवा, 'आत्मा' तु 'स' एव 'त्वमतदसि' तस्मादन्योऽसीत्यर्थः । अथवा पदद्वयस्य लक्षणाश्रयणमयुक्तम् । "त्यजेदेकं कुलस्यार्थे" इति न्यायात् । एकपदलक्षणयैवास्मदिष्टार्थानां बहूनामत्र नवप्रकरण्यां सम्भवान्नायमद्वैतोपदेशः । उपक्रमादीनां भेद एवाऽनुगुण्याच्च । एवं खलूपदेशः – "ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा(ऽ)तत् त्वमसि श्वेतकेतो" (छा. ६.८.७.) इति । एष चासावात्मा च, तस्येदमैतदात्म्यम् । अथवा, 'एषः' अणिमा; 'आत्मा' नियामकतया स्थितः स विष्णुराप्तकामोऽन्तर्यामी[1] यस्य सर्वस्य तदेतदात्म, तदेवैतदात्म्यम्; एतदन्तर्यामिकमेतत्स्वामिकं चेत्यर्थः । आत्मशब्दस्त्वन्तर्यामिवाची –

"योऽयं सर्वेषु जीवेषु नियामकतया स्थितः[2] ।
स विष्णुराप्तकामत्वादात्मेत्येवोच्यते बुधैः" ( )

इत्याद्यनेकवाक्यतः । 'तत् सत्यम्' । 'सः' अणिमा 'आत्मा' अन्तर्यामी । 'त्वं तदसि' ऐतदात्म्यमसि, एतदन्तर्यामिकोऽसीत्यर्थः । अथवा 'स आत्मा', 'त्वं' तु 'अतदसि' तस्मादन्योऽसीत्यर्थः । अत्र "स आदेशो भवति" (छा. ६.१.६.) इत्युपक्रमात्, "ऐतदात्म्यम्" इत्युपसंहारत्, "अतत्त्वमसि", "अतत्त्वमसि" इति नवकृत्वोऽभ्यासात्, जीवादीशभेदस्य[3] प्रमाणान्तराप्राप्तत्वेनापूर्वत्वात्, "अथ सम्पत्स्यते" (छा. ६.१४.३.) इति फलश्रवणात्, "येनाश्रुतं श्रुतं

---

१ स किलाऽत्मा य आप्तकामश्चान्तर्यामी च । देवा अपि जीवान्तनियामकाः । न तावता त आत्मानो मुख्यतः । अनाप्तकामत्वात् । अन्यथा भोगार्थं मैत्रशरीरमाविष्टस्य ग्रहस्यापि मैत्रं प्रत्यात्मत्वं स्यात् । तदिदमुदितमुत्तरप्रमाणवचने – 'स विष्णुराप्तकामत्वादि'ति ।

२ हेतुगर्भमिदम् । नियामकतया स्थितत्वादाप्तकामत्वाच्चाऽत्मेति ।

३ "जीवादीश्वरभेदस्य" इति ख. पाठः ।

भवति" (छा. ६.१.३.) इत्यर्थवादात्, दृष्टान्तैर्भेदस्यैवोपपादनात् – एवं षड्विधतात्पर्यलिङ्गैर्जीवेशयोर्भेद एव तात्पर्यम्, नत्वभेद इति । सामसंहितायामुक्तत्वाच्च[1] ।

तत्त्वमसिश्रुतेर्भेदपरत्वम्

"तत्त्वमसी"तिवाक्यस्य[2] विंशतिरर्था भेद एव सम्मताः सन्तीत्युक्तं खण्डनखण्डने –

"कथ्यन्ते द्विदशा ह्यर्थाश्छन्दोगानां श्रुतेस्ततः ।
विदांकुर्वन्तु विद्वांसः सत्यां जीवेशयोर्भिदाम्" इति ।

अयं भावः – अद्वैतवादिभिः "तत्त्वमसि" इत्यत्र पदद्वयस्य लक्षणाश्रयणं कृतम् । तदसत् । एकपदस्यैवामुख्यार्थाश्रयणेन सम्यगर्थोपपत्तेः । तथाहि – यथा तण्डुलं प्रति "धान्यमसि धिनुहि देवान्" इति धान्याधीनोत्पत्तिके तण्डुले धान्यशब्दस्य लक्षणावृत्तिर्मीमांसकैराश्रिता तथा तत्त्वमसीत्येकपदलक्षणैवास्तु; तदधीनोत्पत्तिकोऽसीत्यर्थः सम्पद्यते ।। १ ।।

अथवा, शाखाचन्द्रन्यायेन त्वमेव तदसीत्युच्यते । यथा शाखासदेशगतश्चन्द्रः[3] शाखैव चन्द्र इत्युपदिश्यते तथा जीवान्तर्यामिभूतं[4] ब्रह्मांगुष्ठमात्रं जीवसमीपगतमिति 'तत् त्वमसि' इत्युपदिश्यते । एवं चैकपदस्यैव लक्षणेति[5] लाभः ।। २ ।।

---

१ सामसंहितावचनमुत्तरत्र ग्रन्थकृदेव वक्ष्यति श्रुत्यर्थोपसंहारे । क्वचित् पुस्तकान्तरेऽत्रापि पठितम् । तत्तु पुनरुक्तमिति नाऽदृतम् । नहि महान्तः क्रियासमभिहारेण प्रमाणरोमन्थमभ्यस्यन्ति ।

२ "महावाक्यस्य" इति ख. पाठः ।

३ "शाखासमीपगतश्चन्द्रः" इति ख. पाठः । "शाखादेशगतश्चन्द्रः" इति ग. पाठः ।

४ "जीवान्तर्यामिकम्" इति ग. पाठः ।

५ "लक्षणाश्रयणेति" इति ख. पाठः ।

अथवा, अतिदेशोऽयम् । 'तत् त्वमसि' तद्वदसीत्यर्थः । अन्तरेणापि वतिमतिदेशो भवति । यथोक्तं महाभाष्ये – "बहुगणवतुडतयः सङ्ख्यावद्भवन्ति[1] । तर्हि वतिनिर्देशः कर्तव्यः । नहि । कथमनुच्यमानं गम्यते । अन्तरेणापि वतिमतिदेशो गम्यते । अब्रह्मदत्तं ब्रह्मदत्तमित्याह; तेन वयं मन्यामहे ब्रह्मदत्तवदयं भवतीति ।" तथाच 'तत् त्वमसि' इत्यत्र तद्वत् त्वमसीत्यर्थ उपपन्नतरः । अन्यथा 'तत्त्वमसी'ति वाक्यमबोधकं स्यात् । यथोक्तं महाभाष्ये – "यो गामश्व इति ब्रूयान्न जातुचित् सम्प्रत्ययः स्यात्" इति । "अश्वधर्मसमारोपः केवलं प्रतीयते नतु तात्त्विकमश्वत्वम्" इति कय्यटः ।। ३ ।।

अथवा, "अन्नं ब्रह्म" (छा. ७.९.३.) इतिवत् तदिति प्रथमा सप्तम्यर्थे । "सुपां सुलुक्पूर्वसवर्णाच्छेयाडाडयायाजालः[2] (पा. सू. ७.१.३९.) इति सूत्रम् ।

---

१ "बहुगणवतुडति सङ्ख्या" (पा. सू. १.१.२३.) इति हि सूत्रम् । अत्र सङ्ख्यावदिति वक्तव्ये सङ्ख्येत्येव केवलमाह पाणिनिः । अत आह भाष्यकारः – 'अन्तरेणापि वतिमतिदेशो गम्यते' इति ।

२ अयमर्थः – सुपां स्थाने सु,लुक्, पूर्वसवर्ण, आ, आत्, शे, या,डा,डया, याच्, आल्, – एते आदेशाः स्युः । 'सु' इति प्रथमैकवचनम् । यथा "ऋजवः सन्तु पन्थाः" अत्र बहुवचनस्थाने एकवचनमिति वदन्ति । यथा वा पुराणप्रयोगः – "ब्रह्मापि तन्न जानाति ईषत् सर्वोऽपि जानते" अत्र सर्वेऽपीति वक्तव्ये सर्व इति सुः । "परमे व्योमन्", "पितरमस्य मूर्धन्" अत्र सप्तम्या लुक् । यथावा, "विष्णु स्रजिष्णु ग्रसिष्णु विवन्दे" इत्याचार्यप्रयोगः । अत्र हि सम्बुद्धेर्लुक् । पूर्वसवर्णो यथा – 'मत्या' इति वक्तव्ये मती इति । आ यथा – "न हिंस्यात् सर्वा भूतानि" । यथावा "भुवनानि विश्वा" । आत् यथा – नतमिति वक्तव्ये "नतात् ब्राह्मणम्" । यथा वा "यदह्नात् कुरुते पापं तदह्नात् प्रतिमुच्यते" । शे यथा – "चित्ति दक्षस्व सुभगत्वमस्मे" । या यथा – उरुणेति वक्तव्ये 'उरुया' । डा यथा – नाभाविति वक्तव्ये "नाभा पृथिव्याः" । डया यथा – अनुष्ठानेनेति वक्तव्ये अनुष्ठयेति – "ता अनुष्ठयोच्च्यावयतात्" । याच् यथा – साधु इति वक्तव्ये साधुया । आल् यथा– वसन्ते यजेतेति वक्तव्ये "वसन्ता यजेत" । तदेतदुक्तम् – "सुप्तिङुपग्रहलिङ्गनराणां व्यत्ययमिच्छति" इति ।

तस्मिन्नाधारबन्धने शकुनिरिव त्वं तिष्ठसीति मुख्य एवार्थः । "यत् सुन्वन्ति सामिधेनीस्तदन्वाहुः" इत्यत्र यदिति तदिति च प्रथमा सप्तम्यर्थे मीमांसकैराश्रिता । यत्र सुन्वन्ति तत्र हविर्धाने स्थित्वा सामिधेनीरनुब्रूयुरिति राद्धान्तितत्वात् ।। ४ ।।

अथवा, साहचर्यात् ताच्छब्दचम् । ब्रह्मसहचरो हि जीवो वेदप्रसिद्धः । तदेतत् 'तत् त्वमसि' तत्सहचरितस्त्वमसीत्युपदिश्यते । "वसन्तादिभ्यष्ठक्" (पा. सू. ४.२.६३.) वसन्तमधीते वासन्तिकः इत्यत्र महाभाष्यम् – "अयुक्तोऽयं निर्द्देशः । अधीत इति वर्तते । नच वसन्तो नामाध्ययनमस्ति । नैष दोषः । साहचर्यात् ताच्छब्दचं भविष्यति । वसन्तसहचरितमध्ययनं वसन्ताध्ययनम्" इति । "यत्र वसन्तो वर्ण्यते यद्वा वसन्तेऽधीयते तत्साहचर्यात् ताच्छब्दचं लभ्यते" इति कय्यटः[1] । तस्माद्युक्तमेकपदस्यैवामुख्यार्थत्वमिति ।। ५ ।।

अथवा, परमते 'तत् त्वमसि' इत्यत्र पदद्वयस्य लक्षणाश्रयणमयुक्तम् । तदित्येकपदगौणताश्रयणेनैव 'सिंहोऽसि त्वम्' इतिवद् व्याख्यानोपपत्तेः[2] । वस्तुतोऽन्यत्वेऽप्यात्मत्वादिरूपसामान्यात् तदेवासीत्युच्यते लोकवेदयोः । यथा प्रत्याहाराह्निके वार्तिकम् – "रूपसामान्याद्वा" ( ) इति । महाभाष्येऽप्युक्तम् – "अन्यस्मिंश्च रूपसामान्यात् तदेवेदमिति भवति" इति । वेदे च सारूप्यादिति न्यायेन प्रयोगः – "आदित्यो यूपः"[3] इति ।। ६ ।।

---

१ "इति च कय्यटः" इति ख. पाठः ।

२ "व्याख्योपपत्तेः" इति ग. पाठः ।

३ यूपः आदित्यः आज्याञ्जननिमित्तौज्वल्येन आदित्यसदृश इत्यर्थः । "सारूप्यात्" (१. ४. २५) इति जैमिनिनये सिद्धान्तितमेतत् – आदित्यो यूप इति सादृश्यादिति । तथाह्याहुः –

"आदित्यो यूप इत्यत्र स्तुतिरादित्यशब्दतः ।
द्वारं चाक्षुषसारूप्यं घृताक्ते तैजसेऽस्ति तत्" इति ।

एवमिहापि श्रुत्यर्थः । तथाहि स्मृतिः –

"भिन्ना जीवाः परो भिन्नस्तथाऽपि ज्ञानरूपतः ।
प्रोच्यन्ते ब्रह्मरूपेण वेदवादेषु सर्वशः" इति ।

तदधीनत्वात् तद्व्यपदेशो वा[1] । यथा 'राजा राष्ट्रमभवत्' इति प्रयोगः । नयविवेकेऽप्युक्तम् – " 'दशैतानध्वर्युः प्रातःसवने गृह्णाति'[2] इति दशसङ्ख्या-श्रुतिः समुच्चयश्रुतिरिति व्यपदिश्यते । गृहसमुच्चयाधीनत्वात् दशत्वस्य तद-धीनत्वात् तद्व्यपदेशः कार्ये कारणशब्दव्यपदेशः" इति । तथा 'तत् त्वमसि' इति व्यपदेशो युक्तः ।। ७ ।।

अथवा, जडेशयोरत्यन्तवैलक्षण्यम्; न तथा जीवेशयोः, किन्तु स्वल्प-मेवेति वक्तुं सतोऽपि भेदस्याविवक्षा स्यात्; असतोऽप्यभेदस्य विवक्षा स्यात् । महाभाष्येऽप्युक्तं "षष्ठी शेषे" (पा. सू. २.३.५०.) इत्यत्र – "कर्मादीनामवि-वक्षा शेषः । कथं पुनः सतो नामाविवक्षा स्यात्? सतोऽप्यविवक्षा भवति । तद्यथा – 'अलोमिका एडका',[3] 'अनुदरा कन्यका' इति । असतोऽपि विवक्षा यथा 'समुद्रः कुण्डिका' इति" । तथा 'तत् त्वमसि' इत्यत्रापि । तस्मादेकपद-लक्षणैव युक्तेति ।। ८ ।।

अथवा, मम देहे[4]ऽहमेकश्चेतनः साक्षिसिद्धः स्वतन्त्रो वर्ते, नास्त्यन्य ईशः प्रेरकः सखा चेति मत्वा श्वेतकेतुना पृष्टः पितोद्दालकः "द्वा सुपर्णा" इति श्रुत्यर्थं मनसि कृत्वाऽऽह – 'तत् त्वमसि' इति । तत्सम्बन्धी तत्प्रेर्यस्तत्सखस्त्वमसीत्यर्थः । तेनाप्येवमवसीयते – 'तत्' सृष्ट्यादिकारणं ब्रह्म 'त्वमसि' इत्युक्ते योग्यता नास्ति; योग्यताविरहे चोपचरितार्थस्य 'मञ्चाः क्रोशन्ति' इत्यादौ व्युत्पत्ति-सिद्धेस्तत्सम्बन्धित्वात् त्वम्पदार्थश्चोपचारात् तत्पदेन कथ्यत इति । तथाहि – "समर्थः पदविधिः" (पा. सू. २.१.१.) इति परिभाषायां विधीयत इति विधिः

---

१ "तदधीनत्वाद्व्यपदेशो वा" इति ग. पाठः ।

२ "गृहान् गृह्णाति" इति ख. पाठः । नयविवेक इति भवनाथकृतो ग्रन्थः ।

३ "अलोमका एडका" इति बहुशः पाठः । कम्बलकरणेन हि लोम्नां सार्थक्यम् । तदयोगे त्वकार्यकरत्वात् विद्यमानमपि लोमाविवक्षित्वा अलोमिके-त्युच्यते । एवं निरन्तरं जलोत्सारणेऽप्यशून्यकुक्षितया कुण्डिकैव समुद्र इत्युच्यते।

४ "मद्देहे" इति ख. ग. पाठः ।

पदकार्यं समासः । तस्य च राजपुरुष इत्येतस्यामवस्थायां निष्पन्नत्वात् सामानाधिकरण्यात् समर्थनिर्देशोऽनर्थकः । तेन समर्थपदसम्बन्धित्वात् पदविधिरुपचारेण समर्थपदेनोच्यते । यथाऽऽह कय्यटः – "समर्थपदसम्बन्धित्वात् पदविधिरुपचारात् समर्थपदेनोच्यते" इति । पदमञ्जर्यां हरदत्तेनाप्युक्तम् – "उपचरितवृत्तिः समर्थशब्दः, समर्थपदाश्रयत्वात्" इति । तस्मादेकपदलक्षणयैव 'तदाश्रितस्त्वमसि' इत्यर्थः सम्पन्न इति ।। ९ ।।

अथवा, "उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवति" (छा. ६.१.३.) इत्युक्ते, करणकलेवरादिप्रेरणेऽहमेव[1] कर्तेत्यनुभवसिद्धम्, अतो नान्योऽस्ति कर्तेति पृष्टः पिता "कर्ता शास्त्रार्थवत्त्वात्" (ब्र. सू. २.३.३३.) इति न्यायेन तत्प्रसादात् ताच्छील्यं कर्तृत्वज्ञातृत्वरूपं सत्यमेवानुभवसीत्याह – 'तत् त्वमसि' इति । तच्छीलोऽसीत्यर्थः । "इग्यणः सम्प्रसारणम्" (पा. सू. १.१.४५.) इत्यत्र महाभाष्येऽप्युक्तम् – "काकाज्जातः काकः, श्येनाज्जातः श्येनः, सम्प्रसारणाज्जातः[2] सम्प्रसारणम्" इति । कय्यटे[3]ऽप्युक्तम् – "काकाज्जातः काकः, एवमिहापि सम्प्रसारणाज्जातत्वादुपचाराद्वर्णोऽपि ताच्छील्यं लभते" इति । तथाचैकपदलक्षणयैवार्थः सम्पन्नः ।। १० ।।

अथवा 'तत्' प्रेरकं 'त्वं' प्रेर्यः 'असि' इत्यर्थः । वाक्यैकदेशप्रयोगः । यथा 'जिज्ञासा कर्तव्या' इति वाच्ये "अथातो ब्रह्मजिज्ञासा" (ब्र. सू. १.१.१.) इत्युच्यते । महाभाष्येऽप्युक्तम् – "दृश्यन्ते हि वाक्येषु वाक्यैकदेशं प्रयुञ्जानाः 'प्रविश पिण्डीम्' इति । 'सत्यभामा सत्या' इति" । कय्यटोऽप्याख्यत् – "प्रवेशनक्रिया पिण्ड्यां प्रवेशासम्भवात् गृहमाक्षिपति । एवं पिण्डीमिति कर्मयोग्यां भक्षणक्रियामाक्षिपति – 'गृहं प्रविश पिण्डीं भक्षय' इति" । एवं प्रेरकं 'तत्' ब्रह्म 'त्वं' प्रेर्यः 'असि' इति वाक्यार्थः सम्पद्यते ।। ११ ।।

---

१ "अहमेक एव" इति ख. पाठः ।

२ "जातं सम्प्रसारणम्" इति क. ख. ग. पाठः ।

३ कय्यटकृतत्वाद्व्याख्यानस्यापि कय्यटत्वं पूर्वोक्तन्यायादेव ।

किञ्चात्र प्रकरणे जीवस्वरूपतत्त्वनिरूपणपुरस्सरं जीवजातीयादीशस्य परब्रह्मणो वैलक्षण्यं निरूप्यते । जीवश्च तदाश्रितस्तत्सदृशस्तत्सायुज्यवांस्तत्सहचरितस्तत्प्रेर्यो मोक्षेऽपीत्यतो जीवादीशो विलक्षण इति व्युत्पादयितुं 'तत् त्वमसि' इत्याह ।

तात्स्थ्यताद्धर्म्यसायुज्यसाहचर्यादिहेतुभिः ।
सोऽयमित्यभिसम्बन्धो महाभाष्येऽप्युदाहृतः ।

एतैर्हेतुभिः 'तत् त्वमसि' इत्यादिवाक्येषु जीवब्रह्मणोः सामानाधिकरण्यप्रयोगो युज्यत एव । नच हेत्वसिद्धिः । "सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" (छा. ६.८.४.) इति तात्स्थ्यसिद्धिः । "परमं साम्यमुपैति" (आ. ३.१.३.) इति ताद्धर्म्यहेतुसिद्धिः । "सह ब्रह्मणा विपश्चिता" (तै. २.१.) इति सायुज्यहेतुसिद्धिः । "एतेनैव सेतुना मोदते प्रमोदते" ( ), "एतेनाऽत्मना सर्वान् कामाननुभवति"[१] ( ) इत्यादिश्रुतिभिः साहचर्यहेतुसिद्धिः[२] । "तत्समीपे स मोदत"[३] इति मोक्षेऽपि सर्वहेतुसिद्धेः । एवं सामानाधिकरण्यव्याख्यानमुपपन्नतरम्[४] । एकपदस्यैव लक्षणेति लाभः । "पुंयोगादाख्यायाम्" (पा. सू. ४.१.४८.) 'गोपस्य स्त्री गोपी, प्रष्ठस्य स्त्री प्रष्ठी' इत्यत्र महाभाष्ये "कथमयं प्रष्ठशब्दः पुरुषवचनः स्त्रियां वर्तते" इत्याक्षिप्य परिहृतम् – "तस्येदमिति चेत्, तर्ह्यण् स्यात् । तर्ह्ययमभिसम्बन्धोऽस्ति सोऽयमिति । कथं पुनर-

---

१ सूत्रभाष्ये (४.४.१.) उदाहृते एते श्रुती । "इमां घोरामशिवां नदीं तीर्त्वैतं सेतुमाप्यैतेनैव सेतुना मोदते प्रमोदत आनन्दीभवति" इति मौद्गल्यश्रुतिः । "स य एवंविदेवं मन्वान एवं पश्यन्नात्मानमभिसम्पद्यैतेनाऽत्मना यथाकामं सर्वान् कामाननुभवति" इति सौपर्णश्रुतिः ।

२ "साहचर्यसिद्धिः" इति ख. ग. पाठः ।

३ परमश्रुतिरियम् । इयं च समग्राऽऽनुपूर्वी –

"विष्णुं सर्वगुणैः पूर्णं ज्ञात्वा संसारवर्जितः ।
निर्दुःखानन्दभुङ् नित्यं तत्समीपे स मोदते ।"

४ "उपपन्नतरमिति" इति ग. पाठः ।

तस्मिन् स इत्येतद्भवति? चतुर्भिः प्रकारैरतस्मिन् स इत्येतद्भवति – तात्स्थ्यात्, ताद्धर्म्यात्, तत्साहचर्यात्, तत्सामीप्यादिति । तात्स्थ्यात् – 'मञ्चो हसति' । ताद्धर्म्यात् – 'जटी ब्रह्मदत्तः'[1] इत्युच्यते । तत्सामीप्यात् – 'गङ्गायां घोषः' । तत्साहचर्यात् – 'कुन्तान् प्रवेशय' इति" । एवं महाभाष्योक्तनीत्याऽस्मदीयं व्याख्यानं युक्ततरम् । जहदजहल्लक्षणा त्वयुक्तेत्युक्तम्; पदद्वयलक्षणादोषश्चेत्यलं विस्तरेण ।। १२ ।।

अथवा, मुख्यार्थासम्भवे खलु[2] लक्षणाश्रयणं युक्तम् । मुख्ये सम्भवति जघन्यवृत्तेरयुक्तत्वात् । सम्भवति चात्र मुख्यार्थ एव । तथाहि – 'तत् त्वमसि' – 'तत्' ऐतदात्म्यं 'त्वमसि' इति मुख्यार्थ एवास्तु । एवं सति नपुंसकतच्छब्दस्य सन्निहितपरामर्शोपपत्तिलाभः । एषः आत्मा अन्तर्यामी यस्य तदेव ऐतदात्म्यम् । ब्राह्मणादित्वात् स्वार्थे ष्यञ्[3] । एतदन्तर्यामिकोऽसीत्यर्थः ।। १३ ।। एष चासावात्मा च; तस्येदमैतदात्म्यम् । एतदीयं वस्तु त्वमसीत्यर्थो वा ।। १४ ।।

समस्तं पदं वा । तस्य त्वमसीत्यर्थः । षष्ठ्यर्थः स्वस्वामिभावलक्षणः सम्बन्धः ।। १५ ।। असकृदुपदेशादत्र बहवोऽर्था अभिप्रेताः । "सुपां सुलुक्पूर्वसवर्णाच्छेयाडाडयायाजालः" (पा. सू. ७.१.३९.) इति स्मरणादन्येऽपि मुख्यार्था एव । तथाहि – अत्र नवप्रकरण्यां जीवब्रह्मणोर्विलक्षणस्वभावं निरूपयन्नुद्दालक उपजीव्योपजीवकत्वादिनिमित्तैस्तयोर्वैलक्षण्यं दृष्टान्तेषु बहुधा प्रत्यपीपदत् । दार्ष्टान्तिकेऽपि तथैवाभिप्रेतोऽर्थोऽस्ति । स कथ्यते – तेन प्रयोजकहेतुना परमात्मना त्वं जीवस्तिष्ठसीत्याह – 'तत्त्वमसि' इति[4] । अयं चार्थः – "आत्मनाऽनुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति" (छा. ६.११.१.) इति

---

१ "देवदत्तः" इति ख. ग. पाठः ।

२ "मुख्यार्थासम्भवे हि" इति ग. पाठः ।

३ इतः परं क्वचिदिदं वाक्यं दृश्यते – " 'वर्तमानं समीपमेव वर्तमानसामीप्यम् । स्वार्थेऽपि ष्यञ् भवति' इति ज्ञापनाच्च" ।

४ "तत्त्वमसि । अयं चार्थः" इति क. पाठः ।

दृष्टान्ते व्युत्पादितः ।। १६ ।। ततो जात इत्याह – 'तत्त्वमसि' इति[1] । "सुपां सुलुक् –" (पा. सू. ७.१.३९.) इति सूत्रेण विभक्तेर्लुक् प्रथमैकवचनादेशो वा सर्वत्र ज्ञातव्यः । "सर्वाः प्रजाः सत आगम्य न विदुः" (छा. ६.१०.२.) इति दृष्टान्ते स्पष्टीकृतोऽयमर्थः ।। १७ ।। तस्य दासस्तदाश्रितस्त्वमसीत्याह – 'तत् त्वमसि' – तस्य त्वमसीत्यर्थः । राज्ञः पुरुष इतिवत् स्वस्वामिभावलक्षणः सम्बन्धः षष्ठ्यर्थः । अयमर्थस्तु – "एतस्यैव सोम्यैषोऽणिम्न एवं महान् न्यग्रोध-स्तिष्ठति" (छा. ६.१२.२.) इति दृष्टान्ते स्पष्टीकृतः ।। १८ ।। तस्मिन् ब्रह्मणि त्वं तिष्ठसीत्याह – 'तत् त्वमसि' – तस्मिन् प्रतिष्ठित आयत्तः समीपग आश्रितोऽसीति वा सप्तम्यर्थः । आश्रयाश्रयिभावादिश्च शकुनिसूत्रदृष्टान्ते व्युत्पादितः । एवं मुख्ययैव वृत्त्याऽनेकेऽर्था[2] विवक्षिताः सन्ति ।। १९ ।।

अथवा, "स आत्मातत्त्वमसि" इत्यस्यायमर्थः – 'आत्मा' तु 'स' एवाणिमा; 'त्वमतदसि'[3] तदन्योऽसीत्यर्थः । यद्यपि "स आत्मातत्त्वमसि" इति वाक्यमुभयथा पदविच्छेदसम्भवेन सन्दिग्धम्, तथाऽप्यसन्दिग्धभेदविषयदृष्टा-न्ताभिधानानुगुण्येन[4] भेदोपदेश एवायं नाभेदोपदेश इति निश्चीयते[5] । नह्य-न्यत्प्रतिज्ञायान्यत्र दृष्टान्ताभिधानमुपपद्यते । यथा शब्दोनित्य इत्यत्र घटदृष्टा-

---

१ "तत्त्वमसि । सुपां सुलुक् –" इति क. पाठः ।

२ "अनेकार्थाः" इति ग. पाठः । विश्वनाथस्तु तर्ककुतूहलेऽर्थान्तरमाह । तद्यथा – 'तत्' तस्मात् विश्वपरमेश्वरयोः कार्यकारणभावापन्नत्वात् । 'असि' इति त्वमित्यर्थेऽव्ययम् । वक्ष्यसि इति पदं वक्षि असि इति च्छित्त्वा त्वं वक्षीति वैयाकरणैर्व्याख्यातत्वात् । 'त्वम्' इत्यतत् भिन्नमित्यर्थे वर्तते । उत त्वः पश्य-न्नित्यादिप्रयोगानुसारेण वैदिकनिघण्टौ तथा व्यवस्थापनात् । तथाच तस्मात् त्वं भिन्न इत्यर्थः सम्पद्यते । त्वमिति सामान्ये नपुंसकमित्यादि ।

३ "त्वं त्वतदसि" इति क. पाठः ।

४ "दृष्टान्तानुगुण्येन" इति ग. पाठः ।

५ "इति ज्ञायते" इति ग. पाठः ।

न्तेन निश्चयः[1] । दृष्टान्तस्वरूपव्याख्यानं च खण्डनखण्डने द्रष्टव्यम् ।। २० ।।

श्रूयते च –

"यथा पक्षी च सूत्रं च नानावृक्षरसा यथा ।
यथा नद्यः समुद्रश्च शुद्धोदलवणे यथा ।
यथा चोरापहार्यौ च यथा पुंविषयावपि ।
तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ ।
तथाऽपि सूक्ष्मरूपत्वान्न जीवात् परमो हरिः ।
भेदेन मन्ददृष्टीनां दृश्यते प्रेरकोऽपि सन् ।
वैलक्षण्यं तयोर्ज्ञात्वा[2] मुच्यते बद्ध्यतेऽन्यथा"

इति महोपनिषदि ।[3]

नन्वैक्यप्राप्तिरेवात्र कथम्? इत्थम् – देहादिप्रेरकत्वं यद्भगवल्लक्षणं तत् सर्वोऽपि जनोऽहङ्कारममकारवशादात्मन्यनुमन्यते । तस्य तेन महाननर्थः, तथा तत्त्यागे च पुरुषार्थः श्रूयते –

"प्रेरकः सर्वभूतानां[4] प्राणधीचोदिता च सः ।
विष्णुः संसारिणोऽन्यो यस्तमविज्ञाय मूढधीः ।
देहेन्द्रियप्राणबुद्धिनेतृत्वं मन्यते त्मनः ।
अतः संसारपदवीं याति जीवेशयोः सदा ।

---

१ "निश्चीयते" इति ग. पाठः ।

२ "ततो ज्ञात्वा" इति क. ग. पाठः ।

३ तत्त्वनिर्णये भगवत्पादैरुदाहृतेयं श्रुतिः । ननु नेयं तर्हि महोपनिषत् । परमोपनिषदीति वक्तव्यम् । भगवत्पादैः परमोपनिषद्वचनमिदमित्यभिधानात् । सत्यम् । परमोपनिषदियम् । महोपनिषदिति लिपिकृतां प्रमादः फलित इति सम्भाव्यते । नामान्तरमिति वा वक्तव्यम् ।

४ "प्रेरकः सर्वदेहानाम्" इति मूलपाठः । स एव च साधुः । पूर्वप्रकृतानामेव देहादीनां 'देहेन्द्रियप्राणबुद्धी'ति उत्तरत्र परामर्शात् ।

वैलक्षण्यं तयोर्ज्ञात्वा[1] मुच्यते बद्ध्यतेऽन्यथा"

इति च महोपनिषदि ।[2]

लक्षणाभिमानो नामैक्याभिमान एव । अतः सर्वेषां प्राणभृतामैक्यप्राप्तौ श्वेतकेतूपलक्षितानां सज्जनानामिष्टानिष्टप्राप्तिपरिहारार्थमैक्यनिषेधः क्रियतेऽस्मिन् प्रकरणे । किञ्च –

कुदृष्टिसमयात् प्राप्तदुरहङ्कारतोऽपि च ।
ईश्वरोऽहमिति भ्रान्तिर्जीवानामपनीयते ।

प्रकरणोपक्रमे च प्राप्तिर्दृश्यते – "सर्वान् वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय" (छा. ६.१.२.) इत्यादिना । सामसंहितायां चैवं व्याख्यातम् –

"अणिमा सूक्ष्मतो गम्य ऐतदात्म्यं च तद्वशम् ।
[3]महानन्दत्वतः सत्य आत्मा[4] पूर्णगुणत्वतः ।
मुख्यतो नासि तत् त्वं हि मा भूत् ते स्तब्धता ततः ।
असुराः स्तब्धतां याता ब्रह्माहमिति मानिनः ।
यान्ति चैवं तमो घोरं परमात्मविनिन्दकाः" इत्यादिना[5] ।

अतो नाप्राप्तप्रतिषेधः । जीवब्रह्मभेदस्य प्रमाणान्तराप्राप्तत्वात् तवैवाप्राप्तप्रतिषेध इत्यलं विस्तरेण ।। * ।।

---

१ "वैलक्षण्यं परं ज्ञात्वा" इति तत्त्वनिर्णयगतः पाठः ।

२ तत्त्वनिर्णयगता श्रुतिरियमपि परमोपनिषदेवेति ज्ञायते ।

३ "परानन्दत्वतः" इति "सत्यतो नासि" इति च भाष्यसम्मतः पाठः ।

४ "सत्यमात्मा" इति क्वचित्पाठः । तत्त्वप्रदीपेऽपि तथा । मूलकोशेषु तु सत्य इत्येव ।

५ तथाचेयं छान्दोग्यभाष्यतत्त्वप्रदीपादिसम्मताऽऽनुपूर्वी –

"योऽसौ नियमनाद्विष्णुः सारत्वात्स इति स्मृतः ।
अणिमा सूक्ष्मतो गम्य ऐतदात्म्यं च तद्वशम् ।
परानन्दत्वतः सत्य आत्मा पूर्णगुणत्वतः ।
सत्यतो नासि तत् त्वं हि मा भूत् ते स्तब्धता ततः ।

नन्वथाप्यैक्ये – "सर्वं खल्विदं ब्रह्म" (छा. ३.१४.१.), "ब्रह्मैवेदम्"[1] (अथ. २.२.११.), "अहं ब्रह्मास्मि" (बृ. १.४.१०.), "ब्रह्मैव सन् ब्रह्माप्येति" (बृ. ४.४.६.) इत्यादीनि वेदान्तवाक्यानि सन्ति; अतः[2] कथमुच्यते तदप्रामाणिकमिति? मैवं व्याहतं भाषिष्ठाः। सर्वत्र खलु वाक्येषु किञ्चिदुद्दिश्य किञ्चिद्विधीयते। अत्र च किं सर्वानुवादेन ब्रह्मत्वविधानम्, किंवा ब्रह्मणः सर्वत्वं विधीयते? नाऽद्यः। जडस्याजडत्वादिप्रसङ्गेन व्याहतेः। न द्वितीयः। ब्रह्मणो जडत्वानित्यत्वादिप्रसङ्गात् श्रुतिव्याहतेः। नहि तमःप्रकाशवद्विरुद्धस्वभावयोर्जडाजडयोरैक्यं सम्भवति। योग्यताविरहे चाऽभासत्वप्रसङ्गात्। नह्यनुन्मत्तैरित्थं व्याख्यानं व्याहत[3]माश्रीयते। ब्रह्मव्यतिरिक्तं सर्वं नास्तीति मनोरथ इति चेत्, तर्हि तथा निर्देशः स्यात्; नतु "आनन्दो ब्रह्म"[4] (तै. ३.६.) इतिवत् सर्वं ब्रह्मेति निर्देशः। नहि सत्यानृतयोरैक्यं श्रुत्याऽपि विधातुं[5] शक्यते, व्याहत-

---

असुराः स्तब्धतां याता ब्रह्माहमिति मानिनः।
असत्यं जगदित्याहुः सिद्धोऽहं बलवानिति।
अनीश्वरं जगच्चाऽहुरप्रतिष्ठं तथैव च।
चेतनैकत्वविषयान् वेदानाहुश्च सर्वशः।
कुतर्कपरमा नित्यं न सहन्ते गुणान् हरेः।
शास्त्रतत्त्वमविज्ञाय ब्रूयुर्वेदेषु चैकताम्।
यान्ति चैवं तमो घोरं परमात्मविनिन्दकाः।
आलम्ब्य तन्मतं न त्वमेकत्वं विद्धि विष्णुना।
एकताभावतो नैव भवेथाश्च महामनाः" इत्यादि।

१ "ब्रह्मैवेदं सर्वम्" इति क. ख. पाठः।

२ "सन्तीत्यतः" इति क. ख. पाठः।

३ "व्याहतं व्याख्यानम्" इति क. पाठः।

४ "आनन्दं ब्रह्म" इति ग. पाठः। तत्पक्षे बृहदारण्यकवचनमिदम्। तद्यथा – "विज्ञानमानन्दं ब्रह्म" (३.९.२८.)

५ "श्रुत्या विधातुं" इति ग. पाठः।

त्वात् । नापि लोके 'नीलमुत्पलम्' इत्यादौ नैल्यमिथ्यात्वसम्मतिः, किन्तु नैल्याधारभूतमुत्पलमिति । तथाच सर्वाधारः परमात्मेत्यर्थः स्यात् । "एको दाधार भुवनानि विश्वा" (ऋ. सं. १.१५४.४.) इति श्रुतेश्च । भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति वैयाकरणोक्तेश्च ।

अथवा, "सुपां सुलुक् –" (पा. सू. ७.१.३९.) इति सप्तम्यर्थे प्रथमा । सर्वस्मिन् ब्रह्मेत्यर्थः । "सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते" (ऐ. आ. ३.२.३.) इति सर्वशाखाप्रत्ययन्यायात्, "सर्वं समाप्नोषि ततोऽसि सर्वः" (भ. गी. ११. ४०.) इति स्मृतेश्चायमेवार्थः । "उत यत् सुन्वन्ति सामिधेनीस्तदन्वाहुः" इत्यत्र मीमांसकैर्यदिति तदिति च प्रथमा सप्तम्यर्थे समाश्रिता । यत्र सुन्वन्ति तत्र हविर्धाने स्थित्वा सामिधेनीरनुब्रूयुरिति तृतीयस्याष्टमे[1] पादे समर्थितत्वात् ।

सर्वमस्यास्ति सर्वमस्मिन्नस्तीति वा मत्वर्थे सर्वशब्दादच्प्रत्ययो वाऽऽश्रयणीयः । 'सर्वं ब्रह्म' सर्वस्य निमित्तं ब्रह्मेति वाऽर्थः । "सम्प्रसारणमभ्यस्तानाम्" ( ) इत्यत्र महाभाष्यम् – "अभ्यस्तनिमित्तस्येत्यर्थः । अन्तरेणापि निमित्तशब्दं निमित्तार्थोऽवगम्यते । तद्यथा –'आयुर्घृतम्'[2] । आयुषो निमित्तमिति गम्यते" इति महाभाष्योक्तेर्युक्तोऽयमर्थः[3] ।

अथवा, मृद् घट इतिवत् तज्जत्वादिनिमित्तैः सर्वं ब्रह्मेत्युच्यते । नतु सर्वस्वरूपत्वात् । "सन्दिग्धेषु वाक्यशेषात्"[4] (पू. मी. १.४.२९.) इति न्यायेन "तज्जलानिति शान्त उपासीत" (छा. ३.१४.१) इति वाक्यशेषान्निश्चयात ।

"त्वदधीनं यतः सर्वमतः सर्वो भवानिति ।
वदन्ति मुनयः सर्वे नतु सर्वस्वरूपतः ।"
"स्रष्टा पाता च संहर्ता नियन्ता च प्रकाशिता ।
यतः सर्वस्य तेनाहं सर्वोऽस्मीत्यृषिभिः स्मृतः ।"

---

१ "तृतीयाध्यायस्याष्टमे" इति ग. पाठः ।

२ "आयुर्घृतमिति" इति ग. पाठः ।

३ "महाभाष्योक्तेरयमेवार्थः" इति ग. पाठः ।

४ "सन्दिग्धे वाक्यशेषात्" इति ख. पाठः ।

इति वचनैश्चास्मदीय एवार्थः प्रामाणिकः । सर्वस्य ब्रह्मण्यारोपितत्वात् सर्वं ब्रह्मेत्युच्यत इति न किञ्चिद्वचनमस्तीति सर्वाद्वैतमप्रामाणिकत्वाद्दुर्मतमेव ।

'अहं ब्रह्मास्मि' इत्यादिश्रुत्यर्थः

"अहं ब्रह्मास्मि" इत्यत्र बृहदारण्यके जीवशङ्कैव नास्ति । "ब्रह्म वा इदमग्र आसीत् । तदात्मानमेवावेदहं ब्रह्मास्मीति । तस्मात्तत्सर्वमभवत् । तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्" (बृ. १.४.१०.) इत्यादेः परमात्म-प्रकरणत्वात् । [1]"योऽहमस्मि ब्रह्माहमस्मि" (ना. उ. १.१५.) इत्यादावपि तस्येदं वाक्यम्[2] । किञ्च वाक्याभासत्वपरिहारार्थं विधिः कल्पनीयः[3] । तत्र यदि 'अहमस्मि' इति जीवोऽहमस्मीत्युपासीतेत्यर्थः, तर्हि जीवो ब्रह्मोपासीतेति विध्यर्थः । "सोऽहमस्मि" (या. मं. १६.) इति 'गरुडोऽहमस्मि'[4] इतिवत् भेद एव बहवोऽर्थाः सम्भवन्ति ।

---

१ क्वचित् "सोऽहमस्मि" इति पाठः । तदा तु बृहदारण्यकस्य (५.१५.१.), याज्ञीयमन्त्रस्य (१६), छान्दोग्यस्य (४.१३.१.) वेदं प्रतीक-ग्रहणमिति वेदितव्यम् । नारायणोपनिषदि त्वेवमानुपूर्वी – "ब्रह्माहमस्मि । योऽहमस्मि ब्रह्माहमस्मि । अहमस्मि ब्रह्माहमस्मि । अहमेवाहं मां जुहोमि स्वाहा ।" अत्र यद्यभेदपरता तदा 'अहं मां जुहोमि' इत्येव पर्याप्तम् । पुनरहमे-वेति व्यर्थम् । ततश्चायमर्थः – अहेयं मदन्तर्यामिणं नारायणमहं जुहोमीति ।

२ अस्फुटाभिधेयमिदं वचनम् । अयमर्थः सम्भाव्यते – "तेने ब्रह्म हृदा य आदिकवये" इति वचनात् भगवानेव किलाऽद्यो द्रष्टा वेदानाम् । तथाच यत्राहमादिशब्दा अपरद्रष्टृषु बाधितास्तत्र भगवन्तमेवाभिधत्तेऽयमस्मच्छब्दः । अहं ब्रह्मास्मीतिवत् । अथवा नेदमस्मच्छब्दस्य रूपमहमिति । बाधितार्थत्वात् । तथाच नैतद्वाक्यं जीवपरतया योज्यम् । "सर्वे वेदा यत्पदमामनन्ति" इत्यादेः । किन्तु अहेयत्वादिना भगवद्वचनमेवेदं वाक्यमिति ।

३ पूर्वमीमांसानयप्रणयमभिनयता किलैवमुदितम् ।

४ गरुडवदन्तर्मनसि भगवतो धारक इत्यर्थः । अतएव भक्तस्य सत्य-धर्मेति नाम । "सत्यं ब्रह्म हृदये धारयतीति सत्यधर्मा" इति याज्ञीयमन्त्रभाष्यम् ।

तात्स्थ्यताद्धर्म्यसादृश्यसाहचर्यादिहेतुभिः ।
सोऽहमित्यभिसम्बन्धो महाभाष्येऽप्युदाहृतः ।

तात्स्थ्यात् – अहं ब्रह्मणि तिष्ठामीति भावयेदित्यर्थः । सप्तम्यर्थे प्रथमा वा । तादर्थ्यात् ताच्छब्द्यं वा । यथा "तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः" (पा. सू. ४.३.६६.) इत्यत्र महाभाष्यम् – "कल्पे च व्याख्याने लुग् वक्तव्यः । नवा वक्तव्यः । तादर्थ्यात् ताच्छब्द्यं भविष्यति । अग्निष्टोमार्थः कल्पोऽग्निष्टोम इति । राजसूयार्थः कल्पो राजसूय इति" । तद्वद्ब्रह्मार्थोऽस्मीत्यर्थः । सादृश्यादपि ताच्छब्द्यं दृष्टम् – "वाचं धेनुमुपासीत" (बृ. ५.८.१.) इतिवत्; "आदित्यो यूपः" इतिवत् । साहचर्यात् ताच्छब्द्यं दृष्टम् । यथा "तदस्य ब्रह्मचर्यम्" (पा. सू. ५.१.९४.) 'महानाम्नीश्चरति महानाम्निकः' इत्यत्र महाभाष्यम् – "साहचर्यात् ताच्छब्द्यं भविष्यति – महानाम्नीसहचरितं व्रतं महानाम्नीव्रतम्" इति । तथा ब्रह्मसहचरितोऽहमस्मीत्यर्थो युक्त एव । "आत्मानं गरुडं ध्यायेत्" ( ) इतिवत्, "ब्रह्मदृष्टिरुत्कर्षात्" (ब्र. सू. ४.१.५.) इति न्यायाद्ब्रह्मदृष्टिः कर्तव्येत्यर्थो वा[1] । ब्रह्मणः सम्बन्धीति वाऽर्थः । "सुपां सुलुक् –" (पा. सू. ७.१.३९.) इति षष्ठ्यर्थे प्रथमा । तत्स्वामिकः, तद्भृत्यः, तत्प्रेर्यः, तदधीनः – इत्याद्यर्थाः "सोऽहमस्मि" इत्यत्राभिप्रेताः । नहि विरुद्धयोर्मुख्यैक्यं युज्यते । विरुद्धभागत्यागलक्षणयेति चेत्, मैवं वोचः । तयोर्मुख्यनित्यधर्मत्वेन त्यागायोगात् । मुख्यार्थसम्भवे लक्षणायोगाच्च । अतश्च "अच्युतोऽहमनन्तोऽहम्" ( ) इत्याद्यद्वैतप्रलापा भ्रान्तिमूला ज्ञातव्याः । "सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा सत्यं भिदा"[2] इत्यादिभेदश्रुतिविरोधात् ।

---

१ यथा ब्रह्मशब्दस्योत्कर्षार्थकत्वात् परमेश्वरे ब्रह्मदृष्टिः कर्तव्येत्यभिहितं तद्वदेव अहं जीवोऽपि स्वभावतः ज्ञानानन्दस्वरूपतया उत्कृष्टोऽस्मि । प्रमादात्मकत्वाद्बन्धस्य नान्ततो मे संसारितेति 'अहं ब्रह्मास्मी'ति श्रुत्यर्थः । यथा भगवद्वाहत्वरूपधर्मसाधर्म्येणाऽत्मनि गरुडत्वदृष्टिः, तथैव ज्ञानानन्दमयत्वरूपोत्कर्षसामान्यात्स्वस्मिन् ब्रह्मत्वदृष्टिरिति ।

२ पैङ्गिश्रुतिरियं सूत्रभाष्ये (१.२.१२.) समुद्धृता ।

"अल्पशक्तिरसार्वज्ञ्यं पारतन्त्र्यमपूर्णता ।
उपजीवकत्वं जीवत्वमीशत्वं तद्विपर्ययः ।
स्वाभाविकं तयोरेतन्नान्यथा तु कथञ्चन"

इति श्रीविष्णुपुराणोक्तेश्च ।

तस्मात् "आत्मानं गरुडं ध्यायेत्", "वाचं धेनुमुपासीत" (बृ. ५.८.१.), "अन्नं ब्रह्म" (तै. २.२.,३.२; छा. ७.९.२.) इति यथा तथा ब्रह्माहमस्मीति ध्यायेदिति सर्वत्रार्थः ।

तैत्तिरीये 'स एक' इति श्रुत्यर्थः

"स यश्चायं पुरुषे यश्चासावादित्ये स एकः" (तै. २.८.) इति जीवस्याधिकरणतया भेदमुक्त्वाऽन्तर्यामिणो नारायणस्यैवैक्यं निगदितम् । तदेतदाह –

"गरुडोऽस्मीतिवद् ध्यायेत् सोऽहमस्मीति यत्नतः ।
अन्नं ब्रह्मेतिवद् ध्यायेदहं ब्रह्मेत्युपासकः ।
किञ्च नारायणस्येदमैक्यं प्रकरणात् स्थितम् ।
आदित्ये पुरुषे चैको विष्णुरित्यन्ततः स्थितेः" इति ।

'ब्रह्मैव सन्' श्रुत्यर्थः

"ब्रह्मैव सन् ब्रह्माप्येति" (बृ. ४.४.६.) इत्यत्र ब्रह्मप्राप्तिकामो ब्रह्मोपासीतेति विध्यर्थः । 'ब्रह्मैव सन्' ब्रह्मण्येव सर्वात्मना तिष्ठन् ब्रह्माऽप्नोतीत्यर्थः[1] । नचात्रैक्यमर्थः । एकस्यां प्राप्तिक्रियायामेकस्यैव कर्तृत्वकर्मत्वविरोधात् । तस्माज्जीवब्रह्मणोर्मुख्यमैक्यमप्रामाणिकमेवेति ।

'ब्रह्मैव भवति' श्रुत्यर्थः

ननु "स यो हवै तत् परमं ब्रह्म वेद ब्रह्मैव भवति" (आथ. ३.२.९.) इत्यत्र जीवब्रह्मणोरैक्य[2]मवसीयते । अतः कथमुच्यते तदप्रामाणिकमिति?

---

१ "ब्रह्म प्राप्नोतीत्यर्थः" इति क. पाठः ।

२ "जीवब्रह्मैक्यम्" क. ख. पाठः ।

"रामसुग्रीवयोरैक्यम्" इतिवन्नदममुख्यम्; एवेत्यवधारणादिति चेत्, मैवं वोचः। अत्रापि भेदस्यैव प्रतीतेः। 'यः परमं ब्रह्म वेद स ब्रह्मैव भवति' प्राप्नोती[1]त्यर्थः। भू प्राप्ताविति उभयपदिधातुसम्भवात्। किञ्च ब्रह्मशब्दः खलु जातिजीवकमलासनशब्दराशिषु वर्तते। "ब्रह्माणि जीवाः सर्वेऽपि परब्रह्माणि मुक्तिगाः" इति वचनात् ब्रह्मशदश्च मुक्ते जीवे प्रसिद्धः[2]। तथाच 'यः परमं ब्रह्म वेद स ब्रह्मैव[3] भवति' मुक्तो जीव एव भवति; नतु परमं ब्रह्मेत्यर्थः[4]। नहि मुक्तो पारतन्त्र्यादिरूपं जीवत्वं परित्यज्य परमात्मत्वं प्राप्नोतीति भावः। अत एव पूर्वो ब्रह्मशब्दः परमत्वेन विशेषितः, द्वितीयस्तु केवल इति विशेषः। "सामान्यशब्दस्य विशेषितशब्दसन्निधाने सति सामान्यशब्दश्च तदितरविषयः, विशेषशब्दश्च व्यक्त्यन्तरविषयः" इति निगदाधिकरणे भवनाथेनोक्तम्।

अथवा, "सम्पूज्य ब्रह्मणं भक्त्या शूद्रोऽपि ब्रह्मणो भवेत्" ( ) इतिवत्[5] ब्रह्मजातीयो भवतीत्यर्थः।

अथवा, एवशब्द इवार्थः। यथा – "वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वेमान् लोकान् अभिजयति" ( ) इत्यत्र। नह्यत्र पश्वा-

---

१ "ब्रह्मैव प्राप्नोति" इति क. ख. पाठः।

२ ननु कथमिदम्। परब्रह्मशब्दः मुक्तविषय इति प्रमाणादवगम्यते। न ब्रह्मशब्दः। तत्कथमिदमेवमुच्यते? इत्थम् – परब्रह्मशब्दस्तु विशिष्य मुक्तमात्रविषयः। नहि परब्रह्मशब्दः मुक्तविषय इत्येतावता ब्रह्मशब्दो न मुक्तविषय इति भवति। नहि ब्रह्मदत्तो ब्राह्मण इत्युदिते न मनुष्य इति भणितं भवति। एवमिहापि। सर्वेऽपि जीवाः, मुक्ता अमुक्ताश्च, ब्रह्माणि। अत्र तु प्रसङ्गबलान्मुक्तपरताऽध्यवसीयते।

३ "स तु ब्रह्मैव" इति ग. पाठः।

४ "परं ब्रह्मेत्यर्थः" इति ख. पाठः।

५ तथाहि तत्त्वनिर्णये भगवत्पादवचनम् – "ब्रह्म वेद ब्रह्मैव भवतीत्यादि च 'सम्पूज्य ब्राह्मणं भक्त्या शूद्रोऽपि ब्राह्मणो भवेत्' इतिवत्। बृंहितो भवतीत्यर्थः। नहि ब्राह्मणपूजकः स एव ब्राह्मणो भवति।"

लम्भनमात्रेण विष्णुतादात्म्यं कस्याप्यभिमतम् । तस्मादिवार्थ एवशब्दः । "इववद्वैवमेव" इति नैघण्टुकपाठाच्च[1] ।

"ब्रह्मत्वं बृंहितत्वं स्याज्जीवानां न परात्मता ।
अस्वतन्त्रस्य जीवस्य कुतो नित्यस्वरूपता" इति स्कान्दे ।

भ्रमरकीटन्यायेनापि सादृश्यं व्याख्येयम् । एवं सर्वत्रापि जीवब्रह्मैक्यश्रुते-र्गौणोऽर्थो वर्णनीयः । मुख्यैक्यासम्भवात् ।

"जीवस्य परमैक्यं तु बुद्धिसारूप्यमेव तु ।
एकस्थाननिवासो वा व्यक्तिस्थानमपेक्ष्य सः ।
न स्वरूपैकता तस्य मुक्तस्यापि विरूपतः ।
स्वातन्त्र्यपूर्णतेऽल्पत्वपारतन्त्र्ये विरुपता" इति[2] च श्रुतेरित्यलं विस्तरेण ।। * ।।

'नानेव पश्यति' इत्यादिश्रुत्यर्थः

"मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" (का. २.४.१०.) "यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति" (तै. २.७.) इत्यादिश्रुतिभिर्भेदज्ञानिनोऽनर्थः श्रूयते । सत्यम्; ब्रह्मस्वरूपेषु यो भेदं पश्यति तस्यानर्थस्त्वस्माभिरप्यङ्गीकृतः । नतु जीवजडात्मकात् प्रपञ्चादत्यन्तभेदं पश्य-तोऽनर्थः । प्रत्युत मोक्ष एव स्यात् । "पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्तत-स्तेनामृतत्वमेति" (श्वेता. १.६.) इति श्रुतेः । ननु "द्वितीयाद्वै भयं भवति" (बृ. १.४.२.) इति भेदज्ञानिनोऽनर्थः श्रूयते । मैवमपरामृष्टं वादीः । "सोऽबि भेत् । तस्मादेकाकी बिभेति" इत्युक्त्वा "द्वितीयाद्वै भयं भवति । स वै नैव

---

१ तर्ककुतूहले विश्वनाथोऽप्याह – ब्रह्मवित् ब्रह्मसदृशो भवति । "एवौपम्येऽवधारणे" इत्यभिधानादिति ।

२ तत्त्वनिर्णयोदाहृता परमश्रुतिरियम् ।

रेमे । तस्मादेकाकी न रमते । स द्वितीयमैच्छत्" इति प्रजापतिश्रुतेरयमर्थः[1] – आदौ विष्णोर्जातश्चतुर्मुखः । स एकाकित्वादबिभेत् । स च विममर्श – कस्मान्मम भीतिः? द्वितीयात् सदृशाद्विरोधिनः खलु भीतिः । नच ममासौ विरोध्यस्तीति । तस्माज्जीवब्रह्मणोरैक्यमप्रामाणिकमेवेति सिद्धम् ।। * ।।

जीवानां मिथो भेदः

[2]नन्वस्तु जीवब्रह्मणोः श्रुतिसिद्धः प्रामाणिकोऽत्यन्तभेदः । मिथो जीवानां तु कुतः पारमार्थिको भेदः? अवधीयताम्[3] – नाहं देवदत्त इति तावद्यज्ञदत्तेनानुभूयते; [4] स्वतःप्रामाण्यात्, बाधकाभावाच्च सिद्धः पारमार्थिको भेदः । देवदत्तयज्ञदत्तयोरैक्यमप्रामाणिकमेव । नच देवदत्तयज्ञदत्तयोर्भेदो नास्तीति प्रतिपादयत् श्रौतं स्मार्तं वा वचनं प्रतीमः[5] । प्रत्युत –

---

१ तथाह्यारण्यकभाष्ये ब्रह्मतर्कवचनम् –

"तस्य त्वेकस्य सहसा यतो भीः समजायत ।
तस्मादद्यापि चैकस्य निर्विवेकं भयं भवेत् ।
विममर्श ततो ब्रह्मा यस्मान्मे बाधको नहि ।
मया सृज्या यतः सर्वे इतः पश्चात्तनो हरः ।
अतः कस्माद् बिभेमीति तस्य भीतिरपोहिता ।
विष्णोरतिप्रियत्वात्तु तदन्येषां पितृत्वतः ।
कस्माद्भयं भवेत्तस्य समानाद्धि भयं भवेत् ।
विरोधिनोऽधिकाद्वाऽपि हीनाद्वा पारवश्यतः ।
हीनमेव यतस्तस्य सर्वमेव जगद्वशे ।
नच जातं तदा सर्वं हरिरेव यतः परः ।"

२ जीवेभ्योऽन्य इति बहुवचनलब्धजीवनानात्वस्यायमाक्षेपः । तेन "जीवान्यः परमार्थतः" इत्यारम्भश्लोकेनायमप्यर्थः सूचित एव ।

३ "अवसीयताम्" इति क. पाठः ।

४ "यज्ञदत्तेन तावदनुभूयते" इति क. ख. पाठः ।

५ "वचनं प्रतीतम्" इति ख. पाठः ।

"नित्यो नित्यानां चेतनश्चेतनाना-
मेको बहूनां यो विदधाति कामान् ।
तमात्मस्थं येऽनुपश्यन्ति धीराः" (काठ. २.५.१२.)
"अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः" (श्वेता. ४.५.)

इत्यादिश्रुतिभिः,

"बहवो ज्ञानतपसा पूता मद्भावमागताः" (भ. गी. ४.१०.),
""जीवा भिन्नाः परो भिन्नः" ( )

इत्यादिस्मृतिभिश्च भेदस्यैव सिद्धेः ।

किञ्च, विमता जीवाः परस्परमैक्यरहिताः, चेतनत्वे सति परस्परं सुखाद्यनुसन्धानशून्यत्वात्; यो येनैक्यवान् चेतनः स तत्सुखाद्यनुसन्धाता, यथा सम्प्रतिपन्नः । अयं भावः – यदि चैत्रशरीराधिष्ठाता जीवो मैत्रशरीराधिष्ठातृजीवादभिन्नः स्यात् तर्हि मैत्रगतसुखाद्यननुसन्धाता न स्यात्; मैत्रशरीराधिष्ठातृजीववत् । एवं व्यवस्थया नानाऽऽत्मानः सिद्धाः । नह्यस्माभिर्धर्मभेदो वा भिन्नाश्रयधर्मभेदो वा व्यवस्थेत्यङ्गीक्रियते । सुखदुःखाद्यनुसन्धानभावाभावरूपव्यवस्थाया अङ्गीकृतत्वात् । अनुसन्धानं नामानेन सुखेनाहं सुखीत्यनुभवः । एतेनैतदप्यपास्तं[1] यदुक्तं चित्सुखेन – "व्यवस्थाशब्देन धर्ममात्राभिधाने दाहपाकादेरिव धर्मिभेदासाधकत्वात् भिन्नाधिकरणधर्मभेदाभिधाने चान्योन्याश्रयत्वात्; परस्परविरुद्धधर्मोक्तौ च विरोधस्य विचारासहत्वात् सहानवस्थानासिद्धेः; एकस्मिन्नप्यात्मनि 'पादे मे वेदना, शिरसि मे सुखम्' इति युगपत् सुखदुःखयोरनुभवात्; वध्यघातकभावस्य तु – 'नाजात एकोऽन्यं हन्ति, नाप्यन्याधारम्' इति न्यायेन सहावस्थानापेक्षत्वात्" इति । देवदत्तयज्ञदत्तादयो यद्यभिन्नाः, तर्हि तत्तच्छरीरगतसुखादिविषये स्वीयतयाऽनुभववन्तः स्युरित्यापादनात् । ननु दृष्टान्तेऽनुसन्धाने स्वरूपैक्यमात्रं न प्रयोजकम्; किन्तूपाधिभेदाभावोऽपि । प्रकृते तूपाधिभेदसद्भावात् कथमनुसन्धानप्रसङ्गः? मैवम् । स्वरूपैक्ये सति हस्त-

---

१ "परास्तम्" इति ग. पाठः ।

पादादीनां करणानां च भेदे[1] सत्यप्यनुसन्धानदर्शनात् । अन्यथोपाधिभेदाद्धस्तादिगतसुखादिभोग एकस्य न स्यात् । संश्लिष्टोपाधित्वमनुसन्धाने प्रयोजकमिति चेत्, तर्हि गर्भस्थसुखानुभवो मातुः स्यात् । सौभर्यादियोगिनां च नानादेहगतसुखदुःखाद्यनुसन्धानं न स्यात् । अतः स्वरूपैक्यमेवानुसन्धाने प्रयोजकम्[2] । बद्धमुक्तव्यवस्थया च जीवभेदः सिद्धः । नच कोऽपि मुक्तो नास्तीति प्रलापो युक्तः –

"बहवो ज्ञानतपसा पूता मद्भावमागताः ।"

इत्यादिप्रमाणविरोधादि[3]त्यलं दुर्मतखण्डनेन ।। * ।।

जडानां मिथो भेदः

स्यादेतत्; जडभेदस्तु कुतः? श्रूयताम् –

घटात् पटस्य[4] भेदस्तु प्रत्यक्षेणावसीयते ।
अभेदे तु तयोर्मानं न किञ्चिदपि विद्यते ।
भेदधीर्नास्ति चेन्न स्याद्व्यवहारोऽखिलेप्सितः[5] ।
बाध्या चेद्बाधकं स्वार्थं भेदाद्भिन्नं प्रदर्शयेत् ।
तथाऽपि दुस्त्यजो भेदो नो चेदिष्टं न सिद्ध्यति ।

अयं भावः – घटात् पटस्य भेदस्तावत् प्रत्यक्षसिद्धः । नच घटपटयोरभेदे प्रत्यक्षमनुमानमागमो वाऽस्ति प्रमाणम्[6] । नच 'सर्वं ब्रह्म' इत्यनेन वाक्येन घटपटयोरैक्यं बोध्यते; नापि जडाजडयोरैक्यम्; योग्यताविरहात् । नहि जडाजडयो-

---

१ "हस्तपादादीनां च भेदेऽपि" इति ग. पाठः ।

२ "अनुसन्धानप्रयोजकम्" इति क. ख. पाठः ।

३ "प्रमाणविरुद्धत्वात्" इति ग. पाठः ।

४ "पटात् घटस्य" इति ख. पाठः ।

५ "अखिले स्थितः" इति क. पाठः ।

६ यद्यपि घटपटयोरभेदः न परेषां मतेऽपि । तथाऽपि पारमार्थिकभेदानङ्गीकारात्, भेदस्य दुःसाधत्वसाधनाच्च इयदिदं वक्तव्यमापतितम् ।

रैक्यमनुन्मत्तो वक्ति । नच घटपटयोर्मिथ्यात्वं शङ्कनीयम् । विश्वसत्यत्वस्य साधितत्वात् । नच वाच्यं क्वापि भेदप्रतीतिर्नास्तीति । सर्वव्यवहारलोपप्रसङ्गात् । नह्यद्वैतवादिनाऽपि स्वसिद्धान्तपरसिद्धान्तयोर्दूष्यदूषकयोर्विवेको नेष्यत इति । अथास्ति चेद्भेदप्रतीतिः, तर्हि सा किं निष्कारणा, उत निर्विषया, अथ बाधितवषया? नाऽद्यः । कार्यस्य कारणावश्यम्भावात् । न द्वितीयः । निर्विषयत्वे ज्ञानत्वव्याघातात् । नापि तृतीयः । बाधादर्शनात् । नहि घटपटभेदं निषेधत्[1] प्रत्यक्षमागमं वा प्रतीमः । शुष्कतर्कस्त्वप्रतिष्ठितः स्वोपजीव्यविरोधान्नो जीवितुमपि क्षमते, किं पुनः प्रतिरोद्धुम् । दुर्बलत्वात् । नहि हरिणशाबस्तरक्षोः प्रतिपक्षी भवितुमर्हति ।

किञ्च बाधकं प्रमाणमपि किं भेदस्यैव ग्राहकम्, किंवा भेदाभावस्य, उत यस्य कस्यचित्? नाद्यान्तिमौ । विरोधाभावात् । नापि द्वितीयः[2] । भेदस्यैव स्थिरीकरणात् । भेदाभावोऽपि सिद्धयन् भेदाद्भिन्न एव सिद्धयति; अन्यथा तदसिद्धेः । सर्वं प्रमाणं खलु[3] प्रमाणाभासविषयात् स्वविषयं व्यावृत्तमेव व्यवस्थापयति । तथाच दुस्त्यजो भेदः । उक्तं च –

"जडानृतपरिच्छिन्नव्यावृत्तं ब्रह्म वा नवा ।
आद्ये तु भेदसिद्धिः स्यादन्त्ये स्याद्व्याहतिः श्रुतेः ।
असतः प्रतियोगित्वं सम्मतं तावदावयोः ।
अतोऽपि दुस्त्यजो भेदो 'नेतिनेति'श्रुतीरितः ।" ( )

भेदस्य धर्मिस्वरूपत्वम्

ननु भेदो धर्मिस्वरूपम्[4], किंवा धर्मः? नाऽद्यः । पट-भेदशब्दयोः[5] पर्या-

---

१ "घटपटभेदनिषेधि" इति ख. पाठः ।

२ "न द्वितीयः" इति ख. पाठः ।

३ "सर्वं खलु प्रमाणम्" इति क. पाठः ।

४ "धर्मिस्वरूपः" इति ख. पाठः ।

५ पटशब्दभेदशब्दयोरित्यर्थः ।

यतापातात् । नापि पटाद्भिन्न[1]स्तद्धर्मभूतो भेदः । धर्मधर्मिणोर्भेदाङ्गीकारेऽनवस्थापातात् । अन्यथाऽन्यतरावशेषप्रसङ्गात्[2] । अत्रोच्यते –

विभीषयसि चेद्भेदं विकल्पैः सा विभीषिका ।
अभेदेऽपि समाऽतोऽसौ न बिभेति कुतश्चन ।

अभेदेऽप्येवं विकल्पसम्भवात्, सविशेषाभेदाङ्गीकाराच्च नायं दोषः । तथाहि– जीवब्रह्मणोरैक्यमपि किं ब्रह्मस्वरूपम्, उत तद्धर्मः? नाऽद्यः । तस्य स्वप्रकाशतया शास्त्रावेद्यत्वापातात् । तच्छब्दानां पर्यायत्वापाताच्च । द्वितीयेऽपि धर्मधर्मिणोर्भेदाङ्गीकारेऽनवस्था स्यात् । अस्वरूपस्यापि सत्यत्वेऽद्वैतभङ्गप्रसङ्गात् । मिथ्यात्वे तत्परस्य 'तत् त्वमसि' इति वाक्यस्यातत्वावेदकत्वप्रसङ्गात् । अथ स्वरूपस्यापि विशेषाङ्गीकारात् समाधानमुच्यत इति; तर्हि समः समाधिः[3] ।

ननु घटात् पटस्य भेद इति धर्मिप्रतियोगित्वं प्रतीत्य हि भेदः प्रत्येतव्यः, भिन्नतया प्रतिपन्नयोरेव हि धर्मिप्रतियोगिभाव[4] इत्यन्योन्याश्रयदोषो दुष्परिहरः स्यात्, मैवम् । वैलक्षण्यं हि भेदः । यथा सास्नादिमत्त्वं गोर्भेदः । एवं सर्वत्र लक्षणं भेदः । तच्च निरपेक्षमेव गृह्यते । आकारविशेषो हि तत् । क्वचिदसाधारणधर्मः । तत्तच्छब्दस्यैव सापेक्षता; नत्वर्थप्रतीतेः । यथा प्रभाभावस्तम[5] इत्यत्र । अतः क्वान्योन्याश्रयता?

अथवा, इदमिदं नेति तादात्म्यप्रतियोगिकाभाव एव[6] । स च वस्तुस्वरूपमेवेति मीमांसकैरप्यङ्गीकृतः । स एव भेदोऽभिहितोऽतो नास्ति प्रतीतिद्वयमिति ।

भेदो धर्मिस्वरूपत्वात् तद्ग्रहेणैव गृह्यते ।
तत् प्रतीतिद्वयाभावान्नान्योन्याश्रयता भवेत् ।

---

१ "घटाद्भिन्नः" इति क. ग. पाठः ।

२ "अन्यतरमात्रावशेषप्रसङ्गात्" इति ख. पाठः ।

३ "इत्यावयोर्मते समः समाधिः" इति क. ख. पाठः ।

४ "धर्मिप्रतियोगित्वम्" इति ख. पाठः ।

५ अत्र मूलेषु किञ्चिद् गलितमिव । "भाभावस्तमः" इत्येतावदेव क्वचित् प्रतीयते ।

६ "तादात्म्यप्रतियोगिकोऽन्योन्याभाव एव" इति क. ग. पाठः ।

(विद्यमानस्य भेदस्य सम्यग्ज्ञातस्य वस्तुतः ।
युक्तं च प्रतियोगित्वं तस्मान्नान्योन्यसंश्रयः ।)[1]

न भेदो युगधर्मः । किन्त्वेकस्य धर्मोऽपरेण निरूप्यः । स च भेदो धर्मिणः स्वरूपमेव; तद्ग्रहेणैव गृह्यते । ततश्च धर्मिप्रतीतिरेव भेदप्रतीतिरिति प्रतीतिद्वयाभावा[2]न्नान्योन्याश्रयता । तथाऽपि प्रतिपन्नभेदस्यैव प्रतियोगित्वात्, घटात् पटस्य भेदसिद्धौ पटाद् घटस्य भेदसिद्धिरित्यन्योन्याश्रयतेति चेत्, न । विद्यमानभेदस्य वस्तुतः प्रतीतिमात्रेण प्रतियोगित्वोपपत्तेः ।

स्यादेतत्; यदि भेदस्य धर्मिस्वरूपत्वं युज्येत । नच तद्युक्तमिति चित्सुखेनोक्तम् –

"सापेक्षत्वात् सावधेश्च तत्त्वेऽद्वैतप्रसङ्गतः ।
एकाभावादसन्देहान्न रूपं वस्तुनो भिदा ।"

अयं भावः – 'भेदपटौ नाभिन्नौ, सापेक्षनिरपेक्षप्रतीतिकत्वेन विरुद्धधर्माधिकरणत्वात्, सम्मतवत् । किञ्च प्रतियोगिघटितस्य भेदस्य धर्मिस्वरूपत्वे प्रतियोगिनोऽपि धर्मिस्वरूपतापत्त्या सर्वाद्वैतप्रसङ्गात् । यन्निरूपितस्य यद्भवति तन्निरूपकस्यापि भवतीति व्याप्तेः । अपिच न भेदो वस्तुस्वरूपम्[3] । तथात्वे क्वाप्येकं वस्तु न स्यात् । एकाभावादनेकमपि न स्यात् । किञ्च न भेदो वस्तुस्वरूपम्, तत्प्रतीतावपि कदाचिदप्रतीयमानत्वात्; यो यत्प्रतीतावपि कदाचिन्न प्रतीयते नासौ तत्स्वरूपम्; यथा घटप्रतीतावप्रतीयमानः पटो न घटस्वरूपम् । नचासिद्धो हेतुः । संशयविपर्ययोस्तथा दर्शनात् । अपिच न भेदो धर्मिस्वरूपम्,[4] 'घटस्य भेदः' इति तत्सम्बन्धितया प्रतीयमानत्वात्; यो यत्सम्बन्धितया प्रती-

---

१ ( ) एतदन्तर्गतः श्लोकः ख. पाठे नास्ति । अन्यत्र तु गद्यमिव विसंष्ठुलतया दृश्यते । घ. पाठे परं श्लोकानुपूर्वी दृश्यते ।

२ "द्वयाभावात्" इतीयानेव ख. पाठः ।

३ "भेदो न वस्तुस्वरूपम्" इति ख. ग. पाठः ।

४ "वस्तुस्वरूपम्" इति ख. पाठः ।

यते नासौ तत्स्वरूपम्, यथा कम्बलो ब्राह्मणस्येति । भेदस्य पटस्वरूपत्वे पटभेद-शब्दयोः पर्यायतापत्तिः स्यात् । तस्मान्न स्वरूपं वस्तुनो भिदे'ति ।

अत्रोच्यते । यदुक्तम् – 'सापेक्षत्वान्न रूपं[1] वस्तुनो भिदा' इति, तदसत्; अनैकान्त्यात् । एकस्यैवाग्नेः सापेक्षनिरपेक्षप्रतीतिकत्वात् । ऐक्यस्य च ब्रह्म-स्वरूपत्वे जीवब्रह्मणोरैक्यमिति सापेक्षतया प्रतीतेः । यदुक्तम् – 'सर्वाद्वैत-प्रसङ्गतः न रूपं[2] वस्तुनो भिदा' इति । तदप्यसत् । यन्निरूपितस्य यद्भवति तन्निरूपकस्यापि भवतीति व्याप्त्यभावात् । यत्र चित्रगुर्देवदत्त आनीयते न तत्र चित्रा गावोऽप्यानीयन्ते । यदप्युक्तम् – 'विदारणात्मनो भेदस्य वस्तुस्वरूपत्वे क्वाप्येकं वस्तु न स्यात्; एकाभावादनेकमपि न स्यात्' इति । एतदपि मन्दम् । नहि भेदो विदारकः । किन्तु विदारणम् । नच तत्र व्याप्तिः । नहि द्वैधीभावस्य स्वस्यैव द्वैधीभावो दृष्टः । विदारकत्वेऽपि प्रतियोगिनो धर्मिणं विदारयेत्; नतु स्वत एव स्वस्य[3] । किञ्च न भेदो विदारणात्मा; किन्त्वन्योन्याभाव एव । यदप्युक्तम् – 'न भेदो धर्मिस्वरूपम्, तत्प्रतीतावपि कदाचिदप्रतीयमानत्वात्' इति, अयमप्यनैकान्तिको हेतुः । चैतन्ये प्रतीयमानेऽप्यैक्यस्याऽनन्दादेश्चाप्रतीय-मानत्वात् । अन्यथोपदेशानर्थक्यप्रसङ्गात् । विप्रतिपत्त्यभावप्रसक्तेश्च । यद-प्युक्तम् – 'भेदो न धर्मिस्वरूपम्, तत्सम्बन्धितया प्रतीयमानत्वात्' इति । तद-प्यसत् । 'ब्रह्मण आनन्दः', 'राहोः शिरः', 'जीवब्रह्मणोरैक्यम्', 'घटस्य स्वरू-पम्' – इत्यादावनैकान्तिकत्वात्[4] । सविशेषाभेदाङ्गीकाराच्च नास्माकं काचि-दनुपपत्तिरिति ।

किञ्चात्र कथमापादनम्? यदि भेदो दृश्येत तदाऽन्योन्याश्रयः स्यादिति चेत्, न; भेददर्शनस्य सम्मतत्वेन विपर्ययापर्यवसानात् । यदि भेदः प्रामाणिकः

---

१ "न स्वरूपम्" इति क. ग. पाठः ।

२ "न स्वरूपम्" इति ग. पाठः ।

३ अतः परं "नहि कुठारः स्वात्मानं विदारयति" इत्यधिकं क्वचित् ।

४ "अनैकान्त्यात्" इति ग. पाठः ।

स्यात् तदाऽन्योन्याश्रयः[1] स्यादिति चेत्, न; व्याप्त्यभावात् । किञ्चान्योन्याश्रय-दुष्टस्य व्यावहारिकत्वमपि कुतः? नहि मृदवास्तवीत्येतावता यस्य घटस्य कारणं तत एवोत्पन्नेति परस्यापि मनोगतम् । भेदप्रतीतिरसती, अन्योन्याश्रयग्रस्तत्वा-दिति चेत्, न; अपसिद्धान्तात् । अन्योन्याश्रयस्य परिहृतत्वादसिद्धेश्च ।

किञ्च घटपटादेरभेदो न कयाचित् श्रुत्या कथ्यत इत्यप्रामाणिकत्वात् प्रमाणविरुद्धत्वाद्दुर्बलत्वाच्च जडाद्वैतमतं दुर्मतमेव । तस्माद्भेदप्रतीतिः प्रत्यक्षे-णाप्युपपन्नतरा । धर्मिग्राहकतयोपजीव्येन प्रत्यक्षेण विरोधे श्रुतिरप्यपसरति; यथा – "यजमानः प्रस्तरः"[2] इति श्रुतिः; तत्र का कथा शुष्कतर्कस्येत्यलं विस्तरेण[3] ।। * ।। * ।।

इति श्रीमदखण्डवेदमार्गप्रवर्तकाचार्यनिखिलतार्किकचूडामणिसर्वतन्त्रस्वतन्त्र-
श्रीमद्राजेन्द्रतीर्थश्रीचरणकमलचञ्चरीकश्रीविष्णुदासार्यविरचितायां
वादरत्नावल्यां द्वितीयः सरः

---

१ "अन्योन्याश्रयता" इति क. पाठः ।

२ नहि यजमानस्य प्रस्तरत्वं श्रुतिर्विवक्षति । नवा प्रस्तरस्य याज-मान्यम् । यदि जीवस्य ब्रह्मतां विवक्षेत्, विवक्षेत् तर्हीदमपि । न विवक्षेत् । नहि श्रुतिरुन्माद्यति । तेन ज्ञायते यजमानस्थाने प्रतिनिधितया प्रस्तरस्य यजमानत्वव्यपदेश इति । एवमिहापि तात्स्थ्यादिनाऽभेदव्यवहारः सुघट इति ।

३ एतत्सरान्ते क्वचिदेवं पठ्यते—

"वचनकुसुमवृन्दैर्वृन्दसन्तानजातैः
पवनमुखविकीर्णैराहृतैरस्मकाभिः ।
सकलसृजनमृग्यैः पद्मनाभार्घयोग्यै-
रविकलफलसङ्घैः सन्त ईशं भजध्वम् ।"

तृतीयः सरः

ननु जीवादिभेदाः सर्वेऽप्यज्ञानकल्पिताः, सर्वस्य ब्रह्मण्यारोपितत्वात्, इत्यद्वैतवादिभिरुद्घोषितः पक्षः कुतो नाङ्गीक्रियते? अत्रभवद्भिराकर्ण्यताम् –

मानाभावादयुक्तत्वात् श्रुतिस्मृतिविरोधतः ।
अज्ञानारोपितं सर्वमिति पक्षो न युज्यते ।
(भेदाः स्वाभाविकाः सर्वे ह्यज्ञानं जीवगं च तत् ।
ब्रह्मज्ञानान्निवर्तेत ह्येवं पक्षोऽतिशोभनः ।)[1]

नह्यनाद्यनिर्वाच्याज्ञानेन सर्वं ब्रह्मण्यारोपितमिति[2] सम्मता श्रुतिरस्त्यावयोः । सत्यत्वे तु – "विश्वं सत्यम्" (ऋ. २.७.३.), "अथैनमाहुः सत्यकर्मेति सत्यं ह्येवेदं विश्वमसौ सृजते" ( );

"असत्यमाहुर्जगदेतदज्ञाः
शक्तिं हरेर्ये न विदुः परां हि ।
यः सत्यरूपी(?)[3] जगदेतदीदृक्
सृष्ट्वा त्वभूत् सत्यकर्मा महात्मा" ( ) इति
परमोपनिषत्;

("जीवेश्वरभिदा चैव जडेश्वरभिदा तथा ।
जीवभेदो मिथश्चैव जडजीवभिदा तथा ।

---

१ अयं श्लोकः क. ख. पाठयोर्न दृश्यते ।

२ "अज्ञानेनाऽरोपितं सर्वं ब्रह्मणीति" इति क. ग. पाठः ।

३ सर्वत्राप्येवमेव पाठः । सत्यरूपमिति वक्तव्यम् ।

मिथश्च जडभेदोऽयं प्रपञ्चो भेदपञ्चकः ।
सोऽयं सत्यो ह्यनादिश्च सादिश्चेन्नाशमाप्नुयात् ।
नच नाशं प्रयात्येषः—" इत्यादिश्वेताश्वतरश्वतरश्रुतिः(?);
"तस्मादेवाविकारस्य विष्णोरिच्छावशादिदम् ।
यथार्थमेव सम्भूतमिति वेदवचोऽखिलम्" इति हरिवंशे;)[1]
"असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्" (भ. गी. १६.८.)

इत्याद्याः स्मृतयश्च सन्ति । अज्ञानं च जीवाश्रितमीश्वरविषयं तज्ज्ञानान्निवर्तत इति स्वाभाविकभेदसत्यपक्षस्तु युज्यते ।

परमेतऽज्ञाननिरासः

मानाभावान्मानविरुद्धत्वाच्चाद्वैतपक्षेऽज्ञानं न युज्यते । तथाहि – अज्ञानमज्ञानकल्पितं नवा? नेतिपक्षेऽपसिद्धान्तः स्यात् । अन्यथा त्वभ्रमविषयत्वेन सत्यतापातः स्यात् । आद्ये त्वारोपितत्वेनाज्ञानापेक्षायामात्माश्रयाद्यन्यतरापातः स्यात् । आरोपो ह्यर्थज्ञानात्मकोऽज्ञानाधीन इत्यङ्गीकारात् ।

किञ्च, चैतन्यभेदकमज्ञानं व्याप्तमव्याप्तं वा? आद्ये यावदाश्रयावच्छेदकत्वशीलस्य तस्य सर्वग्रासित्वादात्मनोऽनेकभेदकारित्वानुपपत्तिरित्याद्यनिष्टं[2] स्यात् । द्वितीये तु मूर्तत्वेन क्रियावत्त्वात् यत्र यत्राविद्या गच्छति तत्र तत्र स्वोपहितं जीवं नयेत् । ततश्च तत्र विवरं स्यात् । अन्यतश्च द्विगुणीकृतं चैतन्यं स्यात् । अन्यथा तदैवानाद्यविद्यानिवृत्तेस्तत्तज्जीवस्य मोक्षः स्यात् । ततश्चैकात्म्योपदेशवैयर्थ्यं स्यात् ।

अपिच, अविद्यायाः सत्यतायां[3] तत्कार्यस्यापि सत्यत्वप्रसक्तिः । मिथ्यात्वे तस्याऽत्मन्यारोपो[4] वक्तव्यः । स स्वाभाविकः सनिमित्तको वा? आद्येऽनिर्मोक्ष-

---

१ एतावान् भागः क. ख. ग. पाठेष्वेव दृश्यते ।
२ "अनुपपत्त्याऽनिष्टम्" इति ग. पाठः ।
३ "अविद्यासत्यतायाम्" इति ग. पाठः ।
४ "तस्याप्यात्मन्यारोपः" इति क. पाठः ।

प्रसङ्गः । अन्त्ये,[१] किमात्मैव निमित्तम्, उताज्ञानान्तरम्? नाऽद्यः । निष्कलैकरसस्य चैतन्यस्य तदयोगात् । अन्यथा चाज्ञानाङ्गीकार[२]वैयर्थ्यापातात् । द्वितीये त्वेवमेव विकल्पे[३]ऽनवस्थाद्यापत्तिः स्यात्[४] ।

किञ्च, अविद्या प्रकाशते नवा? अन्त्ये तुच्छतापत्तिः । निरुपाख्यस्यैव तुच्छत्वस्वीकारात् । प्रथमे, स प्रकाशः किमविद्यास्वरूपम्, किं ब्रह्मस्वरूपम्, अथ तस्यास्तस्य वा धर्मः? नाऽद्यः । स्वप्रकाशत्वेन ब्रह्मवत् सत्यतापातात् । न द्वितीयः । तन्नित्यत्वेन नित्यमविद्याप्रकाशादनिर्मोक्षप्रसङ्गात् । नापि तृतीयः[५] । तयोर्ज्ञातृत्वानङ्गीकारात् । अध्यस्तं तदस्तीति चेत्, मैवम्, तस्याप्यध्यासस्याविद्याहेतुत्वेनान्योन्याश्रयणात् । तस्मादनुपपन्नैवाद्वैतमतेऽविद्या[६] । "दुर्घटत्वमविद्याया भूषणं नतु दूषणम्" इति चेत्, हन्त तर्हि घटादेरेव द्रष्टृत्वं निरधिष्ठानो भ्रम इत्याद्यङ्गीकार्यं स्यात् । तस्मात् दुष्टोऽयं पक्षः ।

किञ्च, अविद्यासत्त्वं प्रातिभासिकमेव परैरभ्युपगतम्[७] । तदविद्यास्फुरणं चैतन्यस्य दोषवशात्, एवमेव वा? आद्ये, स दोषोऽविद्यान्तरम्, ब्रह्मैव वा? आद्ये तत्प्रतिभासोऽपि दोषान्तरादिति प्रतिभासपरम्पराकृताऽनवस्था स्यात् । द्वितीये ब्रह्मणो नित्यत्वादविद्याया[८] विरामो न स्यात् । आद्यद्वितीये निर्दोषधीगोचरत्वात् सत्या स्यात् । अपिच, अपारमार्थिकेयमविद्याप्रतीतिरविद्याधीनेति वाच्यम् । "सा च तदधीना, अविद्यासत्ता प्रातीतिकी" इत्यङ्गीकारात् । तथाचान्योन्याश्रयो दुस्त्यजः स्यात् ।

---

१ "द्वितीये" इति ग. पाठः ।
२ "अन्यथाऽज्ञानाङ्गीकार –" इति ख. ग. पाठः ।
३ "विकल्पे त्रियमाणे" इति ख. पाठः ।
४ "अनवस्थाद्यापातात्" इति ग. पाठः ।
५ "न तृतीयः" इति ख. पाठः ।
६ "अनुपपन्नैवाविद्याऽद्वैतमते" इति ख. पाठः ।
७ "परैरङ्गीकृतम्" इति ख. पाठः ।
८ "नित्यत्वेनाविद्यायाः" इति ख. पाठः ।

किञ्च, प्रकाशमानेयमविद्या किं ब्रह्मात्मना प्रकाशते, किं तदन्यत्वेन? नाऽद्यः । अनुभवविरोधात् । नोत्तरः । अध्यासानुपपत्तेः । अपिच, अविद्याध्यासद्रष्टृत्वमपि किं केवलस्य, अथोपहितस्य? आद्येऽपसिद्धान्तः । द्वितीयेऽन्योन्याश्रयः – अविद्याधीनं द्रष्टृत्वं तदधीना चाविद्याया क्लृप्तिरिति। अविद्या स्वेनैव कल्पिता चेत् आत्माश्रयणं स्यात् । अविद्यान्तरेण चेत् अनवस्थापत्तिः स्यात् । स्वनिर्वहकत्वकल्पना तूभयोः स्वरूपसिद्धौ पश्चात्तनी स्यात् ।

किञ्चेदं कस्याज्ञानम्? किं जीवस्य, अथ जडस्य, अथ ब्रह्मणः? नाऽद्यः । ब्रह्मव्यतिरिक्तस्य तस्याभावात् । अत एव न द्वितीयः । अनङ्गीकाराच्च । यथाऽऽहु – "प्रमाणवैकल्यादेव तदग्रहणसिद्धेः" ( ) इति । नापि तृतीयः । तस्याखिलज्ञत्वात् । यो हि यत्र ज्ञानवान् नासौ तत्राज्ञानवानिति नियमात् । शुद्धस्यैवाज्ञत्वे च स्वरूपातिरिक्तस्याज्ञानसम्बन्धे निमित्तस्याभावात्[1] यावत्स्वरूपं स्यात् । मुक्तस्यापि तदापद्येत । अथ शुद्धमेव भ्रान्त्याऽज्ञमिति चेत्, न, अप्रामाणिकत्वात्; व्याहतेश्च ।

"यद्यस्य परमेशित्वं तदा स्याद्दुःखिता कुतः ।
दुःखी चेत् कुत ईशत्वमनीशो ह्येव दुःखभाक् ।
कुतः सर्वविदोऽज्ञत्वं क्व भ्रमोऽप्यज्ञतां विना ।
तस्मान्नैवेश्वरो जीवस्तत्प्रसादात्तु मुच्यते ।" ( )

इत्याद्यागमविरोधश्च । किञ्च, अज्ञानसिद्धौ भ्रमसिद्धिः, अज्ञानस्यैवाधिष्ठानावरणविक्षेपहेतुत्वात्; तत्सिद्धावज्ञानसिद्धिरित्यन्योन्याश्रयः स्यात् । किञ्च, यज्ज्ञानादविद्या बाध्यते तस्मिन् सर्वथा स्फुरति सति कथं तत्राज्ञानावकाशः स्यात्? श्रुत्याऽपि नाधिकं बोध्यते । तथा सत्यतत्त्वावेदकत्वं स्यात् । प्रकाशवद्वृत्तिर्बाधिकेति चेत्, तर्हि ज्ञानबाध्यत्वं न स्यात् । तदुक्तम् –

"नापि ब्रह्मण्यविद्यास्थगितनिजतनौ विश्वमेतद्विवृत्तं
तस्मिन् सा स्वप्रकाशे कथमिव विलगेत् तत्प्रकाशैकबाध्या ।

---

१ "निमित्तस्यासम्भवात्" इति ग. पाठः ।

नह्येतस्मिन्नविद्याविलयकृदधिको वृत्तिवेद्यो विशेषो
बाधो वृत्तिस्वरूपाद्यदि भवति तदा ज्ञानबाध्यत्वभङ्गः"
( ) इति ।

किञ्च ब्रह्माश्रिताज्ञानेन किमाव्रियते? न तावत् ब्रह्मस्वरूपम् । तस्य स्वप्रकाशत्वात् । नापि तद्धर्माः । तस्य निर्धर्मकत्वात् । नच मिथ्याभूतविशेषाः सन्तीति वाच्यम् । परस्पराश्रयापत्तेः । अज्ञानसिद्धौ तत्कार्यमिथ्याविशेष-सिद्धिः;[1] तत्सिद्धौ चाऽव्रियमाणसिद्धचाऽज्ञानसिद्धिरिति । तदुक्तम् –

"निर्विशेषे स्वयम्भाते किमज्ञानावृतं भवेत् ।
मिथ्याविशेषोऽप्यज्ञानसिद्धिमेव ह्यपेक्षते" ( ) इति ।

नापि जीवो जडं वा । प्रोक्तदोषानुषङ्गात्; जडावरणानङ्गीकाराच्च – "सा च न जडेषु वस्तुषु तत्स्वरूपावभासं प्रतिबध्नाति" इति । किञ्च, अज्ञानस्य किं कर्तृ? ब्रह्मैवास्त्विति चेत्, मैवमप्रामाणिकं भाषिष्ठाः । नहि परमात्मनो निष्कलङ्कस्याज्ञानमस्तीति प्रतिपादयत् श्रौतं स्मार्तं वा वचनं क्वाप्यस्ति । जीवब्रह्मणोरैक्यं तु कफोणिगुडायितम् । निराकृतत्वात् । नाप्यक्षादिः । तस्य शास्त्रैकप्रमाणकत्वात् । नापि जीवादिः । तस्य त्वन्मते[2] ब्रह्मव्यतिरिक्तस्या-भावात्[3] । अतो व्यापकाव्रियमाणाद्यभावात् व्याप्याज्ञानावरणस्याप्यभाव इति सिद्धम् ।

ननु भावरूपमनाद्यनिर्वाच्यमज्ञानं प्रमाणसिद्धम्; तत् कथं व्यपोह्यं स्यादिति चेत्; 'अहमज्ञो मामन्यं च न जानामि' इत्यपरोक्षावभासस्य ज्ञानाभाव-विषयत्वे को दोषः? येन साक्षिणा सुखादिसद्भावो गृह्यते तेनैव तदभावोऽपी-त्यावयोः सम्मतत्वात् । धर्मिप्रतियोगिज्ञानभावाभावयोरनुपपत्तिरिति चेत्, न, तथा सति ज्ञानाभावस्य तव[4] सर्वथाऽप्यप्रतीतिप्रसङ्गात् । ततश्च तन्निरासप्रयासा-

---

१ "तद्ग्राह्यमिथ्याविशेषसिद्धिः" इति ख. पाठः ।

२ "तन्मते" इति क. पाठः ।

३ "ब्रह्मव्यतिरिक्ताभावात्" इति ख. पाठः ।

४ "तव ज्ञानाभावस्य" इति ग. पाठः ।

नुपपत्तिः । मम साक्षिणा ज्ञानाभावप्रतीतिरिति चेत् तर्हीयमेव सा स्यादित्यलं विस्तरेण ।। * ।।

विवरणाद्युक्तानुमानभङ्गः

यदुक्तं विवरणे – "विवादगोचरापन्नं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्त-स्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं भवितुमर्हति, अप्रकाशितार्थ-प्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत्" इति । एतच्चातीव मन्दम् । प्रकाशकत्वस्य ज्ञाने प्रदीपप्रभायां चैकस्याभावेनासिद्ध्यादिप्रसङ्गात् । शब्द-साम्यमात्रेण चानुमाने गोत्वेन वागादेरपि शृङ्गित्वसाधनप्रसङ्गात् । [1]तमो विरोधित्वमेकमुभयत्रास्तीति चेत्; तमोऽविद्या,[2] अन्धकारो वा? नाऽद्यः । असिद्धेः । दृष्टान्तस्य साधनवैकल्याच्च । न द्वितीयः । असिद्धेः । अयं भावः – किमिदं प्रकाशकत्वं नाम? किं ज्ञानत्वम्, किं ज्ञानकरणत्वम्,[3] अथवा ज्ञानहेतुत्व-मात्रम्, अन्यद्वा? नाऽद्यः । दृष्टान्ते साधनशून्यतापातात्[4]। न द्वितीयः । इन्द्रि-यार्थसंनिकर्षेऽनैकान्त्यात्; पक्षे तदभावेनासिद्धेश्च । नापि तृतीयः । इन्द्रियादि-ष्वनैकान्त्यात्; स्वरूपासिद्धेश्च । न तुरीयः[5]। उक्तदोषानुषङ्गात् ।

किञ्च, अज्ञानप्रकाशिकेयमनुमितिरज्ञानं निरस्यति नवा? आद्ये त्वज्ञान-स्याप्यज्ञानान्तर[6]मङ्गीकरणीयं स्यात् । तदपि तथेत्यनवस्था स्यात् । द्वितीये निष्फलैवेयमनुमितिः, निरसनीयाभावात्; प्रकाशितमात्रप्रकाशकत्वाच्च । किञ्च, अस्याः पक्षान्तर्भावे हेतोरसिद्धिर्बाधो[7] वा स्यात् । पक्षान्यत्वे त्वत्रैवा-नैकान्त्यं स्यात् ।

---

१ "तमोविरुद्धत्वम्" इति क. ख. पाठः ।

२ "तमोऽप्यविद्या" इति ख. पाठः ।

३ "किंवा ज्ञानकरणत्वम्" इति क. ख. पाठः ।

४ "साधनवैकल्यापातात्" इति ग. पाठः ।

५ "नापि तुरीयः" इति क. पाठः ।

६ "अज्ञानस्याज्ञानान्तरम्" इति क. पाठः ।

७ "हेत्वसिद्धिर्बाधः" इति ग. पाठः ।

यदुक्तं चित्सुखेन – "विगीतं देवदत्तनिष्ठप्रमाणज्ञानं देवदत्तनिष्ठ-[1]प्रमाभावातिरिक्तानादेर्निवर्तकम्, प्रमाणज्ञानत्वात्, यज्ञदत्तप्रमाणज्ञानवत्" इति। तन्न। घटोऽयमेतत्प्रागभावातिरिक्तानादेर्निवर्तकः, घटत्वात्, घटान्तरवत्, इत्याभाससमानयोगक्षेमत्वात्। देवदत्तप्रमा देवदत्तगतस्य प्रमाभावव्यतिरिक्तानादेर्निवर्तिका न भवति, प्रमात्वात्, यज्ञदत्तप्रमावत्, इति सत्प्रतिपक्षत्वाच्च। प्रमाया अन्तःकरणनिष्ठत्वेनासङ्गतत्वाच्च। धारावहिकद्वितीयादिविज्ञानेऽनैकान्त्याच्चेत्यलं पल्लवेन।

किञ्च ब्रह्माश्रितेनाज्ञानेन किमावृतं स्यात्? न तावद्ब्रह्मस्वरूपम्; तस्य स्वप्रकाशत्वेन नित्यसिद्धत्वात्। नचाऽनन्दादिरूपं प्रतिबध्नातीति युक्तम्; आनन्दादेर्ब्रह्मस्वरूपमात्रत्वेन नित्यसिद्धत्वात्। अभिन्नविशेषत्वे सविशेषवादापातात् तत्त्ववादिमताङ्गीकारितापत्तेः। भिन्नविशेषत्वे मिथ्यात्वापातात्। अतो व्यापकाभावात् व्याप्यस्याज्ञानस्याप्यभावः।

किञ्च सत्यं चेदज्ञानम्, तदाऽपसिद्धान्तः स्यात्। आत्मन्यारोपितं चेत् तर्ह्यज्ञानारोपः स्वाभाविकः सहेतुको वा? आद्येऽनिर्मोक्षप्रसङ्गः। अन्यथाऽऽत्मस्वरूपस्यापि तदापत्तेः। द्वितीये तन्निमित्तमात्मस्वरूपम्, उताज्ञानान्तरम्? नाऽद्यः। निष्कलङ्कैकरसस्य चैतन्यस्य तदयोगात्। योगे तदज्ञानकल्पनावैयर्थ्यात्। चैतन्यमात्रहेतुत्वे मोक्षेऽपि तत्प्रसङ्गाच्च। द्वितीये पूर्ववदज्ञानापेक्षयाऽनवस्था स्यात्। नच बीजांकुरानवस्थावदनवद्यत्वम्, असिद्धविषयत्वात्। किञ्च, अविद्याप्रतिभासोऽप्यविद्यान्तरमपेक्षत इति तत्प्रतिभासानवस्था स्यात्। किञ्च, अविद्यासम्बन्धोऽपि कथमसङ्गस्य[2] स्यादिति पूर्वोक्तदोषापातः। अपिच, न तावज्जडमज्ञानाश्रयः; अनङ्गीकारात्। जडस्य कल्पितत्वेनाज्ञानसापेक्षतया[3] मिथः संश्रयादिप्रसङ्गाच्च। नापि जीवः; मायावादिमते ब्रह्मव्यतिरिक्तजीवाभावात्।

---

१ प्रमाभावेति प्रमाप्रागभाववचनम्। एवमुत्तरत्रापि प्रमाभावव्यतिरिक्तानादेरित्यस्य प्रमाप्रागभावव्यतिरिक्तानादेरित्यर्थः। क्वचित् तथैव पाठः।

२ "असङ्गस्य कथम्" इति ग. पाठः।

३ "सापेक्षत्वेन" इति ग. पाठः।

ननु यद्यपि जीवो न ब्रह्मणो भिद्यते; [1]तथाऽप्युपाधिकृतभेदोऽस्त्येवेति चेत्, न, मिथःसंश्रयापत्तेः। तथाहि–किमुपाधिः कल्पितः, अकल्पितो वा? नाऽद्यः। आरोपितत्वेनाज्ञानापेक्षायामन्योन्याश्रयापातात्। आरोपो ह्यर्थज्ञानात्मकोऽज्ञानाधीनः। अज्ञानं ह्यधिष्ठानमाच्छाद्यार्थज्ञानयोरुपादानं भवतीति परस्य मतम्। ततश्च, अज्ञानसिद्ध्यधीनाऽऽरोपितोपाधिसिद्धिः; अज्ञानसिद्धिश्च कल्पितोपाध्यधीना; तद्भिन्नस्यैव जीवस्याज्ञानाश्रयत्वादिति। चक्रकाश्रयत्वं वा स्यात् – अज्ञानाधीनः कल्पितोपाधिः, तदधीनो जीवभेदः, भिन्नाश्रयमज्ञानमिति। अज्ञानव्यक्तिपरम्पराश्रयणे चानवस्था स्यात्। अज्ञानस्यैवोपाधितयाऽङ्गीकारे चाऽत्माश्रयता–स्वेन भिन्ने जीवे स्वावस्थितिरिति। नन्वज्ञानं जीवब्रह्मभेदश्चानादिरेव; हन्त तर्हि सत्यः स्यात्। अथाप्यज्ञानाधीन एवेति चेत्, तर्ह्यन्योन्याश्रयाद्यपरिहार्यं[2] स्यात्। किञ्चिदुपकाराभावेऽधीनताया मृषात्वात्। अकल्पितपक्षे सर्वत्राद्वैतवादिनामपसिद्धान्तः स्यात्। किञ्च स्वेन विशिष्टे स्वयं तिष्ठति चेत्, कुतश्चैत्रः स्वांसं नाऽरोहेत्? अविद्याऽद्भुतशक्तिरिति चेत्, न, अप्रामाणिकत्वात्। किञ्च, उपाधिसम्बन्धस्य प्रतिसम्बन्धि न तावच्छुद्धम्; ब्रह्माज्ञानवादप्रसङ्गात्। अथोपाधिसम्बद्धमेवेति चेत्, न, आत्माश्रयाद्यापत्तेः। ननु सर्वेऽप्युपाधयस्तत्सम्बन्धाश्चानादयः, तत् कथमेतत्? मैवम्। तेषां निमित्तनैमित्तिकभावोऽस्ति, नवा? आद्येऽनवस्थाऽनिस्तारः। द्वितीये वैयर्थ्यम्; सर्वेषां शुद्धे प्रसक्तिश्च स्यात्। अतोऽनेकदोषदुष्टत्वादसमीचीनोऽयं जीवाज्ञानवादः ॥ * ॥

ब्रह्माज्ञानवादनिरासः

ब्रह्माज्ञानवादी च ब्रूते – "जीवाज्ञानपक्षे जीवो ब्रह्मणोऽभिन्नः, भिन्नो वा? आद्ये ब्रह्माज्ञानवादः। द्वितीये किं स्वभावतो भिन्नः, अथोपाधितः? नाऽद्यः। अपसिद्धान्तापातात्[3]। द्वितीयेऽप्युपाधिः सत्यः, मिथ्या वा? आद्येऽप-

---

१ "अथापि" इति ख. पाठः।

२ "अन्योन्याश्रयोऽपरिहार्यः" इति ख. पाठः।

३ "अपसिद्धान्तात्" इति ख. पाठः।

सिद्धान्त एव । द्वितीये च, अज्ञानसिद्ध्यधीना मिथ्योपाधिसिद्धिः, अज्ञानसिद्धिश्च मिथ्योपाध्यधीना, तद्भिन्नस्यैवाज्ञानाश्रयत्वात्; अतोऽन्योन्याश्रयत्वमपरिहार्यं स्यात् । यदा शुद्धस्यैव ब्रह्मणोऽज्ञानाश्रयत्वं तदा नायं दोषः । अज्ञानस्य शुद्धब्रह्माश्रयत्वेन मिथ्योपाध्यधीनत्वाभावात्" इति । एतच्चायुक्तम् । मानाभावादसम्भावितत्वाच्च । नहि ब्रह्मणोऽज्ञानं सम्भवति । तस्य परमात्मनः स्वतः सर्वज्ञत्वात् । यो हि यत्र ज्ञानवान् नासौ तत्राज्ञानवानिति व्याप्तेः । सार्वज्ञ्यमप्यज्ञानापेक्षं चेत्, न । मा भूत् प्रमाणेन सार्वज्ञ्यम्, मा च भूत् भ्रान्त्या, स्वरूपज्ञानेनैव परमात्मनः सार्वज्ञ्याङ्गीकारात् । एतेन –

"स्वरूपतः प्रमाणैर्वा सर्वज्ञत्वं द्विधा स्थितम् ।
तच्चोभयं विनाऽविद्यासम्बन्धं नैव सिद्ध्यति" ( )

इति चित्सुखोक्तमपि निरस्तम् । असङ्गश्रुतिस्तु लेपाभावविषया । किञ्च नहि ब्रह्मण एवाज्ञानादिदोषसद्भावे किञ्चित् प्रमाणमस्ति । प्रत्युत – "निरनिष्टो निरवद्यः" ( ), "परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे" ( ) इत्यादिश्रुतिस्मृतिबाधश्च स्यात् । अपिच, प्रकाशरूपे स्वप्रकाशे परे ब्रह्मणि तत्प्रकाशैकबाध्याऽविद्या कथं लगेत्? नह्यालोकेऽन्धकारस्यावस्थितिः सम्भवति । ब्रह्मस्वरूपज्ञानं नाविद्या बाधते; किन्तु वृत्तिज्ञानमेवेति चेत्, हन्त किं वृत्तिज्ञानं विषयविशेषप्रकाशनशक्त्या बाधते, उत मुद्गरादिवत् प्रदीपवच्च स्वरूपेणैव? नाऽद्यः । वृत्तिज्ञानस्यापि ब्रह्मस्वरूपमात्रविषयत्वात् । अधिकविषयत्वेऽतत्त्वावेदकत्वप्रसङ्गात् । द्वितीये विषयप्रकाशननिरपेक्ष एव बाधश्चेत् ज्ञानबाध्यत्वभङ्गः स्यात् । ततश्चापसिद्धान्तः स्यात् ।

किञ्च, शुद्धस्यैव ब्रह्मणोऽज्ञानम्, उतोपहितस्य? द्वितीये जीवाज्ञानवादः । प्रथमे व्याहतिः । नह्यज्ञानवच्छुद्धं चेति न व्याहतम् । शुद्धस्यैवाज्ञत्वे स्वरूपातिरिक्तस्याज्ञानसम्बन्धे निमित्ताभावात् स्वाभाविकत्वात् यावत्स्वरूपमवस्थानावश्याम्भावात् मुक्तस्यापि तदापद्येत । ततश्च "अविद्यास्तमयो मोक्षः" इत्युक्त्वान्मुक्तत्वव्याहतिः, जीवस्य सदोषत्वमुक्त्वा परमात्मन एव निर्दोषत्वोक्तिव्याहतिश्च प्रसज्येत । अथ व्याहतिभयान्मिथ्योपाधिभिन्नस्य जीवस्यैवाज्ञानमङ्गी-

करोषि, तदाऽन्योन्याश्रयः स्यात्; ब्रह्माज्ञानव्याहतिश्च । किञ्च, अज्ञानं ब्रह्मणः स्वाभाविकं चेदानन्दादिवत् सत्यं स्यात् । सत्यत्वादनिवर्त्यं च स्यात् । श्रुतिस्त्वस्मन्मते[1] सावकाशा स्यात्[2] ।। * ।।

---

१ "श्रुतिर्मन्मते" इति ख. पाठः ।

२ इतः परं पूर्वोत्तरयोर्नातीव सङ्गतः कश्चनाधिकः पाठः क्वचन दृश्यते। तद्यथा –

"स्यादेतत्, "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः", "तत्त्वं नारायणः परः", "यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् । तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्" इत्यादिश्रुतिभिः; "वासुदेवः परं ब्रह्म परमात्मा सनातनः", "परं ब्रह्म परं धाम पवित्रं परमं भवान्", "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" इत्यादिस्मृतिभिश्च नारायण एव परं ब्रह्म परमात्मा जगदीश्वरः । स च "निरनिष्टो निरवद्यः" इत्यादिश्रुतिभिरवगतः । तस्यैवावतारा रामकृष्णादयश्च ततोऽत्यन्ताभिन्नाः "एकधैवानुद्रष्टव्यं नेह नानाऽस्ति किञ्चन" इत्यादिश्रुतिभिः, "कृष्णरामादिरूपाणि परिपूर्णानि सर्वदा । नचाणुमात्रभिन्नानि तथाऽप्यस्मान् विमोहयेत्" इत्यादिस्मृतिभिश्च निर्णीताः । तत्रावतारेषु ब्रह्मणः सदोषत्वं पुराणे रामायणे च प्रतीयते । अस्ति तावदुत्पत्तिविनाशश्च । अस्ति चाज्ञानं प्राकृतो देहश्च । अस्ति चास्वतन्त्रत्वं सीताकृते व्यसनं च । ततः संशयो जायतेऽवतारेषु भगवान् निर्दुष्टो नवेति ।

"अत्र ब्रूमः – केषां संशयः? न तावत् सज्जनानाम् । "निर्दोषमेव तं ब्रह्मा ददर्शाशेषरूपिणम् । निर्दोषमेव रुद्रोऽद्राङ्क निर्दोषं तं पुरन्दरः" इति श्रुत्या, "नैव ते जायन्ते न म्रियन्ते नैषामनुज्ञा न बन्धो न मुक्तिः । सर्व एवैते पूर्णा अक्षरा अमृताः परमाः परानन्दाः" इत्याद्युपनिषद्भिः भगवता भाष्यकारेण सन्देहापाकरणात् । श्रुतिविरोधे तु पुराणवचनं यथानटनं प्रवृत्तमुपेक्षणीयम् । "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्" इति न्यायात् । यत्र विरोधः श्रुत्या नास्ति तत् सर्वं ग्राह्यम् । एवं व्यवस्थितेः । "दर्शयेन्नटवद्धरिः" इति वचनादसुरमोहनार्थं तथा दर्शयति भगवान् । वस्तुतस्तु निर्दुष्ट एव । नहि नटस्य कृत्रिमस्त्रीभावे वस्तुतः स्त्रीत्वं भवति । तथा नटनं कथयतः पुराणस्यापि को दोषः? अथ

परमात्मनो दुष्टमोहनमपि कुतः? तेषां तमोयोग्यानां भगवति दोषारोपात्तमः-प्राप्त्यर्थमिति ब्रूमः । एवं खलु भगवत्सङ्कल्पस्थितिश्रवणम् –

"त्रिविधा जीवसङ्घास्तु देवमानुषदानवाः ।
तत्र देवा मुक्तियोग्या मानुषेषूत्तमास्तथा ।
मध्यमा मानुषा ये तु सृतियोग्याः सदैव हि ।
अधमा निरयायैव दानवास्तु तमोलयाः ।
मुक्तिर्नित्या तमश्चैव नाऽवृत्तिः पुनरेतयोः ।
देवानां निरयो नास्ति तमश्चापि कथञ्चन ।
नासुराणां तथा मुक्तिः कदाचित् केनचित् क्वचित् ।
असुराणां तमःप्राप्तिस्तदा नियमतो भवेत्" इति ।

"सत्यसङ्कल्पतो विष्णुर्नान्यथा तु करिष्यति" इति च ।

"तदर्थं भगवानसुरस्वभावानां तत्त्वज्ञानं मा भूदिति बुद्धो भूत्वा वञ्चयति। रामाद्यवतारेषु यथा नटति । विष्णुप्रचोदितो रुद्रोऽपि दुष्टशास्त्राणि प्रवर्तयति। स्वशक्त्यावेशवशादेव मनुष्याधमैरद्वैतशास्त्राण्यकारयत् । एवं जानतां न कुत्रापि सन्देहः । तामसानां मनुष्याणां भवतु नाम सन्देहो नरकप्राप्त्यर्थम् । "संशयात्मा विनश्यति" इत्युक्तेः । अत्रार्थे बहूनि श्रुतिस्मृतीतिहासपुराणवचनानि सन्ति । तथाहि –

"यो जातमस्य महतो महि ब्रवत् ।
सेदु श्रवोभिर्युज्यं चिदभ्यसत" इति ऋग्वेदे ।

"उत्पत्तिर्वासुदेवस्य प्रादुर्भावो नचापरः ।
देहोत्पत्तिस्तदन्येषां ब्रह्मादीनां तदीरणात् ।
देहोऽनादिर्हरेर्नित्यो ब्रह्मादीनामनित्यकाः ।
मुख्योत्पत्तिस्तदन्येषामाविर्भावो हरेर्जनिः" इति परमश्रुतौ ।

"वर्जितः सर्वदोषैर्यो गुणसर्वस्वमूर्तिमान् ।
स्वतन्त्रो यद्वशाः सर्वे स विष्णुः परमो मतः" इति महोपनिषदि ।

"नित्यपूर्णाखिलगुणो विदोषः सर्वदैव यः ।

स्वतन्त्रः परमो विष्णुर्जन्ममृत्यादिवर्जितः" इति च ।

"वासुदेवः सङ्कर्षणः प्रद्युम्नोऽनिरुद्धोऽहं मत्स्यः कूर्मो वराहो नारसिंहो वामनो रामो रामः कृष्णो बुद्धः कल्किरहं शतधाऽहं सहस्रधाऽहममितोऽहमनन्तोऽहं नैव ते जायन्ते न म्रियन्ते नैषामनुज्ञा न बन्धो न मुक्तिः। सर्व एव ह्येते पूर्णा अक्षरा अमृताः परमाः परानन्दाः" इति चतुर्वेदशिखायाम्।

"यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् ।
तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्" इत्याद्युपनिषत्सु ।

"ब्रह्मा शिवः सुराद्याश्च शरीरक्षरणात् क्षराः ।
लक्ष्मीरक्षरदेहत्वादक्षरा तत्परो हरिः ।
स्वातन्त्र्यशक्तिविज्ञानसुखाद्यैरखिलैर्गुणैः ।
निःसीमत्वेन ते सर्वे तद्वशाः सर्वदैव तु ।
चेष्टाप्रदश्च सर्वेषामेक एव परो हरिः ।
तस्य नान्योऽस्ति सर्गादिकर्ता निर्दोषकश्च सः" इति परमश्रुतौ ।

"यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ।"

"अहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्वन्तः समुद्रे ।"

"चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।"

"एको नारायण आसीन्न ब्रह्मा नेशानो नाग्नीषोमौ नेमे द्यावापृथिवी ।"

"एको नारायण आसीन्न ब्रह्मा नच शङ्करः । स मुनिर्भूत्वा समचिन्तयत् ।
तत एते व्यजायन्त विश्वो हिरण्यगर्भोऽग्निर्यमो वरणरुद्रेन्द्रा इति ।"

"वासुदेवो वा इदमग्र आसीन्न ब्रह्मा नच शङ्करः ।
नेन्द्रसूर्यौ नच गुहो न सोमो न विनायकः ।"

"यदात्मको भगवांस्तदात्मिका व्यक्तिः । किमात्मको भगवान्? ज्ञानात्मक आनन्दात्मकः शक्त्यात्मकः" इत्यादिश्रुतिषु;

"श्री नारदः –

निर्दोषश्चेत् कथं विष्णुर्मानुषेषूदपद्यत ।
चिन्ताश्रमव्रणाज्ञानदुःखयुग्दृश्यते कथम् ।

एष मे संशयो ब्रह्मन् हृदि शल्य इवार्पितः ।
अनुद्धार्योऽपरैर्मर्त्यैः सूक्तिशक्त्या त्वमुद्धर ।
"श्रीब्रह्मोवाच –
स्त्रीपुंमलाभियोगात्मा देहो विष्णोर्न जायते ।
किन्तु निर्दोषचैतन्यसुखां नित्यां स्वकां तनुम् ।
प्रकाशयति सैवेयं जनिर्विष्णोर्नचापरा ।
तथाऽप्यसुरमोहाय परेषां च क्वचित् क्वचित् ।
दुःखाज्ञानश्रमादीन् स दर्शयेच्छुद्धसद्गुणः ।
क्व व्रणादि क्व चाज्ञानं स्वतन्त्राचिन्त्यसद्गुणं ।
दौर्लभ्यायैव मोक्षस्य दर्शयेत् तान्यजो हरिः ।
मिथ्यादर्शनदोषेण तेन मुक्तिं न यान्ति च ।
तमो यान्ति च तेनैव तस्माद्दोषविवर्जितम् ।
प्रादुर्भावगतं चैव जानीयाद्विष्णुमञ्जसा " इति ब्रह्माण्डे ।
"श्रीभागवते च –
"मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः ।
कुतोऽन्यथा स्यू रमतः स्व आत्मन् सीताकृतानि व्यसनानीश्वरस्य ।
यत्पादपङ्कजपरागनिषेवकाणां दुःखानि सर्वाणि प्रयान्ति चैवम् ।
स ब्रह्मवन्द्यचरणो जनमोहनाय स्त्रीसङ्गिनामिति रतिं प्रथयंश्चचार।"
"गीतासु च –
"जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन" इति च ।
"ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्" इति च ।
"भविष्यत्पर्वणि –
"न तस्य कश्चिद्दोषोऽस्ति पूर्णाखिलगुणो ह्यसौ ।

ननु यद्यज्ञानं ब्रह्मस्वरूपनिबन्धनं स्यात् तदा भवेदुक्तो दोषः । नचैवम्; यतः शुद्धमेव ब्रह्म भ्रान्त्याऽज्ञमिति चेत्, मैवं वोचः । मानाभावात्, अन्योन्याश्रयापाताच्च । अज्ञानसिद्धौ भ्रमसिद्धिः, अज्ञानस्यैवाधिष्ठानावरणविक्षेपहेतुत्वात्; तत्सिद्धावज्ञानमिति त्वयैवोच्यमानत्वात् । किञ्च "अनाद्यनन्तं जगदेतदीदृक्" इति संसारिणां सर्वदा स्थितेः सर्वदा संसार्येव ब्रह्म स्यात् । किञ्च विश्वभ्रान्तिरपि ब्रह्मणः दोषात्, स्वभावाद्वा? आद्ये स दोषः किं ब्रह्मैव, अथाविद्या? नाऽद्यः । अनिवृत्तिप्रसङ्गात् । द्वितीये दोषस्य मिथ्यात्वेन तद्दर्शनहेतुगवेषणयाऽनवस्थितिः

.सर्वदेहस्थरूपेषु प्रादुर्भावेषु चेश्वर" इति ।

"भारते च –

"वसुदेवसुतो नायं नायं गर्भेऽवसत् प्रभुः ।
नायं दशरथाज्जातः नचापि जमदग्नितः ।
जायते नैव कुत्रापि म्रियते कुत एव नु ।
न वध्यो मुह्यते नायं बध्यते नैव कुत्रचित् ।
कुतो दुःखं स्वतन्त्रस्य नित्यानन्दैकरूपिणः ।
अजानन् पृच्छतेऽन्यान्यान् तनुं त्यक्त्वा दिवं गतः ।
इत्याद्यसुरमोहाय दर्शयामास नाटचवत् ।
अविद्यमानमेवैषः कुहकं तद्विदुः सुराः ।
प्रादुर्भावा हरेः सर्वे नैव प्राकृतदेहिनः ।
निर्दोषगुणसम्पूर्णो दर्शयत्यन्यथैव तु ।
दुष्टानां मोहनार्थाय –" इति ।

"एषं मोहं सृजाम्याशु यो जनान् मोहयिष्यति" इति च ।

"त्वामाराध्य तथा शम्भो ग्रहीष्यामि वरं सदा" इति पाद्मे ।

"कुत्सितानि च मिश्राणि रुद्रो विष्णुप्रसादतः ।
चकार शास्त्राणि विभुः –" इत्यादि ।

"एवमनेकवचनसद्भावान्निर्दोषः परमात्मा सर्वावतारेष्विति ब्रह्ममीमांसायां निर्णीतमित्यलं विस्तरेण" ।। * ।।

स्यात् । स्वनिर्वाहकल्पना तु ब्रह्मदोषसिद्ध्युत्तरकालीना । किञ्चानादिरेकैवाविद्येत्यभ्युपगच्छताऽपि तत्सत्त्वं प्रतिभासिकमेवोपगतम् । नच तत्प्रतिभासोऽसङ्गस्य चैतन्यस्य विनाऽज्ञानप्रतिभासादुपपद्यते । तथाच प्रतिभासपरम्परादिकृताऽनवस्था दुस्त्यजा स्यात् । अविद्याद्रष्टृत्वमपि कथं विनाऽविद्यां स्यात्? एवमविद्यासम्बन्धोऽसङ्गस्य कथं स्यात्? अनादित्वे कथमज्ञानाधीनता स्यात्? स्वाभाविकत्वे कथं सत्यता न स्यात्? मिथ्यात्वे कथमन्योन्याश्रयादि न स्यात्?

अपिच, अविद्यासम्बन्धोऽपि किं प्रदेशवृत्तिः, उत सर्वगतः? द्वितीये सर्वग्रासित्वादविद्याया ब्रह्मवद्व्याप्तत्वम्, अत एव नित्यत्वं सत्यत्वं च स्यात् । ब्रह्मणः प्रतिभासमात्रशरीरस्य च्छन्नत्वे विलयप्रसङ्गात् । नित्यसिद्धत्वहानिश्च स्यात् । निरधिष्ठानाविद्या प्रतिभासोऽपि न स्यात् । प्रथमे स प्रदेशः किं स्वाभाविकः, उताविद्याकल्पितः? अद्येऽपसिद्धान्तः । द्वितीये दुस्त्यजाऽनवस्था स्यात् । नह्यस्माकमिव युष्माकं मते स्वाभाविकाः प्रदेशाः सन्ति । नापि परब्रह्मैवाङ्गं दोषास्पदमित्यत्र श्रौतं स्मार्तं वा किञ्चिद्वचनमस्ति । जीवब्रह्मैक्यं त्वप्रामाणिकमेवेत्युक्तम् । तस्मात् सकलश्रुतिस्मृतियुक्तिविरुद्धत्वादप्रामाणिकत्वाच्च दुष्टोऽयं ब्रह्माज्ञानपक्षः ।। * ।।

अद्वैतशास्त्रे विषयाद्यसम्भवः

परमते चैवमज्ञानासम्भवादधिकारिविषयाद्यसम्भवाच्च वेदान्तानारम्भ उपदेशानुपपत्तिश्च स्यात् । तत्त्वविन्मते तु सर्वं युज्यते । तथाहि – अज्ञो ह्यधिकारी भवति । अज्ञातश्च विषयो भवति । अज्ञाननिवृत्तिश्च प्रयोजनं शास्त्रस्य । अद्वैतवादिमते चाज्ञानासम्भवादधिकार्याद्यसम्भवः । ततश्चानारम्भणीयं स्याच्छास्त्रम् । उपदेष्टा च कस्मै किमुपदिशेत्? तदुक्तं खण्डनखण्डने–

"नासिद्धायोपदेशः स्यात् स्वात्मने नच तद्विदे ।
न भिन्नायैक्यबोधः स्यात् भ्रान्तश्चेत् स गुरुः कथम्" इति ।

अद्वैतोपदेशः किमसिद्धाय? किं स्वात्मन एव? किं स्वतो भिन्नतया प्रमिताय शिष्याय? किं भ्रान्त्यैव भिन्नतया प्रतीताय? आद्ये कस्मै किमुपदिशेत्? उपदेशस्य श्रोतृप्रतिपत्त्यर्थत्वात् । न द्वितीयः । वैयर्थ्यात् । परबोधनार्थमज्ञातज्ञापनार्थं

ष्वलूपदेशः । न तृतीयः । वञ्चकत्वापातात् । तत्त्वतो भिन्नः शिष्यस्तथैव प्रमितः । गुरुश्चाभ्रान्तः कथमैक्यं बोधयेत्? विप्रलम्भकतापातात् । नापि तुरीयः । भ्रान्तश्चेत् तत्त्वोपदेशे गुरुः कथं स्यात्? अनवधेयवचनत्वात् ।

तव मते शास्त्रेऽधिकारी कः? न तावत् परमात्मा । तस्य सर्वज्ञत्वात् । नापि जीवः । ब्रह्मव्यतिरिक्तस्याभावात् । कश्च विषयः शास्त्रस्य? जीवब्रह्मणोरैक्यमिति चेत्; तद्यथार्थम्, अयथार्थं वा? आद्ये ब्रह्माभिन्नम्, भिन्नं वा? नाऽद्यः । ब्रह्मणः स्वप्रकाशत्वेन नित्यसिद्धत्वात् । सिद्धार्थबोधकत्वे च शास्त्रस्य वैयर्थ्यापातात् । "अप्राप्ते शास्त्रमर्थवत्" इति न्यायात् । नच शास्त्रं भेदभ्रममेव व्युदस्यति, यथोक्तम् – "सिद्धं तु निवर्तकत्वात्" इति वाच्यम्; ऐक्ये प्रकाशमाने भेदभ्रमस्यैवासम्भवात् । अप्रकाशमाने तु स्वप्रकाशब्रह्मस्वरूपमात्रत्वविरोधः । नचाविद्यावशात् स्वरूपस्याप्यनवभास इति वाच्यम्; निरंशत्वात्, सर्वथाऽप्यनवभासप्रसङ्गात् । किञ्चैक्यस्य ब्रह्मस्वरूपमात्रत्वे तत्पदेनैव सिद्धत्वात् 'त्वमसि' इति व्यर्थं स्यात् । ऐक्ये प्रकाशमानेऽपि भेदभ्रमश्चेत् कदाऽप्यनिवृत्तिः स्यात् । नापि द्वितीयः । ब्रह्मणोऽत्यन्तभिन्नस्यापि सत्यत्वे भेदसत्यतापातात्; अपसिद्धान्तापाताच्च । अयथार्थप्रतिपादकत्वे शास्त्रमनुपादेयं स्यात् । यदयथार्थप्रतिपादकं तत् प्रेक्षावदनुपादेयमिति व्याप्तेः । अतत्त्वावेदकत्वं च तत्त्वमस्यादिवाक्यानां स्यात् । भेदाभावोऽपि विषयश्चेदेवमेवेत्यलम् ।

प्रयोजनं ज्ञानेन साध्या मुक्तिः । सा किं ब्रह्मैव, तदितरा? ब्रह्मैव चेत् प्रागपि सिद्धत्वात् साध्या न स्यात् । अधिकाकाराङ्गीकारे मिथ्यात्वापातात् । द्वितीये सा सत्या, अध्यस्ता वा? प्रथमे भेदस्य सत्यतापत्तिः[1] । साऽप्यध्यस्ता चेत् निःशेषाविद्यानिवृत्तिर्न स्यात् । तन्मूलाया अविद्याया विद्यामानत्वात् । नचाविद्यामन्तरेणाध्यासो भवतामिष्टः । अविद्यानिवृत्तिरपि निवर्तते चेत् प्रपञ्चोन्मज्जनं स्यात् । नित्या चेत् भेदसत्यता स्यात्; पूर्वोक्तदोषाश्च[2] प्रादुःष्युरित्यलं विस्तरेण ॥ * ॥

---

१ "भेदसत्यतापत्तिः" इति ख. पाठः ।

२ "पूर्वोक्ताश्च दोषाः" इति क. ख. पाठः ।

किञ्च, निवर्तकज्ञानमपि स्वोपादानमज्ञानमुत्पत्तिज्ञाप्तिस्थित्यर्थमपेक्षते । तथाच कथं स्वोपजीव्यं निवर्तयेत्? स्वयं च स्थित्वा कथमविद्यां निवर्तयेत्? तां विना क्षणमपि स्थित्यनुपपत्तेः । युगपन्नश्यति चेत् नाश्यनाशकत्वानुपपत्तिः । सर्वत्रेश्वरेच्छादेर्हेतुत्वाङ्गीकारान्नास्माकं कश्चित् दृष्टान्तः सम्मतोऽस्ति ।

किञ्च, यावदिदं ब्रह्म स्वयं प्रकाशते तावदेव साक्षाद्धीविषयः, किंवाऽसाधारणधर्मविशिष्टम्? नाऽद्यः । वैयर्थ्यात् । भ्रमनिवृत्त्यभावप्रसङ्गाच्च । नहीदमंशज्ञानमात्रेण पूर्वभ्रमनिवृत्तिः । किन्तु शुक्तित्वाद्यसाधारणधर्मदर्शनेनैव । तस्मादलौकिकप्रज्ञेनापि भवता पूर्वविषयप्रकाशादधिकविषयप्रकाशोऽङ्गीकरणीय एव । नहि पूर्वभ्रमकालज्ञानमात्रात् भ्रमनिवृत्तिः । नापि बाधकज्ञानप्रकाश्यप्रकाशेऽपि भ्रमः । शुक्तित्वप्रकाशेऽपि यदि भ्रमः स्यात् तर्हि कदाऽप्यनिवृत्तिः स्यात् । अधिकविषयत्वे चाधिकं सत्यं मिथ्या वा? नाऽद्यः । सिद्धान्तव्याघातात् । नोत्तरः । तत्त्वावेदकत्वव्याघातात् ।

एवमनेकदोषसद्भावान्नाद्वैतं प्रतिपादयितुं वेदान्तप्रवृत्तिः । अपितु यत् सकलगुणोदारं निरस्तसमस्तदोषं सकलजीवजडात्मकात् प्रपञ्चादत्यन्तभिन्नं नारायणाख्यं परं ब्रह्म, तत् प्रतिपादयितुं सकलश्रुतिस्मृतीनां तदुपकरणभूतब्रह्ममीमांसायाश्च प्रवृत्तिरिति । तदुक्तम् –

"सर्वोत्तमं सर्वदोषव्यपेतं गुणैरशेषैः पूर्णमन्यं समस्तात् ।
वैलक्षण्याज्ज्ञापयितुं प्रवृत्ताः सर्वे वेदा मुख्यतो नान्यथा तु" इति ।। * ।।

[1] इति श्रीमदखण्डवेदमार्गप्रवर्तकाचार्यनिखिलतार्किकचूडामणिसर्वतन्त्रस्वतन्त्र-
श्रीमद्राजेन्द्रतीर्थश्रीचरणकमलचञ्चरीकश्रीविष्णुदासार्यविरचितायां
वादरत्नावल्यां तृतीयः सरः

---

१ अन्ते क्वचिदेवं स्तुतिः श्रूयते –

"नो धत्ते जडतां न भङ्गमयते नीचस्थलं नेहते
स्खालित्यं नच याति नैति कृशतां क्षोभं क्वचिन्नाञ्चते ।
मानं नोज्झति नो जहाति च पदं व्यर्थं न कोकूयते
कल्येयं जयतीर्थकोविदवचःकल्लोलिनी सेव्यताम् ।"

चतुर्थः सरः

एवं स्थितेऽपि केचिदनालोचितसमीचीनवेदान्तमार्गा निखिलं[1] जगदपलपन्तः सकलप्रमाणपदवीमवधीरयन्तः श्रुतिशतसमधिगतपरमपुरुषगुणगणाकर्णन[2]प्रद्वेषोज्जृम्भितवाग्गुम्फनां[3] गभीरयन्तस्तत्त्वतः परमात्मनो गुणगणान् नोरीचक्रुः । तान् प्रति ब्रूमः –

विष्णोः कल्याणधर्माः श्रुतिशतविहिताः सर्वथा नैव बाध्याः
नात्रापच्छेदनीतिः सुनियतविषये नो विकल्पावकाशः ।
नित्यान् सत्यांश्च धर्मान् प्रथयति निगमः सादरं मुक्तयेऽतो
वैधा धर्मा निषेध्या न कथमपि हरेः किन्तु हेया निषेध्याः ।

अयमर्थः – परमात्मनो गुणाः कुतो नाङ्गीक्रियन्ते? किं साधकप्रमाणाभावात्, उत बाधकसद्भावात्, अथवाऽनित्यत्वात्, किंवोपासनाशेषत्वात्, आहोस्वित् तत्त्वोपदेशेऽनुक्तत्वात्, किंवा तेषां सत्यत्वे सर्वासामैक्यश्रुतीनामुपप्लवापातात्, किंवा दुर्निरूपत्वात्[4]?

नाऽद्यः । "यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः" (आथ. १.१.९.) "एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः

---

१ "निखिलजगत्" इति क. ख. ग. पाठः ।

२ "गुणाकर्णन" इति क. ग. पाठः ।

३ अत्र लिपिकृतः सम्भ्रान्ताः । क्वचित् "वाग्गुम्फाम्" इति, क्वचित् "वागुल्काम्" इति, क्वचित् "वागुत्काम्" इति, क्वचित् "वाग्गुम्फानाम्" इति; एवं क्वचित् "गम्भीरयन्तः" इति, क्वचित् "ईरयन्तः" इति – इत्येवं सम्भिन्नः पाठसम्मर्दः ।

४ "दुर्निरूप्यत्वात्" इति क. ग. पाठः ।

सत्यसङ्कल्पः" (छा. ८.१.५.) इत्यादिश्रुतिशतविहितत्वेन हेतोरसिद्धेः । अप्राप्तज्ञापनं हि विधिः; गुणा अनूद्यन्त इति चेत्, न । श्रुतिं विना प्राप्त्यभावात् । "नेन्द्रियाणि नानुमानं वेदा ह्येवैनं वेदयन्ति तस्मादाहुर्वेदाः" ( ) इति श्रुतेः[1] ।

द्वितीये, बाधकं किमनुमानम्, उताऽगमः? नाऽद्यः । केवलानुमानस्य वेदैकगम्येऽर्थे प्रसरानङ्गीकारात् । तथाऽऽह[2] भगवान् सूत्रकारः – "कामाच्च नानुमानापेक्षा" (ब्र. सू. १.१.१८.), "तर्काप्रतिष्ठानात् –" (२.१.१२.) इति । द्वितीयेऽसिद्धिः । नहि 'ईश्वरस्य सार्वज्ञ्यादिकमारोपितमेव, न तत्त्वतोऽस्ति' इति प्रतिपादयत् श्रौतं स्मार्तं वा वचनं प्रतीमः । "नेह नानाऽस्ति" इति श्रुतिः सम्यग् व्याख्याता – 'इह' ब्रह्मणि 'किञ्चन' धर्मादिकं 'नाना' पृथक् 'नास्ति' इति; किन्त्वपृथगस्तीति न्यायतः सिद्धत्वात्, "एवं धर्मान् पृथक् पश्यन्" इति वाक्यशेषाच्च निश्चयात् । धर्मधर्मिणोर्हि तादात्म्यसम्बन्धो व्यासमतेऽभिहितः[3] । तथाच सन्ति धर्माः, तेऽपि परमात्मना सविशेषाभिन्ना इति द्वैपायनीयं मतं श्रुत्योच्यते ।

केचित् परमात्मा निर्गुण एवेति मन्यन्ते । अपरे सगुणत्वेऽपि गुणानां ततोऽत्यन्तभेदं[4] मन्यन्ते । इतरे भेदाभेदौ । अन्ये तु, आनन्दादयो द्विविधाः भिन्नाः स्वरूपभूताश्चेति प्रास्थिषत । एतत् पक्षचतुष्टयमनयैव श्रुत्या निराकृतं भवति । यदि धर्मा एव न सन्ति, "नेहास्ति किञ्चन", "एवं धर्मान्[5] पश्यन्" इत्येव वक्तव्यम्; नानेति पृथगिति[6] च व्यर्थमेवाऽपद्यते । तेन सन्ति धर्माः, किन्तु न भिन्नाः, नापि भिन्नाभिन्ना इति श्रुत्यभिप्रायः । एवं च श्रुतिः धर्मादिकं नाना नास्तीत्यनेन

---

१ इयं पिप्पलादश्रुतिरिति तत्त्वनिर्णये स्थितम् ।

२ "तथाहि" इति ख. पाठः । "यथाऽऽह" इति च क्वचित् ।

३ "अभिमतः" इति क. ग. पाठः ।

४ "अत्यन्तभिन्नताम्" इति ग. पाठः ।

५ "धर्मम्" इति ख. पाठः ।

६ "नाना पृथगिति" इति क. ग. पाठः ।

भेदं निराकार्षीत्; इवेत्यनेन भेदाभेदौ निराकरोत्[1]; "धर्मान् पृथक् पश्यन्" इत्यादिना निर्गुणवादं ज्ञानानन्दादेर्द्वैविध्यं[2] च निरास्थदिति[3]। अनयैव श्रुत्या विशेषोऽपि ज्ञायते। यथोक्तम् –

"उक्त्वा धर्मान् पृथक्त्वस्य निषेधादत एव हि।
विशेषो ज्ञायते श्रुत्या भेदादन्यश्च साक्षितः" इति।

परमात्मगुणानां ततो भेदाभावेऽपि भेदप्रतिनिधिना विशेषेण भेदव्यवहारो युज्यत इति सर्वमनवद्यम्।

ननु "यः सर्वज्ञः" इति सगुणवाक्यस्य "केवलो निर्गुणश्च" (श्वे. ६.११) इति बाधकमस्तीति चेत्, मैवम्। तयोः सर्वथा विरोधाभावात्। नहि निर्गुण-श्रुतिसङ्कोचाश्रयणे विरोधोऽस्ति। निर्गुणवाक्यस्य त्रिगुणनिषेधेनापि[4] चरितार्थ-त्वात्। अन्यथा –

"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च"

इत्यत्र साक्षित्वादीनां गुणत्वात् स्वोक्तिविरोधः स्यात्। तस्मात् यथा – "न

---

१ "निराकरोत्" इति नास्ति ख. पाठे।

३ "ज्ञानानन्दादिद्वैविध्यम्" इति क. ग. पाठः।

३ अत्र निर्गुणत्वनिराकरणेन मायावादो निराकृतः। नाना नास्तीत्यनेन गुणानां भगवतश्चात्यन्तभेदवादिनस्तार्किका भाट्टाश्च निराकृताः। भाट्टा अपि हि भेदमेव सङ्गिरन्ते। तथाह्याह पार्थसारथिः – "'रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति' इति मत्वर्थीयनिर्देशादात्मानन्दयोर्भेदोऽवगम्यते। तथा 'आनन्दं ब्रह्मणो विद्वान्', 'स एको ब्रह्मण आनन्दः' इति षष्ठ्याऽऽनन्दाद्ब्रह्म व्यतिरिच्यते। यत्तु 'विज्ञानं ब्रह्म', 'आनन्दं ब्रह्म' इति च सामानाधिकरण्यं तद्धर्ममात्रवचनत्वेन धर्मधर्मिणोरभेदान्नीलोत्पलादिवदुपपन्नम्" इति। अवशिष्टं पक्षद्वयं भास्करी-याणां रामानुजीयानां चेति।

४ "निषेधेन" इति क. ग. पाठः।

हिंस्यात् सर्वा भूतानि", "अग्नीषोमीयं पशुमालभेत" इत्यादिषु उत्सर्गापवाद-न्यायेन व्यवस्थाऽऽश्रीयते, तथा प्रकृतेऽपि स्यात् । न तत्र वैधहिंसा निषिद्ध्यते, रागतः प्राप्तैवेति चेत्; तर्हि प्रकृतेऽपि न वैधाः सार्वज्ञ्यादिगुणा निषिद्ध्यन्ते, किन्तु तर्काभासप्राप्ताः प्राकृतधर्मा एवेति निश्चीयताम् । भारतेऽप्युक्तम् – "त्रैगुण्यवर्जितमजं विभुमाद्यमीशम्"[1] (१.१.१.) इति ।

सर्वथा गुणा बाध्यन्ताम्, किं व्यवस्थाश्रयणेनेति चेत्; न । अत्यन्तबाधितार्थत्वे सकलगुणश्रुतीनां सर्वथा चाप्रामाण्यप्रसङ्गात् । अस्त्विति चेत्; मैवं मीमांसाविरुद्धं भाषिष्ठाः । विहितस्य सर्वथा बाधे तु विकल्पाश्रयणं क्वापि न स्यात्[2] । "प्रतिषेधः प्रदेशेऽनारभ्यविधाने च प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यात्" (पू. मी. १०.८.१.) इति[3] दशमाध्याये पर्युदासाधिकरणानारम्भश्च[4] स्यात् । तत्र विहितस्य सर्वथा प्रतिषेधायोगादिति स्थितेः[5] ।

किञ्च निर्गुणवाक्यं सामान्यतः प्रवृत्तं न विहितविशेषगुणपरिपन्थिता-

---

१ भारताद्यपद्यमिदमधुनातनकोशेषु नोपलभ्यते । आचार्यपादैस्तु तात्पर्यनिर्णये भारताद्यपद्यतयेदं व्याख्यातम् । अर्वाक्तनैरन्तरितमिति भाति । अत एव तद्व्याख्यायां भावप्रकाशिकायामुक्तम् – "इदमाद्यं पद्यमसहमानाः केचिदादौ न लिखन्ति । केरलदेशस्थपुरातनपुस्तकेषु अद्यापि दृश्यते" इति ।

२ "न क्वापि स्यात्" इति क. पाठः ।

३ प्रदेशे "नार्षेयं वृणीते न होतारम्" इत्यतिदेशवाक्ये – प्रदेश इत्यतिदेशः – तथा "येयजामहं करोति" इति येयजामहमन्त्रस्य अनारभ्यविधाने च सति "नार्षेयम्", "नानूयाजेषु" इति नञ् प्रतिषेधार्थकः । ततश्च विहितप्रतिषिद्धत्वात्विकल्पः स्यादिति सूत्रार्थः ।

४ "अनारम्भः स्यात्" इति क. पाठः ।

५ तथाहि मीमांसकानां भणितम् – "प्रतिषेधस्य प्राप्त्यपेक्षत्वादवश्यं प्रतिषेधता शास्त्रेणैव प्रतिषेध्ययोर्वरणयेयजामहयोर्महापितृयज्ञेऽनूयाजेषु च प्राप्तिः प्रतीक्षितव्या । प्राप्तिश्च निर्दोषशास्त्रकारितत्वादशक्या मिथ्याकर्तुम्" इति शास्त्रदीपिकायाम् ।

गन्धमप्याटीकते । "अस्थूलमनण्वह्रस्वमदीर्घम्" (बृ. ३.८.८.) इत्यादि-विशेषवचनं तु तर्काभासप्राप्तस्थूलत्वादेः प्राकृतगुणस्यास्तु बाधकम् । नहि स्थूलत्वं सार्वज्ञ्यादिवद्विहितम्; नापि तत् कल्याणगुणः । किन्तु तदभाव एव गुणः । स चाङ्गीकृत एव सूत्रकृता – "अदृश्यत्वादिगुणको धर्मोक्तेः" (ब्र. सू. १.२.२१.), "अन्यभावव्यावृत्तेश्च"[1] (१.३.१२.) इत्यादिसूत्रैः । तथाच ये गुणा विहिता न ते निषिद्ध्यन्ते; ये च निषिद्ध्यन्ते न ते विधीयन्त इति नियामात् न क्वाप्यनुपपत्तिरिति ।

ननु "पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्" (पू. मी. ६.५.५४.) इत्यपच्छेद-न्यायेन सगुणवाक्यस्य बाधः किं न स्यात्? मैवमविचारितरमणीयं भाषिष्ठाः । तत्र हि उद्गातृप्रतिहर्त्रोरुभयोरप्यपच्छेदनियमो नास्ति । क्रमेणापच्छेदोऽप्य-नियतः । उभयोरपच्छेदेऽपि उद्गात्रपच्छेदः पूर्वभावी इतरश्चरमभावीति वा विपर्ययेणेति वा नियमो नास्ति । अतोऽपच्छेदन्यायविषयः प्रयोगा-धीनविरोधः । सगुणनिर्गुणवाक्यविरोधस्तु स्वरूपप्रयुक्तः; विधिनिषेध-रूपतया सुनियतपौर्वापर्यश्च । तस्मादनियतविरोधस्यानियतपौर्वापर्यस्य विष-योऽपच्छेदनयो नात्र प्रवर्तते । सति चान्यत्र प्रामाण्येऽपच्छेदनयः । अन्यतरापच्छेदे बाधकाभावेन प्रामाण्यसिद्धेः[2] । युगपदपच्छेदेऽपि विकल्पत उभयोः प्रामाण्य-सम्भवात् । क्रमेणापच्छेद एव पूर्वबाधः । तथाऽपि प्रयोगान्तरे प्रामाण्यं सिद्ध्य-त्येव । प्रकृते तु सर्वथा त्वप्रामाण्यमापद्यते । मिथ्याविषयत्वे[3] त्वप्रामाण्यस्या-

---

१ "अस्थूलमनण्वित्यादिना स्थूलाण्वादीनामन्यवस्तुस्वभावानां व्यावृत्तेश्च" इति भाष्यवचनम् ।

२ अयमर्थः – उद्गातृप्रतिहर्त्रोरुभयोरप्यपच्छेदस्थले यद्युद्गाता पूर्व-मपच्छिन्द्यात् तदोद्गातृप्रायश्चित्तस्य, यदि प्रतिहर्ता तदा प्रतिहर्तृप्रायश्चित्तस्या-ननुष्ठानेऽपि न तद्वाक्यस्याप्रामाण्यम् । यत्र केवलमुद्गाता केवलं वा प्रतिहर्ताऽप-च्छिन्द्यात् तत्र तद्वाक्यस्य साफल्यात् । प्रकृते तु सर्वथा गुणनिषेधे गुणवाचिनां क्व नाम साफल्यम्?

३ "मिथ्यात्वविषये" इति क. ग. पाठः । "मिथ्यात्वविषयेऽर्थे" इति ख. पाठः । क्वचित् "मिथ्यात्वे" इत्येतावदेव ।

वर्जनीयत्वात् । निर्दुष्टशास्त्रस्याप्रामाण्याङ्गीकरणमतिसाहसं मीमांसाविरुद्धं च । अतो नात्रापच्छेदनयावकाशः । किन्तूत्सर्गापवादनयस्यैवात्रावकाशः । नो चेत्, हिंसाविधिनिषेधवाक्ययोरपि अपच्छेदनयावकाशादग्नीषोमीयं पश्वालम्भनमकर्तव्यं स्यात्; "न हिंस्यात्" इति निषेधस्य प्रबलत्वादिति । नचात्र विकल्पावकाशः । विकल्पो हि क्रियायामेव; नतु सिद्धे वस्तुनि विकल्पः सम्भवति । तस्माद्विहितकल्याणगुणव्यतिरिक्तहेयगुणविषयोऽयं निषेधः ।

एवं सगुणनिर्गुणविद्ययोरविरोधे सम्भवत्यपि यत् परेण भिक्षुणा स्वशास्त्रे भगवद्गुणनिराकरणं कृतं तद्द्वेषमूलमेव । विचार्यमाणे निर्गुणविद्यातः सगुणविद्याया एव प्राबल्यमित्युक्तं[1] खण्डनखण्डने –

"आद्या विद्याऽनवद्या सुनियतविषया[2] युक्तियुक्तो[3]पजीव्या
स्वार्थाऽसाधारणार्था त्विति विदितबला सिद्धसिद्धान्तसिद्धा ।
नान्यैवं निर्गुणा निर्गुणजनकलिता तत् तमोऽर्थं किमर्थं
भिक्षो रक्षःस्वभावाद् बहुगुणनिधये ब्रह्मणेऽसूयसि त्वम् ।"

अयं भावः – सगुणा विद्या हि पूर्वा; ततश्चासञ्जातविरोधित्वाद्विदितप्राबल्या । एवमनवद्यत्वात्, निरवकाशत्वात्, अविरुद्धार्थत्वात्, उपजीव्यत्वात्, अबाधितमुख्यार्थत्वात्, असाधारणार्थत्वात्, कृष्णाद्वैपायनादिभिरङ्गीकृतत्वाच्च । अनेवंविधत्वाच्च निर्गुणविद्या दुर्बलेत्यवसीयते ।

"आद्या"

तथाहि – "एष सर्वेश्वरः एष सर्वज्ञः" (माण्डू १.६.), "सत्यं ज्ञानमनन्तं ब्रह्म" (तै. २. १.), "एको देवः" (श्वे. ६.११.) इत्यादि सगुणशास्त्रं पूर्वम्; निर्गुणशास्त्रं च परम् । विधिनिषेधरूपत्वाच्च । पूर्वपरयो-

---

१ इतः परं क. ख. पुस्तकयोः "सम्प्रतिपन्नप्रमाणगोचरत्वात" इत्यधिकम् ।

२ "श्रुतिशतविषया" इति क्वचित् ।

३ "तर्कयुक्ता" इति ख. पाठः ।

विरोधे चाऽश्रीयमाणेऽपि "श्रुतेर्जाताधिकारः स्यात्" (पू. मी. ३.३.१.) इति तृतीयाध्यायस्य तृतीयपादाद्याधिकरणन्यायेन[1] पूर्वस्यैव बलीयस्त्वं स्यात् । अत्र हि वेदशब्द उपक्रमगतोऽसञ्जातप्रतिपक्षत्वाद्यथाश्रुतार्थपर एव; उपक्रमस्य बलीयस्त्वात् । उपसंहारगतमृगादिपदमुपसञ्जातप्रतिपक्षविज्ञानत्वाद्यथाश्रुतं सत् तदेकवाक्यतामप्रतिपद्यमानं तदनुगुणमेवार्थं लभते, नान्यथेति निर्णीतम् । तथा प्रकृतेऽपि "एको देवः" इत्युपक्रमे एकत्वसङ्ख्या क्रीडादिगुणा निर्दोषत्वं चावगतम् । उपक्रमस्य बलीयस्त्वात् उपसंहारगतं निर्गुणपदं दुर्बलत्वात् तदनुगुणमेव प्राकृतत्रिगुणराहित्यार्थं लभते । "अचोदितं कर्मभेदात्"[2] (पू. मी. ३.४.३६.) इत्युपक्रमाधिकरणन्यायेनापि पूर्वस्य बलीयस्त्वम् । अत्रपूर्वपरविरोधे पूर्वस्य प्राबल्यमसञ्जातबाधादङ्गीकृतम् । अत एवोपक्रमबलात् दातुरिष्टिर्न प्रतिग्रहीतुरिति स्थितम्[3] । तथा प्रकृतेऽपि ।

"अनवद्या"

किञ्च, सगुणवाक्यं करणदोषबाधकप्रत्यययोरभावात् प्रतीयमानार्थे निरवद्यम् । निर्गुणवाक्यं यद्यप्यपौरुषेयतया त्रिगुणराहित्येऽर्थे प्रमाणम्; तथाऽप्यशेषविशेषराहित्येऽर्थे व्याख्यातृदोषकलुषितत्वान्न प्रमाणम् ।

---

१ अयमर्थः – उपक्रमे श्रूयते – "अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात् सामवेदः" इति । उपसंह्रियते च – "उच्चैर्ऋचा क्रियते । उपांशु यजुषा । उच्चैः साम्ना" इति । तत्र किमुच्चैष्ट्वादय ऋगादिजातानां मन्त्राणां धर्माः; ऋचा मन्त्रेणोच्चैरिति; किंवा वेदधर्माः, ऋग्वेदेनोच्चैरिति? सिद्धान्तस्तु उपक्रमप्राबल्यात् वेदेनोच्चैरिति ।

२ "अचोदितं च कर्मभेदात्" इति सूत्रानुपूर्वी मीमांसकैः पठ्यते । अत्र तु सर्वत्रापि चकाररहित एव पाठः ।

३ तत्र हि "यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणांश्चतुःकपालान् निर्वपेत्" इति प्रतिग्रहीतुरिष्टिरिति भाति । किन्तूपक्रमे दातुः प्रजापतेरेव "तं निरवपत्" इति निर्वापश्रवणात् दातुरेवेष्टिरिति सिद्धान्तितम् ।

"सुनियतविषया"

किञ्च, सावकाशनिरवकाशयोर्विरोधे निरवकाशं प्रबलं दृष्टम् । प्रकृते च "यः सर्वज्ञः", "एको देवः" इत्यादेर्न प्रतीयमानादन्योऽर्थोऽस्ति । निर्गुणवाक्यस्य तु भावाभावरूपसकलधर्मनिषेधार्थत्वाभावेऽपि "दैवी ह्येषा गुणमयी" (भ. गी. ७.१४.) इत्यादिना प्रसिद्धत्रिगुणनिषेधेनापि चरितार्थत्वात् सावकाशत्वम् ।

"युक्तियुक्ता"

किञ्च, सगुणवाक्यं युक्तियुक्तम्; अव्याहतत्वात् । निर्गुणवाक्यं त्वयुक्तम्; व्याहतत्वात् । तथाहि – निर्गुणे निर्गुणशब्दप्रवृत्तिनिमित्तमस्ति नवा? आद्ये तेनैव सगुणत्वापत्त्या व्याहतिः । द्वितीये कथं तत्र शब्दप्रवृत्तिर्युक्तिमती स्यात्?

"उपजीव्या"

किञ्च, उपजीव्योपजीवकयोर्विरोधे न तावदुभयं प्रमाणम्; वस्तुनो द्वैरूप्यापातात् । ततोऽन्यतरस्याप्रामाण्यमवश्यमङ्गीकरणीयम् । तत्रापि निरपेक्षतया प्रबलस्यैवोपजीव्यस्य विरोधात् सापेक्षतया दुर्बलमुपजीवकमेवाप्रमाणं भवतीति युक्तम् । दहनशैत्यानुमाने तथैवोपलम्भात् । प्रकृते च "यः सर्वज्ञः" इत्यादिकं धर्मिग्राहकतयोपजीव्यम् । नच निषेध्यसमर्पकतयैवोपजीव्यम् । बाधकाभावात्; श्रुतिविहितत्वाच्च । नहि निर्दुष्टं विधायकं प्रमाणं निषेध्यं समर्पयतीति व्याहतं सम्भवति । नच स्वरूपमात्रमेवोपजीव्यम्, न सार्वज्ञ्यादिगुणविशिष्टम्; तथाच यदुपजीव्यं न तद् बाध्यते, यद्बाध्यते न तदुपजीव्यमिति वाच्यम्; स्वरूपमात्रस्य घटादिसाधारण्यात् । शब्देनानूद्य हि निर्गुणमिति वक्तव्यम् । नच निर्धर्मकस्य प्रतिपादकः शब्दोऽस्ति । नापि भेदकान् धर्मान् विहाय तत्त्वादिना विशिष्टं वक्तुं युक्तम् । तत्त्वादेर्घटादिसाधारणत्वात् । नचोद्देश्यगतं विशेषणं न विवक्षितमिति वाच्यम् । "यस्योभयं हविरार्तिमार्च्छेत्" ( ) इत्यादिषु मीमांसकैराश्रयणात्[1] । सम्मार्जनाधिकरणे[2]ऽप्यन्ततो

---

१ यच्छब्दादिविशिष्टस्य विधायकत्वासम्भवादनुवादकत्वमिति मीमांसकानां मतम् ।

२ "सम्मार्गाधिकरणे" इति क. पाठः ।

ग्रहत्वादेरपि विवक्षितत्वात्[1] । ग्रहाधिकरणे भवनाथेनाप्युक्तम् – "नो चेदुद्देश्यस्वरूपालाभात् । उद्देश्यस्वरूपे लब्धे यदधिकं तद्विशेषणं न विवक्षितम्" इति । अतः स्वरूपमात्रस्य बुद्धावनारोहाद्बोधनमेवानुपपन्नं स्यात् । ततः सर्वज्ञत्वादिविशिष्टं ब्रह्मस्वरूपं वेदादवगतं धर्मीकरणीयमिति धर्मिग्राहकविरोधो दुष्परिहरः स्यादिति ।

"स्वार्था"

किञ्च तद्गुणविधायकानां सत्यादिपदानां मुख्यार्थापरित्यागेन व्याख्या युक्ता । "न विधौ परः शब्दार्थः" ( ) इति न्यायात् । सगुणवादिमते च "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिवाक्यानां[2] मुख्यार्थो लभ्यते, नीलोत्पलादिवाक्यवत् । तद्विरुद्धाद्वचावृत्तिस्तु सामर्थ्यलभ्या । तदुक्तं सुरेश्वराचार्येण –

"तद्विरोध्यर्थसन्त्यागः सामर्थ्यान्नतु शब्दतः" इति ।

"यश्चार्थादर्थो न स चोदनार्थः" इति न्यायाच्च । निर्विशेषवादिमते तु लक्षणाश्रयणान्मुख्यार्थत्याग इति ।

"असाधारणार्था"

किञ्च, सगुणवाक्यं "यः सर्वज्ञः" इत्यसाधारणार्थत्वात् प्रबलं बाधकं स्यात् । निर्गुणवाक्यं तु साधारणार्थत्वाद्बाध्यं स्यात् । "अपवादैरुत्सर्गा बाध्यन्ते" इति महाभाष्योक्तेः । सामान्यविहितस्य निषेधस्य विशेषविहितेन बाधो युक्तः । नच परस्य निषेधकस्य पूर्वं विधिवाक्यं कथं बाधकं स्यादित्याशङ्कनीयम् । यतः परस्यापि निषेधस्य पूर्वं बाधकं दृष्टम् । यथा – "मृडमृदगुधकुषक्लिशवदवसः

---

१ "संस्काराद्वा गुणानामव्यवस्था स्यात्" (पू. मी. ३.१.१६.) इत्यत्र चिन्तितम् – ग्रहं सम्मार्ष्टीत्यत्र ग्रहपदमविवक्षितम् । तदुपलक्षितानां चमसादीनामपि सम्मार्जनमिति प्राप्ते सम्मार्जनादिगुणानां चमसादिसाधारण्येऽव्यवस्था स्यात् । तेषां संस्कारत्वात् । तस्मात् ग्रहमित्यत्रैकत्वस्याविवक्षायामपि ग्रहत्वस्य नाविवक्षा । ग्रहा एव सम्मार्जनीया न चमसादिकमिति सिद्धान्त इति ।

२ "इत्यादिश्रुतीनाम्" इति क्वचन पाठः ।

क्त्वा" (पा. सू. १.२.७.) इति "न क्त्वा सेट्" (१.२.१८.) इति परस्य निषेधस्य बाधकम् । तस्मात्परत्वं निषेधकत्वं चाप्रयोजकम् । उभयोर्विरोधे सामान्यवचसः सङ्कोचलक्षणो बाधो युक्तः । उत्सर्गापवादन्यायात्, यदाहवनीयवच्चेति ।

"सिद्धसिद्धान्तसिद्धा"

किञ्च, सूत्रकृता सर्वत्र सगुणतैव ब्रह्मणोऽङ्गीकृता; नतु निर्गुणता । यथाऽऽह – "सर्वधर्मोपपत्तेश्च" (ब्र. सू. २.१.३८.) इति । किञ्च, गुणविशिष्ट-ब्रह्मज्ञानादेव मुक्तिः श्रूयते –

"तमेवं विद्वानमृत इह भवति" (पु. सू. १७.)

"पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति"
(श्वे. १.६.) इति श्रुतेः;

"योमामशेषदोषोज्झं गुणसर्वस्वबृंहितम् ।
जनात्यस्मै प्रसन्नोऽहं दद्यां मुक्तिं नचान्यथा" ( )

इति स्मृतेश्च । गुणप्रतिपादन एव महातात्पर्यम् –

"मुख्यं च सर्ववेदानां तात्पर्यं श्रीपतेः परम् ।
उत्कर्षे तु तदन्यत्र तात्पर्यं स्यादवान्तरम्" इति वाराहवचनात्;

"वैगुण्यमेव पश्यन्ति न गुणानि नियुञ्जते ।
तेषां तमःशरीराणां तम एव परायणम् ।"

इति मोक्षधर्मवचनाच्चेत्यलं विस्तरेण । तस्मान्न किञ्चित् बाधकमस्तीति सिद्धम् ॥ * ॥

नापि गुणानामनित्यत्वादिति तृतीयो हेतुः । असिद्धत्वात् । नहीश्वरस्य सार्वज्ञ्यादिकं नंक्ष्यतीत्यत्र[1] मानं पश्यामः । प्रत्युत – "नित्यानन्दो नित्यज्ञानो नित्यबलः परात्मा"[2] ( ) इत्यादिश्रुतिभिः[3] नित्यत्वावगमाच्च ।

---

१ "नश्यतीति" इति क. ग. पाठः ।

२ "परमात्मा" इति क. ग. पाठः । आग्निवेश्यश्रुतिरियं परात्मेत्येव पाठं पठतीति भाष्यादितोऽवगम्यते ।

३ "इति श्रुतिभिः" इति क. ख. ग. पाठः ।

नापि चतुर्थः[1] । ब्रह्मणोऽप्युपासनाशेषत्वेनानैकान्त्यात् । व्याप्त्यभावाच्च । नहि भावनाशेषभूतमयथार्थं दृष्टम् ।

"नाविद्यमानं ब्रुवते वेदा ध्यातुं न वैदिकाः ।
अविद्यमानं ध्यायन्तो यान्ति सर्वेऽधरं तमः" ( )

इत्यादिवचनविरोधाच्च ।

नापि पञ्चमः[2] । सर्वस्यापि वेदस्य तत्त्वोपदेशत्वात् । त्वदभिमते तत्त्वोपदेशेऽप्युक्तत्वात् । नापि षष्ठः[3]। ऐक्यश्रुतीनां सम्यगर्थस्योक्तत्वात् । नापि सप्तमः[4]। ब्रह्मण्यनैकान्त्यात् । असिद्धेश्च । तथाहि – ब्रह्मापि प्रपञ्चाद्भिन्नम्, अभिन्नम्, भिन्नाभिन्नं वा? नाऽद्यः । भेदपरम्परयाऽनवस्थानात् । न द्वितीयः । ब्रह्मणोऽनेकत्वानित्यत्वादिप्रसङ्गात् । न तृतीयः । विरुद्धत्वात् । तथाच सिद्धं ब्रह्मणो दुर्निरूपत्वम् । अथ ब्रह्मणः श्रुत्यैव सत्यत्वं निश्चितम्; तद्बाधात् तर्कादीनां कालात्ययापदिष्टतेति चेत्; तर्हि गुणानामपि – "सत्यः सो अस्य महिमा" (ऋ. १०.५५.६.) इत्यादिश्रुत्यैव सत्यत्वसिद्धेस्तर्काणामाभासत्वं स्यात् । सविशेषाभेदाङ्गीकाराद् दुर्निरूपत्वासिद्धेश्च ।

भेदप्रतिनिधिर्हि विशेषः । स च धर्मिणो ह्यभिन्नानामपि धर्माणामनेकत्वमपर्यायशब्दवाच्यत्वं ज्ञाताज्ञातत्वं विशेषणविशेष्यभावं च निर्वहति । समवायवत् स्वनिर्वाहकत्वं च । यथोक्तम् –

"भेदहीने त्वपर्यायशब्दान्तरनियामकः ।
विशेषो नाम कथितः सोऽस्ति वस्तुष्वशेषतः" (अनु. १.१.२.) इति ।

अतश्च सन्ति गुणाः –

"गुणाः श्रुताः सुविरुद्धाश्च देवे
सन्त्यश्रुता अपि नैवात्र शङ्का" इति श्रुतेः ।

---

१ उपासानाशेषत्वादिति चतुर्थः पक्षः ।

२ तत्त्वोपदेशेऽनुक्तत्वादिति पञ्चमः ।

२ ऐक्यश्रुतीनामुपप्लवापातादिति षष्ठः ।

४ दुर्निरूपत्वादिति सप्तमः ।

ते च गुणा नित्याः –

"नित्यानन्दो नित्यज्ञानो नित्यबलः परात्मा" इति श्रुतेः ।

ते च स्वाभाविकाः –

"पराऽस्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतेः ।

ते चानन्ताः –

"विष्णोर्नु कं वीर्याणि प्रवोचं
यः पार्थिवानि विममे रजांसि" (ऋ. १.१५४.१.)
"अनन्तगुणमाहात्म्यशक्तिज्ञानमहार्णवः ।
नारायणः परो ह्येष चेतनेभ्यः परं पदम्" ( )

इति श्रवणाच्च । ते च निःसीमाः –

"परो मात्रया तन्वा वृधान
न ते महित्वमन्वश्नुवन्ति ।" (ऋ ७.९९.१.),
न ते विष्णो जायमानो न जातो
देव महिम्नः परमन्तमाप (ऋ. ७.९९.२.) इति श्रुतेः;
"सत्यं ज्ञानमनन्तं ब्रह्म" (तै. २.२.१.);
"देशतः कालतश्चापि गुणतश्च त्रिधा ततिः ।
सा समस्ता हरेरेव नह्यन्ये पूर्णसद्गुणाः" ( )

इति स्मृतेश्च । तस्मात् तत्त्वतः सन्ति धर्माः परमात्मनः, ते च नित्याः सत्याः स्वाभाविका अनन्ताः सविशेषाश्चेति सिद्धम् ।। * ।।

"विशेषवादः"

ननु ब्रह्मणो गुणा यदि भिन्नाः स्युस्तर्हि भेदपरम्परयाऽनवस्था स्यात् । "एवं धर्मान् पृथक् पश्यन् " इति श्रुतिविरोधश्च स्यात् । नापि भिन्नाभिन्नाः । विरुद्धत्वात् ।

"ब्रह्मणस्तद्गुणानां च भेददर्शंधरं तमः ।
भेदाभेदप्रदर्शी च मध्यमं तु तमो विशेत्" ( )

इति श्रुतिव्याकोपाच्च । नच ते गुणा न सन्त्येवेति मतम् । "सर्वधर्मोपपत्तेश्च" (ब्र. सू. २.१.३८.) इति सूत्रविरोधात् ।

"गुणाः श्रुताः सुविरुद्धाश्च देवे
सन्त्यश्रुता अपि नैवात्र शङ्का" ( )

इति श्रुतिविरोधाच्च । यद्यभिन्नाः तर्हि तदभाव एव पर्यवस्यति । अतोऽनिर्वचनीया गुणा इत्येव युक्तम् । अथ ब्रह्मणो गुणा अभिन्ना अनेके परमार्थतः सन्तीति तत्त्वविन्मतम्; तदप्युपपत्तिविरुद्धम् । तथाहि – गुणा यद्यभिन्नाः स्युस्तदाऽनेकैरभिन्नस्य ब्रह्मणोऽप्यनेकत्वं स्यात् । तथाच "एकमेव" इति श्रुतिविरोधः । गुणानां चैकत्वं वा स्यात् । तच्छब्दानां च पर्यायत्वमापद्येत । परः खलु धर्मवान् भवति । गुणसमुदाय एव ब्रह्मेति चेत्; न । जडत्वाधेयत्वौपाधिकत्वापातात् । सर्वत्र समुदायो नामैकोपाधिवशात् बहुमेलनमेव । यथा तन्तवः पटस्तथेति चेत्; न । पटस्यैकत्वात्, तन्तुकार्यत्वाच्च भेदसिद्धेः । त्वन्मतेऽप्येकैकतन्तुः पटश्चेत् पटस्यानेकत्वं तन्तूनां चैकत्वं[1] दुर्वारं स्यात् । समुदायवादश्चेदवयविद्रव्यापलापात् सौगतमतावतारः स्यात् । प्रकृते च न तथैकैको गुणः क्रिया वा ब्रह्मणो भिद्यते; अनङ्गीकारात् ।

"आनन्दो ब्रह्म" (तै. ३.६.);

"गुणक्रियादयो विष्णोः स्वरूपं नान्यदिष्यते ।" ( )

इत्यादिश्रुतिव्याकोपाच्च । किञ्च, गुणा अपि परस्परमभिन्नाश्चेत्, एक एव गुणः स्यात्; नत्वनेके । तथाचापसिद्धान्तः ।

"मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे" ( )

इति स्मृतिव्याकोपाच्च[2] । यद्यनेके गुणाः, तर्ह्यभेदो व्याहतः । अनेकत्वस्य भिन्नाश्रयत्वात् । घटपटादावप्येवमभेदमङ्गीकृत्य सुवचत्वाच्च । अथ भेदप्रति-

---

१ "वैकैकत्वम्" इति क. पाठः । "चैकैकत्वम्" इति ग. पाठः ।

२ "इति व्याकोपाच्च" इत्येव क. ख. पाठः । "इति श्रुतिव्याकोपाच्च" इति तु प्रचुरः पाठः । परं त्विदं भागवतवचनम् । तत्समानानुपूर्वीका श्रुतिरप्यपराऽस्तीति वा वक्तव्यम् ।

निधिविशेषाङ्गीकारान्नोक्तदोष इति चेत्; न विशेषस्याप्रामाणिकत्वात् । किञ्च, विशेषा अपि ब्रह्मणा[1] परस्परं च भिन्ना अभिन्ना वा? आद्येऽनवस्था । द्वितीये प्रागुक्तदोषसन्ततिः प्रादुःष्यात् । विशेषाणामपि ब्रह्मधर्मत्वाविशेषात् । यदि ते स्वनिर्वाहकाः स्युः, तर्हि प्रमिता गुणा एव तथा किं न स्युः; किमप्रामाणिकाश्रयस्वनिर्वाहकत्वकल्पनयेति?

अत्रोच्यते । यदुक्तम् – 'गुणा ब्रह्मणो यद्यभिन्नाः स्युः, तर्हि ब्रह्ममात्रावशेषः स्यात्; ब्रह्मणोऽनेकत्वं गुणानामेकत्वं वा स्यात्; तच्छब्दानां पर्यायत्वं वा स्यात्; आश्रयाश्रयिभावोऽपि न स्यात्' इत्यादि दूषणम्, तदकाण्डताण्डवितम् । केवलाभेदाङ्गीकारे हि तत् स्यात् । अस्माभिस्तु गुणागुणिनोः सविशेषाभेदाङ्गीकारात् । यत्र तार्किकैः समवायोऽङ्गीकृतः, भाट्टैस्तु भेदाभेदावङ्गीकृतौ, तत्र तत्त्ववादिभिः सविशेषाभेदोऽङ्गीकृतः[2] । अभेदो द्विविधः – केवलाभेदः सविशेषाभेदश्चेति । तत्र ध्वनिध्वानशब्दार्थयोः केवलाभेदः । अत एव तच्छब्दयोः पर्यायत्वम् । [3]अवयवावयविनोर्गुणगुणिनोश्च सविशेषाभेदः । अत एव तच्छब्दानामपर्यायत्वम् । भेदप्रतिनिधिर्हि विशेषः। स च धर्मिणो ह्यभिन्नानामपि धर्माणामनेकत्वमपर्यायशब्दवाच्यत्वं ज्ञाताज्ञातत्वं विशेषणविशेष्यभावं च निर्वहति भेदवत्; स्वनिर्वाहकश्च भवति समवायवत् । यथोक्तम् –

"भेदहीने त्वपर्यायशब्दान्तरनियामकः ।
विशेषो नाम कथितः सोऽस्ति वस्तुष्वशेषतः ।
विशेषास्तेऽप्यनन्ताश्च परस्परविशेषिणः ।
स्वनिर्वाहकतायुक्ताः सन्ति वस्तुष्वशेषतः" (अनु. १.१.२.) इति ।

ननु किम्प्रमाणको विशेषः? किञ्चास्य लक्षणम्? अत्रोक्तं खण्डनखडने –

"यत्राभेदश्च भेदव्यवहृतिरुभयं वस्तुनो मानसिद्धं
तत्र श्रुत्याऽनुभूत्याऽस्ति हि गुणगुणिनोर्दीपदीप्त्योर्विशेषः ।

---

१ "ब्रह्मणः" इति ख. ग. पाठः ।

२ "सविशेषाभेदाङ्गीकारात्" इति क. ग. पाठः ।

३ अत्राऽदौ क्वचित् "मृद्घटयोः" इत्यस्ति ।

अङ्गीकार्यश्च भेदप्रतिनिधिरखिलैरन्ततो दुस्त्यजोऽयं
नो चेद्बाधोऽनवस्था स्ववचनविहतिः स्यात् स्वनिर्वाहकः सः ।"

अयं भावः – परमार्थतः सन्त्येव परब्रह्मणो गुणाः, श्रुतिशतविहितत्वात् । नापि ते ततोऽत्यन्तभिन्नाः, भिन्नाभिन्ना वा –

"एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम् ।
विरजः पर आकाश अज आत्मा महान् ध्रुवः ।"
"एवं धर्मान् पथक् पश्यन्" (कठ. २.४.१४.)

इत्यादिश्रुतिव्याकोपात् । तस्मादभिन्ना एव । नचाभेदे भेदव्यवहारानुपपत्तिः । [1]विशेषबलेनैवोपपत्तेः । भेदप्रतिनिधिर्विशेषः । सच भेदाभावेऽपि भेदव्यवहारं निर्वहति । नचैवं घटपटादेरपि भेदाभावमङ्गीकृत्य विशेषबलेनैव भेदव्यवहार-सिद्धिः स्यादिति वाच्यम्; तत्र भेदस्य प्रत्यक्षसिद्धत्वात् । यत्र हि भेदाभावेऽपि प्रमाणमस्ति, भेदव्यवहारश्च प्रमितः, तत्रैव भेदप्रतिनिधिर्विशेषः । प्रमाण-द्वयान्यथानुपपत्त्या हृयुपपादकतया भेदकार्यकृदित्याकारेणैव कल्प्यते । नचैव-मनुपपत्तिगम्यं सार्वज्ञ्यादिगुणजातम्; नापि भेदहीने भेदकार्यकृदवगतम् ।

किञ्च, "एवं धर्मान् पृथक् पश्यन्" इति श्रुत्या हरेर्गुणानां च सविशेषा-भेदोऽवगम्यते । ब्रह्मणो धर्माणां पृथग्दर्शननिन्दया ह्यभेदोऽवगतः । "धर्मान्" इति धर्मबहुत्वोक्त्या[2] विशेषोऽवगतः । किञ्च, अत्र धर्मान् विधाय पृथक्त्व-मात्रनिषेधादपि[3] विशेषोऽवगम्यते । तदुक्तम् –

"उक्त्वा धर्मान् पृथक्त्वस्य निषेधादत एव हि ।
विशेषो ज्ञायते श्रुत्या भेदादन्यश्च साक्षितः" ( ) इति ।

किञ्च,

"तन्तुभ्योऽन्यः पटः साक्षात् कस्य दृष्टिपथं गतः ।
भेदव्यवहृतेर्दृष्ट्या विशेषोऽत्रानुभूयते ।" ( )

---

१ "विशेषभावेनैव" इति क. पाठः ।

२ "इति बहुत्वोक्त्या" इति ख. पाठः ।

३ "निषेधाच्च" इति क. पाठः ।

एवमभेदभेदकार्यप्रतीत्योरन्यथानुपपत्त्याऽनुभवेन चाभिन्नेष्वप्यतिशयो भेदप्रतिनिधिरवगतः । यद्वशाद्यदिदं सर्वं समञ्जसमभूत् । अयं शक्त्यतिशयो ह्यभिन्नेष्वपि विशेषकत्वाद्विशेष इति गीयते । भेदहीनेऽप्यनुपचरितभेदव्यवहारहेतुर्विशेष इति च तल्लक्षणम् । "दीपदीप्त्योः" इत्युदाहरणार्थम् । एकमेव हि तेजोद्रव्यं प्रभाप्रभावदाकारेणावतिष्ठते । तथा निर्भेदं चिदानन्दरूपं परं ब्रह्म[1] गुणगुणिरूपेणावतिष्ठत इति काऽत्रानुपपत्तिः? चित्रभानोर्भानूनां च तेजोमयत्वं समानमिति चेत्, अत्रापि चित्प्रभामयत्वं सममेव । यथा चैकाकाशप्रदेशानामनेकत्वं विशेषबलादेवमीशगुणानामनन्तत्वम् । तदुक्तम्–

"अतोऽनन्तगुणं ब्रह्म निर्भेदमपि भण्यते ।
एवं धर्मानिति श्रुत्या तदभेदोऽप्युदीर्यते" ( ) इति ।

यथाऽऽकाशभाग एव दिक्, यथा च समवायस्यास्तित्वाभिधेयत्वज्ञेयत्वादयो धर्माः स्वरूपमेव; तथाऽप्यपर्यायशब्दवाच्याः, तथा ब्रह्मणः स्वरूपधर्मा इति । नचायं विविधविशेषोऽस्वाभाविकः –

"पराऽस्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च" (श्वे. ६.८.) इति श्रुतेः ।

सर्वैः दुस्त्यजश्चायं विशेषः । तथाहि – गुणगुणिनोरत्यन्तभेदाङ्गीकारे तस्य भेदस्य भेदिभ्यां भेदोऽस्ति नवा? अस्ति चेदनवस्था[2] । नास्ति चेत् तच्छब्दपर्यायताद्यापद्यते । अथ रामानुजीयमतानुरोधेन स स्वनिर्वाहक इति चेत्, हन्त, स्वस्य निर्वाहकं स्वनिर्वाहकम्। तथाचैकैकस्यैकैकस्यां निर्वाहक्रियायां कर्तृत्वकर्मत्वलक्षणं निर्वाहकत्वमित्युक्तं स्यात् । तच्च परस्परं धर्मिणा क्रियया चात्यन्तभिन्नम्, अभिन्नं वा? नाऽद्यः । अनवस्थाद्यापत्तेः । द्वितीये निर्वाह्यनिर्वाहकनिर्वहणशब्दानां पर्यायतापातः स्यात् । तथाऽपि शक्तिविशेषोऽस्तीति चेत्, हन्त तर्हि स एव विशेषः । तस्मादकामेनापि विशेषोऽङ्गीकार्यः ।

---

१ "परमं ब्रह्म" इति ख. पाठः ।

२ "आद्येऽनवस्था" इति ख. पाठः ।

एवं समवायमङ्गीकृत्यापि विशेषोऽङ्गीकरणीयः । तस्याप्यन्ततः स्वनिर्वाहकत्वाङ्गीकारात् । एवं भेदाभेदावङ्गीकृत्यापि विशेषः शिरसा धार्यः । अन्यथोक्तविकल्पैर्भेदाभेदपरम्परासहस्रमापद्येत । निर्विशेषवादिनामप्यन्ततः[1] सविशेषाभेदः शिरसा धार्यः । जीवब्रह्मणोरैक्यस्य तदानन्दस्य च ब्रह्मस्वरूपत्वेऽपि ज्ञाताज्ञातत्वादेरङ्गीकार्यत्वात् । किञ्च, जडानृतपरिच्छिन्नव्यावृत्तिभिर्ब्रह्मापि सविशेषमिति सर्वैर्दुस्त्यजो विशेषः ।

स च स्वनिर्वाहकः । स एव विशेषो विशेषान्तरमन्तरेण सत्यज्ञानादिस्वरूपगुणानां स्वस्य च भेदव्यवहारं घटयतीति[2] ।। * ।।

अखण्डार्थत्वखण्डनम्

[3]अत्राऽहुः—सत्यज्ञानादिवाक्यमखण्डार्थनिष्टम्, लक्षणवाक्यत्वात्, प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवदिति । एतच्चानूद्य शास्त्रे निरासि —

"सत्यज्ञानादिवाक्यादेर्निर्विशेषार्थनिष्ठता ।
यदि लक्षणवाक्यत्वात् साध्यते चन्द्रवाक्यवत् ।
तदा स्याद्व्याहतिर्बाधः प्रतिरोधो विरुद्धता ।
अव्याप्तिश्चाप्रसिद्धत्वं दृष्टान्ते साध्यशून्यता" ( ) इति ।

तथाहि – असाधारणधर्मो लक्षणम् । लक्ष्यस्यासाधारणधर्मप्रतिपादकं वाक्यं निर्धर्मकप्रतिपादकमिति वदतः कथं न व्याहतिः स्यात्? सत्यादिपदैः समर्पितानि विशेषणानि न सन्तीति चेत्, तर्हि तत्तत्श्रुतेर्बाधो दुर्वारः स्यात् । सत्यादिवाक्यं सविशेषार्थनिष्टम्, सद्वाक्यत्वात्, सम्मतवत्; विपक्षे वाक्यत्वाभावप्रसङ्गो बाधकः स्यादिति प्रतिरोधश्च । 'गन्धवती पृथिवी', 'सास्नादिमान् गौः', 'देवदत्तः श्यामो युवा' इत्यादिषु सर्वत्र लक्षणवाक्येषु सविशेषार्थत्वाद्विरुद्धो हेतुः । लक्षण-

---

१ "वादिनाऽप्यन्ततः" इति ग. पाठः ।

२ "घटयतीत्यर्थः" इति ग. पाठः ।

३ ग. पाठे अत्र पञ्चमसरप्रारम्भः ।

वाक्यं निर्विशेषार्थमिति व्याप्त्यसिद्धेर्व्याप्यत्वासिद्धश्च हेतुः[1] । निर्विशेषवस्तुनोऽत्यन्ताप्रसिद्धेः पक्षस्याप्रसिद्धविशेषणता च । प्रकृष्टप्रकाशश्चन्द्र[2] इति वाक्यस्यापि सविशेषपरत्वात् साध्यविकलश्च दृष्टान्तः । अन्यथा लक्षणानभिधानाल्लक्ष्यचन्द्रावधारणं च न स्यात् । धर्मप्रतिपादने खल्वर्थादतद्व्यावृत्तिः । तदुक्तं सुरेश्वराचार्यैः –

"शब्दात् प्रतीयते तावत् सङ्गतिर्धर्मधर्मिणोः ।
मानान्तरादपोहस्तु न शाब्दस्तेन सम्मतः"[3] ( ) इति ।

किञ्च सर्वपदानामेकार्थपरत्वे श्रौतपदजातस्य पर्यायतया सहप्रयोगाभावप्रसङ्गः[4] । अथ मतम्[5] – द्विविधा वेदान्तवाक्यप्रवृत्तिः; एका पदार्थपरा; अपरा तस्याऽत्मतादात्म्यरूपवाक्यार्थपरा । तत्र तावत् "सत्यं ज्ञानमनन्तं ब्रह्म" इति पदार्थपरं वाक्यमखण्डार्थनिष्ठमेव । "ब्रह्मविदाप्नोति परम्" (तै. २.१.) इति प्रस्तुतब्रह्मस्वरूपमात्रजिज्ञासायां तल्लक्षणं हीदमुच्यते । यथा खल्वस्मिन् ज्योतिर्मण्डले कश्चन्द्र इति चन्द्रस्वरूपमात्रप्रश्ने प्रकृष्टप्रकाशश्चन्द्र इति तल्लक्षणाभिधायकं वचनम् । यथाच तत्र प्रकृष्टप्रकाशपदयोश्चन्द्रप्रतिपादिकार्थमात्रपरत्वेऽपि न पर्यायत्वम्; प्रकर्षादिगुणयोगाभिधानमुखेन लक्षणया तत्परत्वात् । तथा सत्यादिपदानामखण्डार्थनिष्ठत्वेऽपि[6] परापरसामान्यवाचिनां शबले गृहीतसङ्गतीनां लक्षणया ब्रह्मस्वरूपमात्रपरत्वान्न पर्यायत्वम् । नचैवं सति प्रतिपिपादयिषितार्थस्यैकेनैव पदेन लक्षितत्वात् पदान्तरवैयर्थ्यमिति वाच्यम् । लक्ष्यार्थ-

---

१ ख. पाठे "हेतुः" इति नास्ति ।

२ "प्रकाशकश्चन्द्रः" इति क. ख. ग. पाठः ।

३ "स स्मृतः" इति ख. पाठः । "संस्मृतः" इति ग. पाठः ।

४ "प्रसङ्गात्" इति क. ख. ग. पाठः ।

५ आचार्यपादकृतस्य वादस्य तत्त्वोद्योतापरनामकस्य विवरणे स्थितानि टीकाकृत्पादवचनान्येवात्र यथामूलमुदधारिषत ।

६ "अखण्डनिष्ठत्वेऽपि" इति क. ख. ग. पाठः ।

भेदाभावेऽपि प्रतिपदमारोपितासत्यत्वाद्यनकाकारव्यवच्छेदस्य प्रयोजनत्वात् । तथाच न पर्यायव्यर्थतापात इति । यथोक्तं मकरन्दे –

"लक्ष्यार्थभेदाभावेऽपि व्यवच्छेद्यविभेदतः ।
विज्ञानानन्दपदयोः पर्यायव्यर्थते कुतः" ( ) इति ।

अत्रोच्यते – लक्षणा खलु मुख्यार्थासम्भवे सति समाश्रीयते । अन्यथाऽतिप्रसङ्गात् । प्रकृष्टादिपदाभिधेयानि प्रकृष्टत्वादिविशेषणानि चन्द्रे प्रमाणसिद्धानि सन्तीत्यतोऽनुपपत्त्यभावान्नैषां लक्षणया चन्द्र[1] स्वरूपमात्रपरत्वं युक्तम् । लक्षणानाश्रयणे चोक्तपर्यायत्वादिदोषप्रसङ्गस्तदवस्थ इति । तथाच दृष्टान्तस्य साध्यविकलत्वात् नानेन सत्यज्ञानादिवाक्यानां लक्षणया[2] ब्रह्मस्वरूपमात्रपरत्वसिद्धिरिति ।

किञ्च, अखण्डमिति अच्छेद्यं वा निरवयवं वा परिपूर्णं वा यदि विवक्षितम्,, तर्हि सिद्धसाधनता[3] स्यात् । यदि तत्तद्विशेषणबोधनद्वारा एकविशेष्यपरत्वम् तदाऽपि तथा स्यात् । जातिगुणक्रियाशब्दानां तथैवाङ्गीकारात् । सगुणत्वाविरोधाच्च । यदि निर्भेदार्थनिष्ठत्वम्, तथाऽपि गुणगुणिनोः सविशेषाभेदाङ्गीकारात् सिद्धसाधनमेव । अथ निर्विशेषार्थनिष्ठतैवाखण्डार्थता, ततो बोध्यविशेषणत्यागस्तत्र विवक्षित इति चेत्; स किं प्रमाणबाधात्, उत त्वद्वचनात्? नाऽद्यः । पक्षदृष्टान्तयोर्विशेषणानां प्रमाणसिद्धत्वात् । बाधकाभावाच्च । नोत्तरः । असङ्गतप्रलापत्वात् ।

किञ्च, सत्यज्ञानानन्तादिशब्दानां मुख्यार्थः शुद्धे ब्रह्मणि नास्ति चेत्[4] क्वास्ति? सगुणेऽस्तीति चेत् तर्हि तदेव मुक्तामुक्तनियमनात् 'सत्यम्' अप्रतिहतज्ञानत्वात् 'ज्ञानम्', देशतः कालतो गुणस्ततत्वात् 'अनन्तम्', मोक्षदमस्मदीयं

---

१ "चन्द्रादि" इति क. ख. ग. पाठः ।

२ "लक्षणया च" इति क. पाठः ।

३ "तदा सिद्धसाध्यता" इति ख. ग. पाठः ।

४ "शुद्धब्रह्मणि नास्तीति चेत्" इति क. ख. पाठः ।

नारायणाख्यं परं ब्रह्मैवात्र लक्ष्यते[1]; न तन्निर्गुणमप्रामाणिकं मायिभिरङ्गीकृतं ब्रह्म । अथ, अविद्यावच्छिन्नेऽस्ति मुख्यार्थ इति चेत्; न । व्याहतेः । न ह्यवच्छिन्नमनन्तं चेति न व्याहतम् । किञ्च, शुद्धस्य प्रतिपाद्यस्यातिशयानाधाने कथमन्यतो व्यावृत्तिरपि सिद्ध्येत्? अपिच, व्यावृत्तिरपि किं ब्रह्मविशेषणत्वेन प्रयोजनम्, किं स्वतन्त्रतया? नाऽद्यः । व्यावृत्तिरूपविशेषैरेव सविशेषत्वाद्विशिष्टार्थताऽपरिहारात् । नोत्तरः । (यत्रकुत्रचिद्व्यावृत्तेः[2]) सिद्धत्वात्; असङ्गतत्वाच्च । अपिच, मुमुक्षुणा खलु जिज्ञासितं शुद्धं ब्रह्म व्यावृत्ततया । तत्र सत्यादिपदानि किं सत्यत्वादिधर्मान् वदन्ति, उत नेति? नाऽद्यः । त्वयाऽनङ्गीकारात् । नोत्तरः । विरोध्याकारव्यावृत्तेरप्यसम्भवात् । विरोध्याकारसमर्पणेन हि विरोध्याकारान्तरं व्यावर्तनीयम् । नहि नदीत्वमनभिदधतो नदीशब्दादनदीत्वव्यावृत्तिः सम्भवति[3] । असंसृष्टार्थबोधने च कथं वाक्यत्वम्? पदार्थसंसर्गो हि वाक्यार्थः । अत एत "गौरश्वः पुरुषो हस्ती" इति वाक्याभासः । वस्तु मात्रपरत्वे च[4] कथं लक्षणवाक्यत्वम्? लक्ष्यस्यासाधारणधर्मबोधकस्यैव लक्षणवाक्यत्वात् । अतो मुख्यार्थस्यैव सम्भवान्न लक्षणाश्रयणं युक्तम् । बाधकानां च पूर्वमेव निरस्तत्वात्, दृष्टान्ते विशेषणानां च सत्त्वान्न लक्षणाश्रयणेन चन्द्रस्वरूपमात्रपरत्वसिद्धिः । तस्माद्विशिष्टपरतैव युक्ता ।

ननु मा भूद्वाक्यार्थानुपपत्तिर्लक्षणाक्षेपिका । वक्तुर्विशिष्टार्थविवक्षाभावस्तु भविष्यति । स च स्वरूपमात्रप्रश्नोत्तरत्वात् सिद्ध्यति । चन्द्रस्वरूप-

---

१ असाधारणधर्मवत्तया प्रतिपाद्यत इत्यर्थः । क्वचित् "प्रतिपाद्यते" इत्येव पाठः ।

२ ( ) एतदन्तर्गतः पाठः क. ख. ग. पुस्तकेषु न दृश्यते ।

३ अनभिदधत इत्याक्षेपगर्भम् । तथाचायमर्थः – यदि नदीशब्दो नदीत्वं नाभिदध्यात् तर्हि कुतो वा हेतुतो नदीयमनदी न स्यात् । अनदीशब्दादिति वा पदच्छेदः । तदा नाऽक्षेपः । स्थितिकथनमेत् । नह्यनदीशब्देन अनदीव्यावृत्ता नदी बोध्यते ।

४ "परत्वेन" इति क. पाठः ।

मात्रं ह्यनेन पृष्टम्; वक्ता च विशिष्टार्थं वदन् आम्रान् पृष्टः कोविदारानाचक्षण इवानवधेयवचनः स्यात् । तथाच प्रयोगः–सत्यज्ञानादिवाक्यं ब्रह्मस्वरूपमात्र-परम्, स्वरूपमात्रप्रश्नोत्तरत्वात्, यथा प्रकृष्टप्रकाशश्चन्द्र इति वाक्यमिति । अत्रोच्यते – स्यादेतदेवम्, यदि स्वरूपमात्रप्रश्नः स्यात् । नचैवम् । स्वरूपमात्रस्य सिद्धत्वात् । नहि कश्चित् सिद्धं पृच्छति । अतः स्वरूपमात्रप्रश्नोत्तरत्वहेतुरसिद्धः । यदि प्रष्टा चन्द्रादिस्वरूपं न जानीयात्, तदा चन्द्र इति वाऽयमिति वाऽनूद्य क इति कथं पृच्छेत्? नह्यविदितं वस्त्वनुवदितुं शक्यम् । सामान्यतो जानाति न विलक्षणतयेति चेत्, तर्हि वैलक्षण्यविषयावेव प्रश्नपरिहारौ स्याताम् । सङ्कीर्ण-तयैव चन्द्रादिस्वरूपं सिद्धम्, नतु व्यावृत्ततयेति चेत्; हन्त तर्हि किं व्यावृत्त्यादि-विशिष्टं स्वरूपं प्रश्नप्रतिवचनविषय इत्यभिप्रायः, उत स्वतन्त्रमेव व्यावृत्त्या-दिकम्? आद्ये विशिष्टार्थता । अर्थाक्षिप्तमेव वैशिष्ट्यादि न शब्दाक्षिप्तमिति चेत्, मैवम्। विशेषणार्पणेन विनाऽर्थाक्षेपानुपपत्तेः । न द्वितीयः । नक्षत्रव्यतिरेकस्य सिद्धत्वात् । अतः "कश्चन्द्रः"[1] इत्यनया वाचोभङ्ग्या 'कैर्विशेषणैर्विशिष्ट' इति विशिष्टविषयावेव प्रश्नपरिहाराविति ।

किञ्चिद्विधीयतेऽनूद्य वाक्येनेति सतां स्थितिः ।
(सत्यज्ञानादिवाक्येन कथ्यतां किं विधीयते ।
अज्ञातं बोध्यते किञ्चिद्वाक्येनेति सतां स्थितिः ।)[2]
सत्यज्ञानादिशब्दैस्तु किमज्ञातं प्रबोध्यते ।
प्रतिपाद्याविशेषत्वे व्यावृत्तिरपि दुर्लभा ।
प्रतिपाद्ये विशेषश्चेत् सविशेषार्थता स्थिता[3] ।
(मुख्यार्थो यदि बाध्यः स्याद्व्यावृत्तिरपि बाध्यते ।
अबाधिते च मुख्यार्थे सविशेषार्थता स्थिता ।)[4]

---

१ "अत्र कश्चन्द्रः" इति च पाठान्तरम् ।

२ अयं श्लोकः क. ख. पाठयोर्नास्ति ।

३ "स्थिरा" इति ख. पाठः ।

४ अयमपि श्लोकः क. ख. पाठयोर्न दृश्यते ।

एवं विज्ञानानन्दब्रह्मनारायणाद्यनन्तशब्दैस्तत्तत्तदसाधारणधर्मविशिष्टं निर्भेदं ब्रह्म प्रतिपाद्यते । यथा – 'गन्धवती पृथिवी' इति, 'देवदत्तः श्यामो युवा' इति । यदि सर्वैः शब्दैः प्रातिपदिकार्थमात्रं कथ्येत, तदा पर्यायत्वं वैयर्थ्यं व्युत्पत्ति-विरोधश्च स्यात् । तथाहि – विज्ञानपदेन यावदुक्तमानन्दपदेन तावदेवोच्यते, उताधिकगुणम्? द्वितीये सविशेषार्थता । प्रथमे व्युत्पत्तिविरोधः । नहि ज्ञाना-नन्दपदयोरविशेषार्थत्वे विद्वत्सम्मतिरस्ति । तथात्वे वैयर्थ्यं सहप्रयोगाभावश्च स्यात् । व्यावर्त्यभेदादवैयर्थ्यमिति चेत्, न । व्यावृत्तेः शब्दार्थत्वाभावात् । "यश्चार्थादर्थो न स चोदनार्थः" इति न्यायात् । अन्यथा "गामानय" इति वाक्य-स्याश्वानयनव्यावृत्तिरर्थः स्यात् । किञ्च, तावदेव वस्तु बोधितं चेत् व्यावृत्तिरपि न स्यात्; व्यावर्तकधर्मानुक्तेः । एकधर्मोक्तावपि व्यावर्त्यभेदो न स्यात्; अनेकासाधारणधर्मानुक्तेः । शुद्धब्रह्मव्यतिरिक्तं मुख्यार्थश्चेत्, तदेव व्यावर्त्यं स्यात् । न परे ब्रह्मणि जडत्वादिव्यावृत्तयोऽपि सिद्ध्येरन् । सत्यादिपदानां ब्रह्मणि लक्षणया प्रवृत्तिरिति चेत्; न । मुख्यार्थबाधकाभावात् । अन्यत्र मुख्यार्थासम्भ-वात् । लक्षणया प्रवृत्त्यङ्गीकारेऽपि पूर्वपदेन यावल्लक्षितं तावदेवान्येन पदेन लक्ष्यते, अथाधिकम्? द्वितीये निर्विशेषार्थताहानिः । प्रथमे पुनर्वैयर्थ्यम् । अथ, लक्ष्यार्थे विशेषाभावेऽपि आरोपितानानन्दत्वादि[1] व्यावृत्त्यर्थत्वेन पदान्त-राणां प्रयोजनवत्त्वमिति चेत्; न । लक्ष्येऽतिशयानाधाने तदारोपस्याप्यनिवृत्तेः । किञ्च, ब्रह्मविशेषणतया व्यावृत्तिः प्रयोजनम्, उत स्वतन्त्रतया? आद्ये सविशेष-तापत्तिः, "अघटं भूतलम्" इत्युक्तार्थवत् । तत्र लक्षणाङ्गीकारेऽपि विशिष्टा-र्थता दुस्त्यजा स्यात् । अभावविशेषाङ्गीकारे भावविशेषैः किमपराद्धम्? ततो वृथा मुख्यार्थत्यागेन लक्षणाश्रयणम् । यथोक्तम् –

"भावो यथा तथाऽभावो निर्विशेषत्वबाधकः ।
अबाधकत्वे भावेऽपि बाधकत्वकथा मुधा" ( ) इति ।

न द्वितीयः । जडादिव्यावृत्तेः सिद्धत्वात्; असङ्गतत्वाच्च । मुमुक्षुणा खलु ब्रह्म

---

१ "आरोपितासत्त्वादि" इति क. पाठः ।

वा तद्धर्मो वा जिज्ञास्यः । तत्र न व्यावृत्तिर्ब्रह्म । तस्य भावरूपत्वात्; एकत्वाच्च । तद्धर्मोऽपि न चेत् कथमजिज्ञासितबोधनमसङ्गतं न स्यात्? किञ्च, विरोध्याकार-समर्पणेन[1] विरोध्याकारान्तरं व्यावर्तनीयम् । "देवदत्तः श्यामो युवा" इत्यादिषु तथा दर्शनात् । अतो व्यावृत्तिरपि दुर्लभा स्यात् । यद्यपि शुद्धे[2] नास्ति धर्मः, तभाऽप्यशुद्धेऽस्त्येवेति चेत्, तर्हि तदेव व्यावर्त्यताम्; नतु शुद्धं ब्रह्मेत्यलं विस्तरेण ।। * ।।

अत्रार्थे श्लोकाः –

पर्यायत्वं पदानां स्यात् तावदेवार्थबोधने ।
मुख्यार्थे बाधकाभावाल्लक्षणाश्रयणं कुतः ।
(लक्ष्यस्यातिशयाधानेऽनाधाने चाहितं तव ।[3]
अन्यत्र यदि मुख्यार्थो व्यावर्त्यं [4]स्यात् तदेव हि ।[5]
सत्यं ज्ञानमनन्तं किं ब्रह्मान्यदपि सम्मतम् ।[6])
व्यावर्त्यस्याविशेषत्वे[7] व्यावृत्तिरपि निष्फला ।
(व्यावर्तको न चेद्धर्मो व्यावृत्तिरपि दुर्लभा)[8]
विज्ञानानन्दशब्दाद्यैः सगुणं तेन कथ्यते ।
विशिष्टं बोध्यते यत्तु निर्भेदं ब्रह्म सम्मतम् ।
अखण्डपरता तादृक् सम्मता तत्त्वविन्मते ।

---

१ "समर्पणेन हि" इति ग. पाठः ।
२ "शुद्धे ब्रह्मणि" इति ख. पाठः ।
३ इदं श्लोकार्धं क. ख. ग. पुस्तकेषु न दृश्यते ।
४ "व्यावृत्तम्" इति ग. पाठः ।
५ इदमप्यर्धं क. ख. पाठयोर्न दृश्यते ।
५ क. ख. ग. पाठेष्वपठितमिदमप्यर्धम् ।
७ "व्यावृत्तस्याविशेषत्वे" इति ख. ग . पाठः ।
८. इदं चार्धं क. ख. ग. पाठेष्वपठितम् ।

यदप्याहुः – "तत्त्वमस्यादिवाक्यमखण्डार्थनिष्ठम्, आकार्यकारणद्रव्यनिष्ठत्वे सति समानाधिकरणत्वात्, (सोऽयं देवदत्त इत्यादिवाक्यवत्)[१] । यथा खलु कोऽयमित्यपेक्षायां "सोऽयं देवदत्तः" इति वाक्ये पदत्रयस्य देवदत्तस्वरूपमात्रपर्यवसानेऽपि विशिष्टाभिधानद्वारेण[२] भागत्यागलक्षणया प्रवृत्तेर्न पर्यायत्वम्, भेदभ्रमव्युदासेन सार्थक्यं च, तथा तत्त्वमस्यादेः स्वार्थैकदेशत्यागलक्षणया भेदभ्रमव्युदासद्वारेण स्वरूपमात्रे पर्यवसानम्" इति । एतदप्यसत् । उक्तदोषानुषङ्गात् । हेतोश्च[३] 'सिंहो देवदत्तः' इत्यादि[४]ष्वनैकान्त्यात् । किञ्च, तदेतद्देशकालसम्बन्धित्वं हि 'स' इत्यादिपदवाच्यो मुख्योऽर्थः[५] । स चास्त्येव देवदत्तादौ प्रमित इति वाच्यार्थासम्भवाभावान्न "सोऽयं देवदत्तः" इत्यादिवाक्यं लक्षणया देवदत्तस्वरूपमात्रपरम् । अतः साध्यविकत्वान्नैतद्दृष्टान्तेन तत्त्वमस्यादिवाक्यानामखण्डार्थतासिद्धिरिति ।

ननु कथं वाच्यार्थानुपपत्त्यभावः? तद्देशकालविशिष्टस्यैतद्देशकालवैशिष्ट्यं वा, एतद्देशकालविशिष्टस्य तद्देशकालवैशिष्ट्यं वा, विशिष्टद्वयैक्यं वा मुख्यार्थो वाच्यः । तत्र न तावदाद्यः । एतद्देशकालवैशिष्ट्यस्य प्रत्यक्षसिद्धत्वेनाबोध्यत्वात् । तद्देशकालयोरपीदानीं सत्त्वप्राप्तेश्च । न द्वितीयः । एतद्देशकालयोस्तदानीं सत्त्वप्रसङ्गात् । न तृतीयः । विशेषणभूतदेशकालैक्येन विना विशिष्टैक्यानुपपत्तेः । विशिष्टैक्यस्य च प्रमाणबाधितत्वात् । अतो मुख्यार्थेऽनुपपत्ति-[६]दर्शनात् विशिष्टद्वयोपलक्षितमेव देवदत्तस्वरूपमनेन प्रतिपाद्यत इति युक्तमाश्रयितुम् । यथा च देवदत्तगतभेदभ्रमव्युदासेन तत्स्वरूपमात्रपर्यवसायित्वमपर्यायशब्दानाम्, तथा दार्ष्टान्तिकेऽपि स्यात् ।

---

१ ( ) एतदन्तर्गतं नास्ति क. ख. ग. पाठेषु ।

२ "द्वारेणापि" इति क. ग. पाठः ।

३ "हेतोश्च" इति ख. पाठे नास्ति ।

४ "इत्यादौ" इति क. पाठः ।

५ "पदवाच्योऽर्थो मुख्यः" इति ख. पाठः ।

६ "मुख्यार्थानुपपत्ति –" इति ख. पाठः ।

मैवम् । नहि 'स' इत्यस्य देशकालसम्बन्धमात्रमर्थः । किं नाम, तस्यातीतत्वमपि । तथा व्युत्पत्तेः । एवञ्च यस्य तद्देशकालसम्बन्धोऽभूदित्यर्थः स्यात् । अयमित्यस्यापि न कालादिसम्बन्धमात्रमर्थः । किं नाम, तस्य वर्तमानता च । नचैवं सति पक्षत्रयेऽपि काचिदनुपपत्तिरस्ति, यद्भूयाल्लक्षणाश्रयणं स्यात् । अविरुद्धविशेषणानामेवोक्तत्वात् । नह्यतीतदेशादिसम्बन्धस्येदानीं सत्त्वे विरोधोऽस्ति । प्रध्वंसो हि तथोच्यते । तथाऽयमिति प्रागभावः । अत्रैते श्लोकाः[1] –

पूर्वदेशादियोगस्य प्रध्वंसो यत्र दृश्यते[2] ।
तत्रैतद्देशकालस्य सत्त्वे काऽनुपपन्नता ।
वर्तमानस्य कालादेः प्रागभावो यदाऽस्ति हि ।
तदा तद्देशकालादेः सत्त्वे काऽनुपपन्नता ।
क्रमेण देशकालादेः सम्बन्धोऽपि स्थिरो मतः ।
कालद्वयस्य सम्बन्धो युगपद्यदि कथ्यते ।
तदा स्याद्व्याहतिर्नैवं सोऽयमित्यत्र कथ्यते ।
विशिष्टचैक्येऽपि धूमाग्न्योरैक्यं नास्तीति दृश्यते ।
निर्विशेषपरत्वं तन्न क्वाप्यस्तीति सुस्थितम्[3] ।। * ।।

इति श्रीमदखण्डवेदमार्गप्रवर्तकाचार्यनिखिलतार्किकचूडामणिसर्वतन्त्रस्वतन्त्र-
श्रीमद्राजेन्द्रतीर्थश्रीचरणकमलचञ्चरीकश्रीविष्णुदासार्यविरचितायां
वादरत्नावल्यां चतुर्थः सरः

---

१ "अत्र श्लोकाः" इति ख. पाठः ।
२ "विद्यते" इति च पाठः ।
३ "हि स्थितम्" इति क. ग. पाठः ।

पञ्चमः सरः

[1]मायावादिमते वेदः सत्यो मिथ्याऽथवा भवेत् ।
सत्यश्चेदपसिद्धान्तो मिथ्या चेद्वेदबाह्यता ।
तत्त्ववादिमते वेदः सत्यो नित्योऽखिलो मतः ।
श्रुतिमूलं च विज्ञानं सर्वं मानमितीष्यते ।

तथाहि – मायावादिमते वेदः सत्यो मिथ्या वा? सत्यश्चेदपसिद्धान्तः स्यात् । ब्रह्मव्यतिरिक्तस्य सत्यतानङ्गीकारात् । मिथ्या चेत् वेदबाह्यता स्यात् । यथोक्तं यादवप्रकाशैः –

"वेदोऽनृतो बुद्धकृतागमोऽनृतः
प्रामाण्यमेतस्य च तस्य चानृतम् ।
बोद्धाऽनृतो बुद्धिफले तथाऽनृते
यूयं च बौद्धाश्च समानसम्पदः" ( ) इति ।

परमतत्त्ववादिनां वेदान्तिनां मते वेदः परब्रह्मपरः सत्यो नित्यश्चापौरुषेयः सर्वोऽपि प्रमाणं चेति । श्रूयते च –

"तस्मै नूनमभिद्यवे वाचा विरूप नित्यया ।
वृष्णे चोदस्व सुष्टुतिम्"[2] (ऋ.सं. ८. ६४. ६. तै. सं. २. ६. ११. ६.)

---

१ बहुषु कोशेषु अत्र सरारम्भः न दृश्यते ।

२ "हे विरूप, तस्मा अभिद्यवे सुष्टुतिं चोदस्व । अभितो द्योतत इत्यभिद्युः । वृषा श्रेष्ठः । सुष्ठु स्तुतिं प्रति प्रेरयेति प्रार्थनं विरूपस्य ऋषेरन्त-

"नित्ययाऽनित्यया स्तौमि ब्रह्म तत् परमं पदमिति ।
श्रुतिर्वाव नित्या । अनित्या वाव स्मृतयो याश्चान्या वाचः"
इति पैङ्गिश्रुतिः ।

"विज्ञेयं परमं ब्रह्म ज्ञापिका परमा श्रुतिः ।
अनादिनित्या सा तच्च विना तां न स[1] गम्यते"
इति कात्यायनश्रुतिः ।

"सहस्रधा महिमानः सहस्रं
यावद् ब्रह्म विष्ठितं तावती वाक् ।
कश्छन्दसां योगमा वेद धीरः
को धिष्ण्यां प्रति वाचं पपाद"[2] (ऋ. म. १०.११४.८-९)

इति सर्वमनवद्यमतिमङ्गलं चेति ।। * ।।

र्यामिविषयम्" इति तत्त्वप्रदीपे पण्डिताचार्यः । विरूपं प्रति यमवचनमेतदिति पद्मनाभतीर्थभट्टारकाः । नच विरोधः शङ्कनीयः । यमदृष्टमेव मन्त्रं विरूपः पुनर्ददर्शेति समाधानसम्भवात् । अत एव ऋग्वेदेऽस्य ऋषिर्विरूप इति पठितम् । यजुर्वेदे च विश्वेदेवा इति । स्वात्मानं प्रत्येव विरूपः समबूबुधदिति च व्याचक्षते ।

१ स इति ब्रह्मशब्दोक्तः परमात्मा । तदिति प्राप्तां ब्रह्मणो नपुंसकत्व-शङ्कां व्यावर्तयितुं स इति निर्देश इति तत्त्वनिर्णयटीकायां पद्मनाभतीर्थभट्टारकाः ।

२ अयमर्थः – "ब्रह्मणो महिमानः सहस्रं सन्ति । सहस्रमित्यनन्ताः । "शतं दश सहस्रं च सर्वमक्षय्यवाचकम्" इति प्रमाणात् । ते गुणाः प्रत्येकं च सहस्रधा अनन्तरूपाः । यदेतादृशगुणं तद्ब्रह्म यावत् विष्ठितं निर्विकारतः स्थितं तावती वेदवागपि । एतादृशां वेदवचसां योगमर्थसम्बन्धं को नाम धीरः आ समन्तात् सामस्त्येन वेद । धिष्ण्यां बुद्धिविषयां वेदवाचं कः प्रतिपपाद ।" तथाह्यैतरेयारण्यके (१. ३. ८.) श्रूयते— "यावद् ब्रह्म विष्ठितं तावती वागिति । यत्र ह वा क्व च ब्रह्म तद्वाक् । यत्र वा वाक् तद्वा ब्रह्मेत्येतदुक्तं भवति ।" यत्र काले ब्रह्म तत् तत्रेत्यर्थः । यत् तदिति प्रथमा सप्तम्यर्थे व्याख्येया ।

इतः परं क्वचित् महान् ग्रन्थभागः बाहुल्येन तत्त्वनिर्णयटीकागतवाक्य-जालचर्वणचरितार्थः प्रलम्बितो दृश्यते । तथाहि –

"अत्र हि – "श्रुतिर्वाव नित्या । अनित्या वाव स्मृतयो याश्चान्या वाचः" इति पैङ्गिश्रुत्या तार्किकादयोऽपि दूरापास्ताः । निरीश्वरमीमांसकमतेऽप्य-पौरुषेयत्वं दुर्लभम् । तथाहि – किं नित्याः सर्वगता वर्णा एव वेदः, उत समुदिताः, किं क्रमविशिष्टाः, नियतक्रमविशिष्टा वा? नाऽद्यः । अकारादिवर्णानां प्रत्येकं वेदत्वप्रसङ्गात् । न द्वितीयः । 'अण्' इत्यादिप्रत्याहाराणां वेदत्वप्रसङ्गात् । न तृतीयः । वर्णास्तावन्नित्यत्वात् सर्वगतत्वाच्च स्वतः क्रमशून्याः । नच क्रमेण विना पदवाक्यभावः । नापि तमन्तरेण प्रामाण्यम् । क्रमस्तु उच्चारणक्रमो बुद्धिरूपक्रमो वा वक्तव्यः । उच्चारणादेः क्षणभंगुरत्वेन लौकिकवाक्यवदनित्यत्वं वेदस्य सिद्धम् । वर्णनित्यत्वप्रतिपादनप्रयासस्तु मीमांसकानां कुञ्जरशौच-प्रयासवदनर्थकः । चतुर्थे नियतत्वं क्रमस्य किं नित्यत्वं सादृश्यं वा? नाऽद्यः । उच्चारणोपाध्यधीनत्वात् । नोत्तरः । पौरुषेयवाक्यत्वानपायात् । प्रत्यक्षादि-नाऽर्थं बुद्ध्वा शब्दरचना वेदे नास्तीति चेत्, तर्हि किं भ्रममूलत्वमभिप्रैषि? उत नित्यज्ञानमूलत्वं वा? वाक्यरचना तावदङ्गीकृतैव । आद्ये उन्मत्तवाक्यानि स्युः । द्वितीये त्वीश्वरवाक्यानि स्युः । किञ्च वेदेऽहमादिशब्दप्रयोगो दृश्यते । अतः कथमपौरुषेयत्वं युक्तं स्यात्?

"ननु पुरातन एव वेदः पठ्यते सर्वैर्माणवकैर्नतु नूतनः क्रियत इति चेत्, न । भारतेऽपि साम्यात् । महाप्रलये पाठकाभावाच्च । अथ सृष्टिप्रलयौ न स्त इति चेत्, न । सकलश्रुतिप्रामाण्यव्याकोपात् । वेदोऽपौरुषेयः, अकर्तृकत्वात् इति चेन्न । साध्याविशिष्टत्वादसिद्धेश्च । तस्मात् वेदः सकर्तृकः, वाक्यत्वात्, लौकिक-वाक्यवत् – इति सत्प्रतिपक्षत्वाच्च गुरुभट्टमतधिक्कारः ।। * ।।

"वेदस्य प्रामाण्यमेव नाङ्गीकुर्वते शाक्यादयः । यथाऽहुः – यदनृतं तदप्रमाणं दृष्टम्, यथोन्मत्तवाक्यम्, अनृतं च "पुत्रकामः पुत्रेष्ट्या यजेत" इत्यादिवेदवाक्यम् । कृतायामपीष्टौ पुत्रजन्मानुपलम्भात् । एवं "मृदब्रवीत्" इत्याद्यनुमानविरुद्धत्वात् । स्वव्याहतं चाप्रामाणं दृष्टम् । स्वव्याहतं च उदिते होतव्यमनुदिते होतव्यमि'त्यादि । पुनरुक्तं चाप्रमाणम् । पुनरुक्तं च वेदवाक्यम् ।

शाखान्तरोक्तस्य शाखान्तरेऽभिधानात् । एकस्यामपि शाखायां वाक्यावृत्ति-दर्शनाच्च । निरर्थकं चाप्रमाणं दृष्टम् । निरर्थकं "शृण्येव" इत्यादि वाक्यम् । प्रमाणान्तरसिद्धार्थं च न प्रमाणं दृष्टम् । तथाविधं च "अग्निर्हिमस्य भेषजम्" इत्यादि वाक्यम् । किञ्च संवादरहितं विप्रलम्भकादिवाक्यमप्रमाणम् । तथा-विधं च वेदवाक्यम् ।

"अत्र ब्रूमः – किमिदमनृतत्वम्? अर्थशून्यत्वमिति चेत्; स किमापाततः, सर्वथा वा? नाऽद्यः । तस्य सर्वत्र सम्भवेनानैकान्त्यात् । द्वितीयः सन्दिग्धासिद्धः । किमत्र सर्वथा प्रमाणविसंवाद एव, उत वैगुण्यादिनिमित्तं फलादर्शनादिकमिति सन्देहापरिहारात् । व्याघातेनापि किं द्वयोरप्रामाण्यं साध्यम्, उत अन्यतरस्य? नाऽद्यः । अन्यतरप्रामाण्येऽपि व्याघातसम्भवेन सन्दिग्धकालातीतत्वस्यानैकान्ति-कत्वस्य चाऽपातात् । द्वितीये पक्षीकृतस्यैव प्रमाण्यसम्भवेन सन्दिग्धबाधानिस्ता-रात् । किञ्च, व्याघातोऽप्यापाततः सर्वथा वा? नाऽद्यः । अनैकान्त्यात् । द्वितीये सन्दिग्धासिद्धिः – किमत्र सर्वथा व्याघात एव, उताधिकार्यादिभेदेन व्यवस्थेति सन्देहानिस्तारात् । पौनरुक्त्यं तु प्रमाणसम्प्लवे व्यभिचारादप्रामाण्यस्य साधकं न भवति । व्यर्थत्वं तु कथञ्चित् साधयेत् । तदपि नास्ति । किमिदं पुनरुक्तमेव, उताधिकविवक्षादिनाऽनुवादरूपमिति सन्दिग्धत्वात् । एतेन प्रमाणान्तरसिद्धत्व-मपि निरस्तम् । नैरर्थक्यमप्यापाततश्चेदनैकान्त्यम् । सर्वथा तु सन्दिग्धम् – किमत्र शक्तितात्पर्यापरिज्ञानादर्थाप्रतिपत्तिरुत सर्वथा नैरर्थक्यादिति सन्देहात् । संवादराहित्यं च भागासिद्धम् । "अग्निर्हिमस्य" इत्यादेः संवाददर्शनात् । किमयथार्थत्वादेव संवादो नास्ति, उत तस्यार्थस्य तदेकप्रमाणकत्वादित्यन्यथा-सिद्धिसन्देहाच्च । तस्मादनृतत्वादयः सन्दिग्धासिद्धाः ।

"अपौरुषेयवेदजनितज्ञाने बाधकाभावात् करणदोषशून्यत्वाच्च प्रामाण्य-निश्चयः । तथाहि – अबोधकत्वं विपरीतबोधकत्वं खल्वप्रामाण्यम् । तत्र वैदिक-वाक्याज्ज्ञानमुत्पन्नं नवा? नेति पक्षेऽनुभवविरोधः । आद्ये, स बोधः संशयो विप-र्ययो वा? नाऽद्यः । एकाकारनियतत्वात् । नोत्तरः । बाधबोधविरहात् । तथाच– आगमः प्रमाणम्, संशयविपर्ययाजनकत्वे सति ज्ञानजनकत्वात्, सम्मतवत् ।

अपिच, शब्दस्याबोधकत्वं द्विविधम् – निरभिधेयत्वेनान्वयबोधाभावेन वा भवति । विपरीतबोधकत्वं विपरीतान्वयबोधेन । तच्च पुरुषदोषाधीनम् । पुरुषोऽप्यज्ञानात् विपरीतज्ञानात् प्रमादादपटुकरणत्वान्निरभिधेयान् निरन्वयान्वा शब्दान् प्रयुंक्ते । प्रमादात् करणापटुत्वाद्वा विपरीतज्ञानाद्विप्रलम्भकत्वाद्वा विपरीतान्वयान् । तदभावश्च द्वेधा भवति । अपौरुषेयत्वेन वा, वक्तुराप्तत्वेन वा । विवक्षितार्थतत्त्वज्ञानादेराप्तिशब्दार्थत्वात् । तत्र वेदस्यापौरुषेयत्वेन पुरुषदोषनिबन्धनदोषाभावात् कारणाभावेन कार्यस्य शङ्कितुमशक्यत्वात् अप्रामाण्याभावो निश्चीयते । वेदो नाप्रमाणम्, अप्रामाण्यकारणदोषशून्यत्वात्, प्रत्यक्षादिवत् । शब्ददोषाश्च वक्तृदोषाधीनाः, तदन्वयव्यतिरेकानुविधायित्वात् । यत् यदन्वयव्यतिरेकानुविधायि तत् तदधीनम्; यथा पटस्तन्त्वधीनः । वेदवाक्यं पुरुषदोषनिबन्धनदोषवन्न भवति, पुरुषाप्रणीतत्वात्, यद्येनाप्रणीतं वाक्यं न तत् तद्दोषप्रयुक्तदोषवत्; यथा यज्ञादत्ताप्रयुक्तं वाक्यं न यज्ञदत्तदोषप्रयुक्तदोषवदिति । विपक्षे तु, अकारणकार्योत्पत्तिप्रसङ्गः । तथाचानृतत्वादयः प्राक् सन्दिग्धाः, निश्चिते त्वप्रामाण्याभावे निश्चितासिद्धा एव भवन्ति । वेदोऽप्रमाणम्, आप्ताप्रणीतवाक्यत्वात्, उन्मत्तवाक्यवदिति चेत्, न । वाक्यत्वावच्छिन्ने साध्येऽनाप्तप्रणीतत्वस्य, केवले त्वप्रामाण्ये कारणदोषवत्त्वस्योपाधित्वात् । वेदे चोपाधिद्वयाभावस्योक्तत्वात् । वाक्यप्रामाण्यस्य च वक्तुराप्तिमूलत्वं तु नास्ति । प्रामाण्यस्य स्वतस्त्वसमर्थनात् ।

"कश्चिदाह – महाजनपरिगृहीतत्वात् प्रामाण्यनिश्चयात् किमनेनापौरुषेयत्वस्वीकारेणेति । तदसाधु । "न विलक्षणत्वादस्य तथात्वं च शब्दात्" इति सूत्रे श्रुतौ च नित्यत्वहेतुस्वीकारात् । किञ्च महच्छब्देन सङ्ख्याप्रकर्षोऽभिधीयते, पूज्यत्वं वा? नाऽद्यः । जनानामियत्तापरिज्ञानस्याशक्यत्वात् सन्दिग्धासिद्धत्वात् । देशविशेषे बौद्धानां महाजनपरिगृहीतत्वेनानैकान्त्याच्च । न द्वितीयः । वेदपरिग्रहवतां पूज्यत्वस्य परैरनङ्गीकारात् । स्वशास्त्रपरिग्रहीतॄणां पूज्यत्वस्याङ्गीकृतत्वाच्च ।

"ननु वेदस्यापौरुषेयत्वं न युक्तम् वाक्यत्वापौरुषेयत्वयोः परस्परपरिहारे-

---

णैव वृत्त्युपलब्धेः द्वयोरेकत्रासम्भावितत्वात् । मैवम् । अपौरुषेयेण वाक्येन विना धर्माद्यसिद्धेः । धर्मादिकं तावदतीन्द्रियं वस्तु चार्वाकं विना सर्वादिभिः प्रामाणिकतयाऽङ्गीकृतम् । चार्वाकस्तु "अभ्युपगमेऽप्यर्थाभावात्" इति सूत्रकृतैवापास्तः । नचापौरुषेयवाक्यं विना धर्मादिसाधकं प्रमाणमस्ति । "चोदनालक्षणोऽर्थो धर्मः" इति न्यायात् ।

"नन्वस्त्येव धर्मादिकम् । तच्च बुद्धर्षभेश्वरकपिलादिपुरुषवचनैरेव सेत्स्यति । तत्किमपौरुषेयवाक्याङ्गीकारेणेति चेत्; मैवम् । पुरुषाणां बहुलमज्ञानविप्रलम्भदर्शनेन बुद्धर्षभादिष्वपि तत्सम्भावनयाऽऽश्वासानुपपत्तेस्तद्वाक्याद्धर्मादिनिश्चयासम्भवात् । ननु धर्मादेरुपदेष्टा बुद्धः सर्वज्ञोऽङ्गीक्रियते । धर्मादिसाक्षात्कारवतस्तस्य न रागादिदोषाः सम्भवन्ति । अज्ञानमूलत्वात् तेषाम् । यथाऽऽह पतञ्जलिः – "अविद्या क्षेत्रमुत्तरेषाम्" इति । रागादिरहितस्य च न विप्रलम्भः सम्भवति । तस्य तत्कार्यत्वात् । नह्येवमेव कश्चित् कञ्चिद्विप्रलब्धुमिच्छति । नचैवम्भूतस्य महानुभावस्य करणपाटवाद्यभावसम्भावनाऽस्ति । अतस्तस्मिन्ननाश्वासेऽपि कारणाभावादुपपन्नस्तद्वाक्येन धर्मादिनिश्चय इति बौद्धाः । एवमार्हतादयोऽपि स्वाचार्यसार्वज्ञ्यमङ्गीकुर्वाणाः प्राहुः ।

"एवं वदता तावत् कस्मिंश्चित् पुरुषे प्रमाणेन विना सर्वज्ञत्वं कल्प्यम् । तथाहि – न तावत् तदीये सार्वज्ञ्येऽस्माकं प्रत्यक्षमस्ति । अस्माकमपि तत्प्रसङ्गात् । सर्वं हि ज्ञात्वा तदीयज्ञानस्य तद्विषयत्वं प्रत्यक्षेण ज्ञातव्यम् । नचास्माकं सार्वज्ञ्यमस्ति । तथात्वे बुद्धादिकल्पनावैयर्थ्यात् । नाप्यनुमानम् । नहि सर्वज्ञत्वेन व्याप्तमन्यत्र दृष्टं लिङ्गमस्ति । आगमोऽपि न तावदपौरुषेयः परैरङ्गीकृतोऽस्ति । पौरुषेयोऽपि किं सर्वज्ञप्रणीतो वा, अन्यप्रणीतो वा? नान्त्यः । अनाश्वासात् । आद्येऽपि किं तत्सर्वज्ञप्रणीतः, उत सर्वज्ञान्तरप्रणीतः? नाऽद्यः । इतरेतराश्रयप्रसङ्गात् – तस्य सार्वज्ञ्यसिद्धौ तत्प्रणीतागमस्य प्रामाण्यसिद्धिः, तेन च तत्सार्वज्ञ्यसिद्धिरिति । अन्यथाऽस्मद्वाक्येनैवास्माकं सार्वज्ञ्यं सेत्स्यति । न द्वितीयः । असिद्धेः । सर्वज्ञान्तरवाक्येन तत्कल्पनेऽनवस्थानात् । पूर्वसर्वज्ञवाक्याश्रयणे चेतरेतराश्रयः स्यात् । नाप्युपमानम् । तद्धि स इवायमिति, एतत्सदृशोऽसा-

---

विति वोत्पद्यते । नचात्र सार्वज्ञ्यं प्रमितम्; येनोपमानं स्यात् । नाप्यर्थापत्तिः । अनुपपत्त्यभावात् । बुद्धस्य धर्मातिदेशनं महाजनपरिगृहीतत्वं चानुपपद्यमानं सार्वज्ञ्यमवगमयतीति चेत्, तर्हि जिनस्यापि तत्स्यात् । नचास्त्विति वाच्यम्; विप्रतिपत्त्यभावप्रसङ्गात् । नाप्यभावः । तस्य भावविषयतायाः क्वाप्यदृष्टत्वात् ।

"आर्हतास्त्वाहुः – कश्चिदात्मा सकलपदार्थसाक्षात्कारी, तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धकत्वात्; यदेवं तदेवम्; यथाऽपगततिमिरादिप्रतिबन्धं लोचनविज्ञानं रूपसाक्षात्कारीति । तदसत् । सकलपदार्थसाक्षात्कारित्वस्यान्यत्रादृष्टत्वेनाप्रसिद्धविशेषणत्वात् । तद्ग्रहणस्वभावत्वं प्रक्षीणप्रतिबन्धकत्वं चासिद्धम् । जिनोऽल्पज्ञः, पुरुषत्वात्, सम्मतवत् । जिनः धर्मदर्शी न भवति, पुंस्त्वात्, सम्मतवत् ।

"कश्चिदाह – धर्मादिकं कस्यचित् प्रत्यक्षम्, वस्तुत्वात्, घटवत् । अत्र किं धर्मादेः प्रत्यक्षत्वमात्रं साध्यते, उत एकपुरुषप्रत्यक्षत्वम्? आद्येऽर्थान्तरत्वम् । कस्यचित् केनचित् प्रत्यक्षीकृतत्वेनापि प्रतिज्ञातार्थसिद्धेः । न द्वितीयः । दृष्टान्तेऽदृष्टत्वात् । नहि पक्षातिरिक्तस्यैकपुरुषप्रत्यक्षत्वं सम्मतम् । एको घट एकस्य प्रत्यक्ष इति चेत्, तर्हि धर्म एकस्य प्रत्यक्षोऽपरस्याधर्म इत्यर्थान्तरतातादवस्थ्यात् । धर्मादिविशेषज्ञानाभावे साध्यसाधनाद्यपरिज्ञाने च सामान्यज्ञानस्यानुपयुक्तत्वात् । एवं शिवोऽप्यल्पज्ञः, चेतनत्वात्, सम्मतवत् । चेतनत्वहेतुः सर्वज्ञे परमेश्वरेऽनैकान्तिक इति चेत्; न । वेदं विना सर्वज्ञेश्वरस्याद्याप्यसिद्धेः । तदर्थं चापौरुषेयं वाक्यमङ्गीकर्तव्यम् ।

"तार्किकास्त्वाहुः – विमतं सकर्तृकम्, कार्यत्वात्, घटवत् – इति क्षित्यादेः कर्तरि सिद्धे तस्य सार्वज्ञ्यमपि सिद्धमेव । उपादानादिसाक्षात्कारवतः कर्तृत्वात् । सर्वस्यापि क्षित्याद्युपादानादौ प्रविष्टत्वादिति । तन्न । घटादीनां कर्तरि कुलालादौ तदुपादानादिविषयसाक्षात्कारस्यादृष्टत्वात् । नहि कुलालो घटं पलपरिमाणेयत्ताविशेषवन्तं तन्निमित्तं कालमदृष्टं तद्विशेषप्रयोजनं वा साक्षात्करोति । केवलानुमाने सर्वत्रोपाधेः सुलभत्वाच्च । यथोक्तम् – "उपाधिप्रतिरोधौ तु क्व

नामातीव दुर्वचौ" इति। प्रकृते च शरीराजन्यत्वमुपाधिः। नच विशेषणवैयर्थ्यम्। पक्षव्यावृत्त्यर्थं विशेषणं स्यात्। अपिच, किं व्यभिचारनिवारणलक्षणप्रयोजनाभावो वैयर्थ्यम्, प्रयोजनमात्राभावो वा? नाऽद्यः। व्याप्यगतविशेषणस्यैव तथात्वेन व्यापकगतविशेषणस्य तथात्वनियमाभावात्। न द्वितीयः। असिद्धेरिति।

"विमतं सकर्तृकम्, कार्यत्वादितीश्वरानुमानं बहुधा सोपाधिकम्। अनणुत्वानतीन्द्रियत्वोपाधिदर्शनात्। नच साधनव्यापकता। कार्यात् पक्षतुल्यात् द्व्यणुकादतीन्द्रियाच्च व्यावृत्तेः। नच पक्षेतरता। विपक्षात् परमाणोर्मनसश्च व्यावृत्तेः। एवं भूतसमवेतत्वाभावोऽप्युपाधिः। पक्षतुल्यतद्रूपात् व्यावृत्तेः साधनाव्यापकत्वात्। पृथिवीत्वादेर्विपक्षस्य व्यावर्त्यस्य सत्त्वादपक्षेतरत्वाच्च। एवं विमतोऽसर्वज्ञः, पुरुषत्वात्, सम्मतवत्। नच धर्मिग्राहकप्रमाणविरोधः। अल्पकार्यस्य कर्तारं पक्षीकृत्य प्रयोगात्। दरीगतवनस्पतीनां कर्ता किञ्चिज्ज्ञः, कर्तृत्वात्, कुविन्दवत्। एवं दोषीत्यादि सुसाधम्। यथोक्तम् –

"वृक्षकृन्नाखिलं वृक्षं वेत्ति पुंस्त्वाद्धि चैत्रवत्।
इत्याद्यनुमया स्पर्धि नानुमानं परेशितुः।
शक्तं विज्ञापने चातिप्रसङ्गोऽनुमयेदृशा" इति।

एवं सार्वज्ञ्यासिद्धौ तस्याविप्रलम्भकत्वमप्यप्रामाणिकं कल्प्यम्। रागाद्यभावोऽप्यसिद्धः। तद्रहितेष्वपीश्वरावतारेषु वञ्चकत्वदर्शनात्। "दैत्यानां वञ्चनाय" इत्युक्तेः। वीतरागाणामपि ज्ञानांकुरसंरक्षणार्थं छलादिना प्रतिवादिप्रतारणस्य सर्वैरङ्गीकृतत्वाच्च। सोऽयमुपदेश इति च कल्प्यम्। तदेवं कल्पनागौरवप्रसङ्गेन न पौरुषेयेण वाक्येन धर्मादिनिश्चयः।

"नचापौरुषेयवादिना किञ्चित् कल्प्यमस्ति। यथोक्तं भगवत्पादाचार्यैः :– "अपौरुषेयत्वं च स्वत एव सिद्धम्" इति। अधुनाऽध्यापकाध्येतृभिः पठ्यमानो वेदः किमीश्वरकृत एव, उत नवीनः, स्वयंकृतो वा? द्वितीयतृतीययोरसर्वज्ञप्रणीततप्रसङ्गोऽनुभवविरोधश्च। आद्येऽपि, ईश्वरोऽपि कल्पादौ वेदं निर्मायैकस्मै शिष्यायोपदिशति, उत वेदान्तरं निर्मायेति वक्तव्यम्। तमेवेति चेत्, कुतोऽयं भवतो निर्णयः? प्रथमरचितस्याविस्मरणात्, वृथा वेदान्तरकल्पनाऽयोगाच्चेति

चेत्, तत् किं पूर्वपूर्वतरकल्परचितं व्यस्मार्षीत्, येन पुना रचयतीति कल्प्यते। एवं पूर्वतमादिकल्पेष्वित्यनादितैवावगतेत्यपौरुषेयत्वं स्वत एव सिद्धम्।

"वेद ईश्वरकृतो न भवति, वाक्यत्वात्, सम्मतवाक्यवत्। किंचेश्वरकृतो वेदः स एवायमुतान्यः? नाऽद्यः। तस्य तव मते नष्टत्वात्। द्वितीयेऽप्यपसिद्धान्ताद्यापत्तिः। किञ्च "ऋग्वेद एवाग्नेरजायत, यजुर्वेदो वायोः, सामवेद आदित्यात्" इत्यनीश्वररचितत्वश्रुतेः नेश्वरकृतो वेदः। सम्प्रदायप्रवर्तका एवेति चेत्; तर्हीश्वरोऽपि तथेत्यागतोऽसि मार्गम्।

"यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता इत्युक्तेः।
"अर्थं बुध्वा नरैर्मीने(?) रचिता लौकिकागमाः।
न प्रसिद्धिस्तथा वेदे हीशोऽप्यध्यापको मतः" इत्युक्तेश्च।

"अथाऽहुः – वेदवाक्यानि पौरुषेयाणि; वाक्यत्वात् कालिदासवाक्यवत्। अयं कालो वेदव्यतिरिक्तेदानीन्तनत्वरहितपौरुषेयवान् कालत्वात्, अन्यकालवत्। आकाशो वेदव्यतिरिक्ताकाशनिष्ठत्वरहितपौरुषेयवान्, द्रव्यत्वात्, तन्तुवत्। श्रोत्रं वेदव्यतिरिक्तश्रोत्रग्राह्यत्वरहितपौरुषेयग्राहकं इन्द्रियत्वाच्चक्षुर्वदिति। मैवम्। अनुमानानां विपक्षे बाधकाभावेनाप्रयोजकत्वात्। वेदो नेश्वरप्रणीतः, वाक्यत्वात् लौकिकवाक्यवदित्यपि वक्तुं शक्यत्वात्। पौरुषेयत्वे च वक्तुराप्त्यनिश्चयेन ततो धर्मद्यनिश्चयापातात्। विशिष्टव्यतिरेकिणां तु पौरुषेयपदस्थाने अपौरुषेयपदप्रक्षेपेण सत्प्रतिपक्षानिस्तारात्। किञ्च वेदः सकर्तृको वाक्यत्वाल्लौकिकवाक्यवदित्यत्र वेदत्वाभाव उपाधिः। ननु किमिदं वेदत्वं यदभाव उपाधित्वेन अभिप्रेयते? न तावद्वाक्यत्वादृष्टविषयवाक्यत्वादृष्टविषयप्रमाणवाक्यानामन्यतमम्। तदभावस्य साध्याव्यापकत्वात्। नाप्यपौरुषेयत्वम्; तदभावस्यैव साध्यत्वात्। नापि वैदिकशब्दलक्षणवत्त्वम्। तदभावस्य भारतादिषु साध्याव्यापकत्वात्। नापि नियतक्रमवत्त्वम्। तस्यापि भारतादौ सद्भावात्। नापि वेदव्यवहारगोचरत्वम्; इतिहासपुराणादिषु सद्भावात् – "इतिहासपुराणः पञ्चमो वेदानां वेदः" इति श्रुतेः। नापि मुख्यतः तद्गोचरत्वम्। तदभावस्य पक्षेतरत्वात्। प्रतिपक्षपर्यवसाने चासाधारणत्वात्।

"मैवम् । अनुपलभ्यमानोचितकारणत्वाभावस्याभिप्रेतत्वात् । वाक्यस्योचितं कारणं प्रत्यक्षादिकं वा, विप्रलम्भादिकं वा । अनुपलभ्यमानप्रत्यक्षादिमूलवाक्यत्वं वेदत्वम् । एतच्च – 'अनुपलभ्यमानमूलत्वे सति महाजनपरिगृहीतवाक्यत्वम्' इति वदता उदयनेनाप्यङ्गीकृतम् । तत्रानुपलभ्यमानमूलत्वग्रहणेन प्रत्यक्षादिमूलत्वस्य, महाजनपरिगृहीतत्वग्रहणेन विप्रलम्भादिमूलत्वस्य च व्यावर्तितत्वात् । सर्वज्ञज्ञानमूलत्वं वदताऽपि तस्य प्रमाणजन्यत्वाभावादेव वक्तुं शक्यत एव । एवं व्याप्यत्वासिद्धो वाक्यत्वादिहेतुः । तर्कपराहतं च वाक्यत्वानुमानम् । पूर्वोक्तकल्पनागौरवप्रसङ्गात् । श्रुतिपुराणादिविरुद्धं च । एतेन वेदाः सर्वज्ञप्रणीताः वेदत्वात् व्यतिरेकेण लौकिकवाक्यवदित्यपास्तम् । वेदस्य सर्वज्ञप्रणीतत्वनिश्चये सति प्रामाण्यनिश्चयः । तन्निश्चयेन सर्वज्ञनिश्चयः । ततश्च विशेषण(प्र)सिद्ध्याऽनुमानप्रवृत्तौ वेदप्रामाण्यनिश्चय इति चक्रकाश्रयप्रसङ्गाच्च ।। * ।।

"ननु तथाऽपि नापौरुषेयत्वं वेदस्योपपद्यते; तस्य वर्णसमुदायस्वरूपत्वात्। वर्णनां चोच्चारणेनोत्पद्यमानत्वात् । नचोत्पत्तिमतां समुदायो नोत्पत्तिमानिति युज्यते । मैवम् ।स एवायं गकार इति प्रत्यभिज्ञया, "यावद् ब्रह्म विष्ठितं तावती वाक्" इति श्रुत्या च वर्णनित्यत्वाङ्गीकारात् । नचोपलब्धिमात्रेणोत्पत्त्याद्यध्यवसायो युक्तः । तथा सत्युपलब्धानुपलब्धानां घटादीनां तदैवोत्पत्त्यादिप्रसङ्गात् । व्यञ्जकभावभावाभ्यामेव ह्युपलम्भानुपलम्भौ । उच्चारणं तु व्यञ्जकजनकत्वेनोपयुज्यते । व्यञ्जकाश्च ध्वनयः । ते च नाभसाः । प्रतिनियताश्च । ते वर्णा एव पदानि । भिन्नेष्वपि वर्णेषु एकार्थाभिधानोपाधिना एकं पदमिति संभवात् । एकदेशावस्थानोपाधिनाऽनेकेष्वेव तरुषु वनमितिवत् । एकबुद्ध्युपारूढत्वेन वर्णानामेवार्थाभिधायकत्वोपपत्तेः । तदेवेदं वाक्यमिति नित्यत्वसिद्धिः । वर्णानामेव पदबुद्धिविषयाणामन्वितस्वार्थाभिधायकत्वेन वाक्यार्थवेदनसंभवात् ।

"ननु वर्णास्तावन्नित्यत्वात् सर्वगतत्वाच्च स्वतः क्रमशून्याः । नच क्रमेण विना पदवाक्यभावः । नापि तमन्तरेण प्रामाण्यम् । अतः क्रमः पौरुषेय एवाऽस्थेयः । मैवम् । स एवायं क्रम इति क्रमस्वरादेरपि नित्यत्वावगमात् ।

"ननु वेदेऽहमादिशब्दप्रयोगो दृश्यते । अतः कथमपौरुषेयत्वम्? नहि वयं वेदे पुरुषाभिप्रायप्रवेश एव नास्तीति वदामः । तथात्वे संकल्पप्रार्थनादिवाक्यानामानर्थक्यप्रसङ्गात् । पुरुषाभिप्रायप्रवेशेऽपि स्वतन्त्रस्य वक्तुरभावादपौरुषेयत्वं ब्रूमः । पूर्वस्थितान्येव वेदवाक्यानि कानिचित् कैश्चित्पुरुषैः स्वाभिप्रायप्रवेशेन प्रयुज्यन्ते । यथाऽधुना वेदपाठकैः । नत्वपूर्वाणि क्रियन्ते । प्रत्यक्षादिनाऽर्थं बुध्वा वाक्यरचनाभावात् । यथोक्तं श्रीमच्चरणैः –" वर्णाः कूटस्थनित्याः, सर्वगताश्च । पदान्यपि नियतान्येव । तथाऽप्यानुपूर्वीविशेषस्य स्वतन्त्रपुरुषपूर्वकत्वभावाभावाभ्यामयं भेदः" इति । एतत्सर्वमुक्तं पुराणे –

"नित्या वेदाः समस्ताश्च शाश्वता विष्णुबुद्धिगाः ।
सर्गे सर्गेऽमुनैवैता उद्गीर्यन्ते तथैवच ।
तत्क्रमैरेव तैर्वर्णैस्तैः स्वरैरेव नान्यथा ।
अतः श्रुतित्वमेतासां श्रुता एवाखिलैर्जनैः ।
श्रुतयो दृष्टयश्चेति तेनोच्यन्ते पुरातनैः ।
तदुत्पत्तिवचश्चैव भवेद् व्यक्तिमपेक्ष्य तु ।
चेतनस्य जनिर्यद्वदुच्यते सर्वलौकिकैः ।
पुराणानि तदर्थानि सर्गे सर्गेऽन्यथैवतु ।
क्रियन्तेऽतस्त्वनित्यानि तदर्थाः पूर्वसर्गवत् ।
वेदानां सृष्टिवाक्यानि भवेयुर्व्यक्त्यपेक्षया ।
अवान्तराभिमानानां देवानां वा व्यपेक्षया" इति ब्रह्माण्डे ।
"वेदास्ते नित्यविन्नत्वात् श्रुतयश्चाखिलैः श्रुतेः ।
अम्नायोऽनन्यथापाठादीशबुद्धिस्थिताः सदा" इति महावराहे ।

नित्या वेदाः । न केवलं वर्णमात्रम् । नापि पदमात्रम् । किन्तु समस्ताश्च । तत्रोपपत्तिः – 'शाश्वता विष्णुबुद्धिगा' इति ।

"ननु, ईश्वरबुद्धौ सर्वदा प्रतीयमानत्वं नामेश्वरेण सर्वदा वर्तमानतयाऽनुभूयमानत्वं विवक्षितम् । तस्यैव नित्यत्वसाधकत्वात् । तदेव कुतः? पुराणवाक्या-

---

दिति ब्रूमः । संस्कारमात्रत्वेन वर्तनमिति चेत्; न, अमुख्यार्थाश्रयण प्रसङ्गात् ।

"सर्गे सर्गेऽमुनैवैत उद्गीर्यन्ते" इति प्रत्यभिज्ञाविरोधाच्च । नच–सादृश्यादेत एवेत्युक्तमिति वाच्यम् । जन्मवाक्यगतिकथनविरोधाच्च । क्रमविशिष्टवर्णा एव वेदो नतु घटादिवत् पदार्थान्तरम् । क्रमश्च बुद्धिनिमित्त एव नतु स्वतोऽस्ति । ततश्च सर्वेषां सर्वथा वर्णविषयविवक्षितक्रमोपाधिभूतबुद्ध्युपरम एव वेदेऽपि नाशो वक्तव्यः । नच घटादीनामिवापरः । नचेश्वरस्य तथाविधबुद्ध्युपरमो युज्यते । स हि देवदत्तस्येव विषयान्तरनिमित्तो वा; विस्मरणनिमित्तो वा? नोभयथाऽपि संभवति । तस्य सर्वदा सर्वज्ञत्वात् । अतो वेदाः सर्वदा परमेश्वरेण वर्तमानतयाऽनुभूयमानत्वात्समस्ताः नित्या एवेति सिद्धम् । तदुक्तमाचार्यैः – "अत आकाशगुणे शब्दे व्यज्यमाना वर्णादयस्तत्क्रमात्मको वेदश्च नित्य एवेति सिद्धम्" इति । एवं वेदस्य अपौरुषेयत्वसिद्धिः ।। * ।।

"प्रामाण्यस्य स्वतस्त्वं हि नो चेत् स्यादनवस्थितिः ।
साक्षिणा गृह्यते ज्ञानं तत्प्रामाण्यं च गृह्यते ।
ज्ञानस्य बाधकाज्ज्ञेयमप्रामाण्यमिति स्थितिः ।"

"प्रामाण्यं स्वतः । परतोऽप्रामाण्यमिति द्वैपायनीयं मतम् । ज्ञानग्राहकातिरिक्तग्राहकानपेक्षत्वं ज्ञाप्तौ स्वतस्त्वम् । ज्ञानग्राहकातिरिक्तग्राहकान्तरापेक्षत्वं ज्ञाप्तौ परतस्त्वम् । तत्र ज्ञानं स्वप्राकाशेन साक्षिणैव गृह्यते । तत्प्रामाण्यं चोत्सर्गतो गृह्यते – यज्ज्ञानं तत्प्रमाणमिति । वादिविप्रतिपत्तिश्चेत् किञ्चित्प्रतिबद्धो भवति । तन्निरासे च स्वमहिम्नैव साक्षी प्रामाण्यं गृह्णाति । यथा स्वयं समर्थोऽपि गजो गोक्षुरकादिना प्रतिबद्धो न चलितुं क्षमते; तदपसरणे स्वयमेव गच्छति । अप्रामाण्यं तु बाधदर्शनादेव गृह्यत इति परतस्त्वं तस्य । तथाहि– प्रामाण्यं ज्ञानग्राहकमात्रग्राह्यम्, अप्रामाण्येतरज्ञानसमवेतधर्मत्वात्, ज्ञानत्ववत् । विपक्षेऽनवस्थाप्रसङ्गो बाधकः । नच प्रामाण्यं परतो ज्ञायते; अनभ्यासदशायां सांशयिकत्वात्, अप्रामाण्यवदिति वाच्यम् । व्यर्थविशेषणत्वात् । असिद्धिपरिहारार्थमिति चेन्न । तथाऽनभ्युपगमात् । व्यभिचारनिवारकमेव हि हेतो-

---

विशेषणमिति नियमाङ्गीकारात् । असिद्धेश्च – नह्यनभ्यासदशायां सर्वत्र संशयो दृश्यते । स्वतः प्रमाणतया भवदभ्युपगतधर्मिप्रत्यक्षानुमानोपमानेष्वपि संशयादिदर्शनेनानैकान्त्याच्च । किंच प्रामाण्यं तावदवश्यं केनचित्प्रमाणेन ज्ञातव्यम् । अन्यथा तदभावप्रसङ्गात् । ज्ञानग्राहकातिरिक्तेन ग्रहणाङ्गीकारेऽनवस्थानात् । तस्य स्वतस्त्वे, प्रथमस्यैव तथात्वाङ्गीकारोपपत्तेः परिशेषात् स्वतस्त्वसिद्धिः । तथा च प्रयोगः – ज्ञानगतं याथार्थ्यं तद्ग्राहकेणैव ग्राह्यम्, ग्राहकान्तरानुपपत्तौ सत्यां गृह्यमाणत्वात् । यद्यतोऽन्येनानुपपद्यमानग्रहणं सत् गृह्यते तत्तेनैव ग्राह्यं यथा चक्षुषोऽन्येनानुपपद्यमानसाक्षात्कारं साक्षात्क्रियमाणं रूपं चक्षुषा साक्षात्क्रियत इति । नच विशेषणासिद्धिः । ग्राहकान्तरस्यानवस्थाप्रसङ्गेन निरस्तत्वात् । नच साक्षिवेद्यत्वेऽनवस्थाप्रसङ्गः । साक्षी स्वयंप्रकाशः स्वात्मानं स्वप्रामाण्यमपि गोचरयतीत्यङ्गीकारात् । किञ्च निःशङ्का प्रवृत्तिस्तावत्प्रामाण्यनिश्चयाधीनैव । अस्ति च पारलौकिकफलसाधनेषु निःशङ्का प्रवृत्तिः । तत्र तावदवश्यं प्रामाण्यं ज्ञातव्यम् । अवधृतप्रामाण्यमेवाहि परप्रामाण्यनिश्चयाय प्रभवति । तत्प्रामाण्यं चावधृतप्रामाण्येन प्रमाणान्तरेणेति दुर्वाराऽनवस्था स्यात् । अनुमानात्तात्सिद्धिरिति चेत्; न । अनुमानप्रामाण्यं, च येन ज्ञानेन विषयीक्रियते तत्प्रामाण्यमन्येनेति कथं तत्रापि नानवस्था स्यात्? किञ्च ज्ञानस्य याथार्थ्यं किमदृष्टकारणजन्यत्वेनावधारणीयम्, उत दृष्टकारणजन्यत्वेन, अथ प्रवृत्तिसामर्थ्येन, यद्वा ज्ञानान्तरसंवादेन, किंवा विसंवादाभावेन? नाऽद्यः । तस्यापि दुरवधारणत्वात् ।ज्ञानयाथार्थ्येन तदनुमाने च, इतरेतराश्रयापत्तेः । नित्यज्ञानेषु तदभावाच्च । न द्वितीयः, अशक्यावधारणत्वात् । न तृतीयः, सर्वत्र तदभावात् । न चतुर्थः, सुखादिज्ञाने तदभावात् । ज्ञानसंवादाभ्युपगमे च धारावाहिकभ्रमेऽपि तद्ग्रहापातात् । यथार्थज्ञानसंवादाभ्युपगमे च तद्याथार्थ्यावधारणेऽनवस्थानात् । न पञ्चमः । असंजात बाधभ्रमेष्वपि तदापातात् । पुरुषदेशकालविकल्पानुपपत्तेश्च । अतो ज्ञानग्राहकेण साक्षिणैव ज्ञानयाथार्थ्यग्रहणम् । साक्षिज्ञानं च यथार्थमेव । नहि तद्विषये सुखदुःखेच्छाभयादौ कश्चित् संदेग्धि । नापि विपर्येति । अत एव साक्षिविषयावतारपर्यन्त-

सच्चिदानन्दरूपाय कृष्णाय परमात्मने ।
पूर्णज्ञानप्रभैश्वर्यसुखशक्त्यात्मने नमः ।।

इति श्रीमदखण्डवेदमार्गप्रवर्तकाचार्यनिखिलतार्किकचूडामणिसर्वतन्त्रस्वतन्त्र-
श्रीमद्राजेन्द्रतीर्थश्रीचरणकमलचञ्चरीकश्रीविष्णुदासार्यविरचितायां
वादरत्नावल्यां पञ्चमः सरः

इति वादरत्नावली

परीक्षा कुत्रचित् । ततः परं सन्देहाभावान्न परीक्षावतार इति स्वतः प्रामाण्यसिद्धिः ।। * ।।